उद्दिश्यमानं प्रति निर्दिश्यमानयोः यथाक्रममिति वाच्यम्। कश्चरति कश्चरः तच्चित्रम्। तच्छादयति। नशात्। शकारात्परस्य तव
र्गस्य चुत्वं न भवति। प्रश्नः। विश्नः। ष्टुभिः ष्टुः। सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ भवतः। कष्षष्ठः। तट्टीकते। नषि। षकारे परे तव
र्गस्य ष्टुत्वं न भवति। भवान्षष्ठः। टोरंत्यात्। पदान्ते वर्तमानाट्टवर्गात्परस्य स्तोः ष्टुर्न भवति। षण्नरः। षड्नरः। षट्सीदंति॥

॥ ड्किति इसेकौत्रमेद्ध ।

स्य शत्वं न ङोः ङित्वाद्गुणाभावः प्रच्छे सुसंप्रसारणं न भाष्येऽनुक्तत्वात् ष्टुभिः ष्टुः स्तोरित्यनुवर्तते षू च टवश्च ष्टव स्तेः ष्टुभिः षच टुश्च ष्टुरनयोः समाहारः ष्टु नपुंसक
निर्देशोयमित्येके। षासहितः ष्टुः ष्टुः शाकपार्थिवादित्वान्मध्यपदलोपः इति पुल्लिंगनिर्देशोयमित्यन्ये सहापि स्थान्यादेशयोर्यथासंख्यं निमित्तस्यानि
नो ष्टुन न षीति निषेधात् स्तोः ष्टुभिर्योगे ष्टुः स्यादिति न षितो ष्टुर्न स्यात् षकारे परे तोरिति किं कष्षष्ठः षीति किं तट्टीकाषीति सप्तमीनिर्देशात्पूर्वे वकारे ष्टुत्व
स्य ईवरो ष्टे जिटोरन्त्यात् स्तोरित्यनुवर्तते अत्र तेभवो न स्तस्मात् स्यात् अंतशब्देन पदांतं कथ्यते भवार्थे राप्तः णिनो वेति णित्वविकल्पाद्वृद्ध्यभावः पदा राम
ते स्थिताट्टोः परस्य स्तोः ष्टुत्वं न भवति। पदान्तात् किं। ईट्टे। टोः किं। सर्पिष्टमं। नमे नमावेति नमेषण्नरः जवाभावपक्षे षट्नरः नर इति बहुवचनं॥ ६ ॥ १३

नवतिनगर्योर्नेपदांतात् टवर्गात्परयोर्नवतिनगरीशब्दयोः ष्टुत्वं भवति टोरंत्यात् इतिनिषेधो न प्रवर्तत इत्यर्थः षड्भिरधिका नवतिरित्यत्र षस्य डत्वे कृते
नस्य ष्टुत्वं न ततः कचित्त्वचस्येति डस्य णः षण्णवतिः षट् नगर्यः इत्यत्र नस्य ष्टुत्वं षण्णगर्यः सादीनां सुपि त्सस्य नटवर्गात्परस्य सादीनां नकारस्य सकार
स्य ष्टुत्वं न भवति सुपि सप्तमीबहुत्वे नो र्लिलः नो रिति किं शङ्क्षोनीति शक्लुनानीति लिङ्निकिं तद्द्व्यं यकारवकारलकाराः सानुनासिका निरनुनासिका
श्च तत्र सानुनासिकस्य नकारस्य स्थाने सानुनासिक एव लो भवतीत्यर्थः उदः स्थास्तंभोः सलोपः उदः परयोः स्थास्तंभोः सकारस्य लोपो भवति स्थागतिनि
वृत्तौ स्तंभु निरोधने सलोपे कृते खसे च पाङ्‌सानामिनिद्रस्य तः उत्थानं नः सक् छते नान्तस्य पदस्य सक् स्यात् अवः परो यस्मात्तः अवपरस्तस्मिन् अवपरे छते कि

नवतिनगर्योर्न। षण्णवतिः। षण्णगर्यः। सुपो न। लिट्सु। टनान्तस्य वा धुट्। लिट्त्सु। नो र्लिलः। तवर्गस्य लकारे परे लकारः स्यात्। तल्लुनाति। भ
वाँल्लिखति अनुनासिकाननुनासिकत्वेन द्विधा यवला स्तत्र नकारस्यानुनासिको लकारः। उदः स्थास्तंभोस्सलोपः। उत्थानम्। उत्तंभनम्।
नः सक् छते। नान्तस्य पदस्यावपरे छते सगागमो भवति। राजंश्चित्रम्। भवांस्तनोति। अवपरे किम्। सन्त्सरुः। न प्रशानः। प्रशान्तनोति॥

न्तादंते सकोऽकारस्तूच्चारणार्थः कस्यान्त इत्याकांक्षायां पदस्यान्ते भवति नस्यापदान्तत्वान्नस्यापरान्ते न्सस इत्यनुस्वारः नसस गागमो भवतीति वचने तुन
स्यानुस्वारो न स्यात् सकोनकारस्य भक्तत्वात्॰ नस्य पदान्तत्वाऽनपायात् आगमाः टित्किन्मितस्तेयस्य गु णीभूता यद्गुणीभूताः यस्य विशेषणीकृतास्तद्ग्र
हणेन विशेष्यग्रहणेन कृतत्वात आगमाः आचार्यैर्गृह्यन्ते अभ्युपगम्यन्ते यथा सगागमः पदस्य विहितः पदविशेष्यस्य सगागमो विशेषणं न दग्रहणेन सकूगृ
ह्यते सक्पर्यन्तं पदमित्यर्थः पदस्येति किं हंतिनांतस्येति किं तट्टीकते। छते किं भगवन् कुरु अवपरे छते किं। सन्त्सरुः। खङ्गमुष्टिः। न प्रशानः प्रशानितिनांत
स्य पदस्य सगन्न भवत्यवपरे छते प्रपूर्वात् शाम्यतेः क्विप् नमांतस्योपधाया दीर्घ इत्यनेन दीर्घः मो नो धातोरिति नः नस्यासिद्धत्वान्नलोपो न प्रशाम्यतीति प्रशान्

शेच कु॥ नइत्यनुवर्त्तनेनांतस्य पदस्य च कु स्यात् शे॥ पदस्येति किं दंशः॥ शे इति किं भवान्क्षिणोति॥ चकुवा इत्यत्र वा केसाविव सामर्थ्ये सति इत्युक्तत्वात् जश्त्वाभावः भवानृश्शूर इत्यत्र चगागमस्य कित्वात् पूर्वांतत्वेन चपा च्छः शइति छत्वविकल्पः पक्षेह सामर्थ्यस्य झसस्येति चलोपः नकारस्यानुस्वारपरसवर्णौ इ पदांतत्वात् भवांञ्छूरः भवाञ्च्छूरः भवाञ्श्शूरः भवाञ्च्शूरः ञछौ ञचछौ ञचशौ ञशाविति चतुष्टयं रूपाणामिह चकुछुत्व चलोपानां विकल्पनात् कुर्वंस्तिष्ठ कुर्वंश्च छेते इत्यत्रोऽपदांतनकारस्य स्थानेऽनुस्वारश्चुत्वाभ्यां परत्वात्प्राप्तं णत्वं न। कस्मात् असिद्धं बहिरंगमंतरंगे इति परिभाषया बहिरंगयोः सकुचकोर सिद्धत्वात् अनंतेऽप्यंतरंगे णत्वनिषेधे सति तच्छत्वं स च्छ्रशंभुरित्यादौ चोः कुरिति कुत्वमपि न अंतरंगे कुत्वे कर्तव्ये चुत्व चकोर

शे च कुवा॥ नांतस्य पदस्यावयवे परे शे वा चगागमो भवति॥ भवाञ्छूरः भवाञ्श्शूरः भवाञ्च्छूरः॥ ङ्णो ह्रस्वाद्विः स्वरे॥ ङकारणकारनकारा ह्रस्वादुत्तरा द्विर्भवंति स्वरे परे पदांते च॥ प्रत्यङ्ङिदम्॥ सुगण्णिह॥ राजन्निह॥ ह्रस्वात्किम्॥ प्राङास्ते॥ पदांते किं॥ परमदण्डिनौ॥ छः ह्रस्वात्परश्छकारो द्विर्भवति॥ खसे चपा झसानाम्॥ तवच्छत्रम् नवच्छत्रम्॥ दीर्घाद्वा॥ ह्रीच्छः॥ ॥सिद्धत्वात्कुत्वविधिस्तु वा गम्यं वस्यनीत्याद्यावेकपरस्येत्त्ववर्गैस्सावकाशः चपा च्छः शः अम्वयुक्तात्छसाद्या विन्यादिनिर्देशात् ङ्णो ह्रस्वाद्विः स्वरे॥ ङ्णनानुवर्त्तते ङ्णनः पदांते इत्यनुवर्त्तते ह्रस्वात्परः पदांतेस्थिताः ङ्णना द्विः सुःस्वरे परे ह्रस्वादिति किं प्राङ् आस्ते सुगण् आस्ते भवान् आस्ते॥ ङ्णन इति किं किम् आस्ते॥ स्वरे किं॥ प्रत्यङ्करोति सुगण्वदति पचन्वदति पदांते किं॥ दण्डिनौ ननु समिद्दण्डिना विन्यादौ पूर्वपदस्येव चोत्तरखंडस्यापि प्रत्ययलक्षणेन पदत्वात् नस्याद्वित्वं स्यात् उच्यते उत्तरखंडस्य प्रत्ययलक्षणेन पदांतकार्यं न हेतोर्नोतः वत्विना विन्यादिनिर्देशात् अत एव परमवाचौ॥ परमगोदुहौ परमलिहौ विन्यादौ कुत्वघत्वढत्वादीनि न भवंति॥ ननु अनश्वइत्यादौ नस्याद्वित्वं स्यात् उच्यते अनंते अनपीत्यादिज्ञापनान्न द्वित्वम् छः ह्रस्वादित्यनुवर्त्तते छकारे अकार उच्चारणार्थः तेन विच्छिन्नमित्यादि सिद्ध्यति खसे चपा झसानां

परः छकारो द्विः स्यात्॥ ॥ पदांताद्दीर्घाद्वा पदांताद्दीर्घात्परः छो वा द्विः स्यात् आङ्माङ्भ्यां नित्यं। पदांताद्दीर्घादित्यस्यापवादोयं आङ्माङ्भ्यां परः छो
द्विः स्यान्नित्यं। पुंसोऽवपरे खयेसयोगांतस्य लोपो न। पुंसशब्दस्य सस्य लोपो न भवति अवः परो यस्मात्सः अवपरस्तस्मिन् अवपरे खये संयोगांतस्य लोपः
इति प्राप्तावयं निषेधः। अवपरे किं। पुंक्षीरं। सलोपोत्र। खये किं। पुंदासः। अत्रापि सलोपः ख्याधातौ वा। पुंसशब्दस्य सकारस्य लोपो वा भवति चस्सिडः ख्या
इति ख्याधातौ परे पुंख्यानमिति चास्सिडो युटि रूपं। मोनुस्वारः। पदांते इत्यनुवर्तते पदांते मो नुस्वारः स्यात् हसे परे। पदांते किं। गम्यते। मइति किं। भवान्हस

पदांताद्दीर्घाद्वा। लक्ष्मीच्छाया। लक्ष्मीच्छाया। आङ्माङ्भ्यां नित्यम्। आच्छादयति माच्छिदत्। पुंसोऽवपरे खपे संयोगांतस्य लोपो न। पुं
स्कोकिलः। पुंस्पुत्रः। अवपरे किम्। पुङ्क्षीरम्। खपे किं। पुन्दासः। ख्याधातौ वा। पुंख्यानम्। पुङ्ख्यानम्। मोनुस्वारः। मकारस्यानुस्वारो भ
वति हसे पदांते च। तं हसति पटुं हया। पदांते किं गम्यते हसे किं किमत्र। नश्चापदांते झसे। नस्य मस्य चापदांते वर्तमानस्यानुस्वारो भवति झ
से हकारे च परे। यशांसि। पुम्भ्याम् स्वनडुं हि अपदांते किं। ब्रह्मन्पाहि। झसे किं तन्यते। यमायपेस्य। अपदांते वर्तमानस्यानुस्वारस्य य
मा भवंति यपे परे। अस्य यपस्य सवर्णाः। शान्तः। अङ्कितः। अञ्चितः। कुण्ठितः। गुम्फितः॥

॥ ति हसे किं फलमस्ति। मइत्यत्राकार उच्चारणार्थः अनु
स्वार इति पूर्वाचार्याणां संज्ञा नश्चापदांते झसे। चकारो मकारस्य समुच्चयार्थः अपदांते नस्य मस्य चानुस्वारः स्यात् झसे परे अपदांते किं। भवान्भाति। झसे किं।
मन्यते। यमेत्यादि यमायपेऽस्य। अस्येति यपपरामर्शार्थं अनुस्वारस्यानुवृत्त्यैव लाभात् अपदांते अनुस्वारस्य यमा भवंति यपे परे ते यमा अस्य यपस्य सवर्णा भवंतीत्यर्थः
सानुनासिकस्यानुस्वारस्य सानुनासिका एव यमाः स्युः यमा इति बहुवचनं जातौ। ते यं कुंडं रथेनेत्यत्रानुस्वारस्य पाक्षिको यमो न रकारस्यानुनासिकत्वाभावात् य
पे किं। आक्रंस्यते स्वनडुं हि। अनुस्वारस्येति किं। राजन्गच्छ। गम्यते। अं कपरे लसरो चेति तु रादिन्यंतात् कः सेटोः कक्रवत्वोः त्रिलोप इति त्रैलोपः अनेनानुस्वारस्य ङः अ

किलक्षणइत्यस्माद्यक्तः। नुमोनुस्वारेपरे सवर्णेनङः अङ्कितः। अंचेः पूजायामिडितीट्पूजार्थस्यांचतेर्नैतिनलोपोनअंचितः कुठिप्रतिघातेक्तः नुमोनु स्वारेपरेपरसवर्णेनणः कुण्ठितः शमुउपशमेक्तः शांतादृयोवानिपात्यंतेइतिनिपातनादिड्भावः अमांतस्योपधायादीर्घः क्वाविातिदीर्घः मस्यानुस्वा रेपरेसवर्णेननकारः शान्तः गुंफग्रंथेक्तः मस्यानुस्वारेपरसवर्णेनमः गुम्फितः ननुकुर्वन्तीत्यत्रानेननकारस्यनस्यणत्वंकस्मान्नउच्यते असिद्धं बहिरंगमंतरंगेइतिपरसवर्णस्यासिद्धत्वान्नणत्वं॥ ॥ वापदांतस्य॥ अत्रानुस्वारस्यानुनासिकाएवयमावास्युः क्विबंतेराजनौपरेसमोमस्य मएवमकारस्यमकारवचनमनुस्वारनिवृत्त्यर्थंराजतौकिं। गामादीनांअमस्येतिमलोपेह्रस्वस्येतितुकूसंपत्। समइतिकिं। इदंराट्क्विबंतेइतिकिं

वापदांतस्य। पदांतेवर्तमानस्यानुस्वारस्ययमावाभवंति यपेपरे। अस्ययपरस्यसवर्णाः। त्वङ्करोषि। त्वंकरोषि। नन्तनोति। तंतनोतिसं य्यन्तासंयंतासंवत्सरः संवत्सरः यल्लोकम् यंलोकम्। मोराजिसमः क्वौ क्विबंतेराजतौपरेसमोमस्यमएवस्यात्। सम्राट्। यवल मनपरेहकारेमस्ययवलमनावा॥ किंह्यः किय्ह्यः। किंवह्वलयतिकिंह्वलयतिकिंल्ह्रादयति। किंल्ह्लादयतिकिंम्ह्ललयनिकिंह्मल लयति। किन्न्हुते। किंन्हुते। शसेचपस्यद्वितीयोवा। वत्सरः वथ्सरः। अफ्सरः। अप्सरः। नपदांते। नत्साधुः। कुक्कुट्कुवर्जितस्यविभक्तौ न। भवन्तु। टनोन्सस्यवाधुट्। षट्त्सन्तः षट्संतः सन्त्सः सन्सष्ठः॥

॥संराजितव्य। संराजतेइतिराजृदीप्तौसंपूर्वादस्माद्वर्तमानेक्विपूषत्वडत्वचप। त्वानिसम्राट्यवलमनपरेहकारेमस्ययवलमनवा। यश्चवश्चलश्चमश्चनश्चतेयवलमनाः यवलमनाः परेयस्मात्सः यवलमनपरस्तस्मिन्यवलमनपरेह कारेमस्ययवलमनावाभवंतिह्वलह्मलसंचलनेन्हुङ् अपनयने। शसेचपस्यद्वितीयाः वर्गप्रथमानांद्वितीयाभवंतिशसेपरे। नपदांते। पदांतेस्थितानांवर्ग प्रथमानांद्वितीयानभवंतिकुक्कुट्कुवर्जितस्यचपस्यविभक्तौन। चपस्यविभक्तौद्वितीयानस्युः कुकुट्कोश्चद्वितीयाः स्युर्विभक्तौपरे। टनोन्सस्यवाधुट्टश्चनश्च

राम
१५

श्चयत्वेननकारः ततः शसे चपसेत्यनेन तकारस्ययोनचपत्वस्यासिद्धत्वात् पट्सन्तः॥ ॥ शसे ङ्णोः कुक्टुकौ वा ङकारणकारयोः कुक्टुकावागमौवा
स्तः शसे परे। कुगभावे प्राङ् षष्ठः कुगागमे प्राङ्क्षष्ठः कुको द्वितीये प्राङ् खषष्ठः पकारे परे न्ददन्ननकारस्यनूस्त्वान्द इति न्यस्य नकारस्यन्स् आदेशः स्या
द्यापे परे एकारे अकार उच्चारणार्थः तेनेनन्द्रः पुनाति इत्यादि सिद्ध्यति। स्रोर्विसर्गः। सश्चरश्च स्रौ तयोः स्रोः पदान्ते स्रोर्विसर्गः स्यात् धात्वधातुसाधारणमिदं
अधातोः स्रोर्विसर्गः स्याद्रसे परे पदान्तेच पदान्ते किम् स्यात् ब्रूयात् पयसी वारि। रसे किं चातुर्यं। सुपूप्रत्यये परे रस्य विसर्गो न चतुर्ष्विति निर्देशात् तेन गीर्षु वार्षुपू
र्षु इत्यादि सिद्ध्यति नापेक्षः भार्गवइत्यादौ तु बहिरंगापाद्धे रसिद्धत्वान्नविसर्गः वर्ष्मवर्त्मेत्यादौ कर्तृसाधनयोरिति निर्देशान्नविसर्गः कुप्वोः ᳲकᳲपौ वा आ

शसे ङ्णोः कुक्टुकौ वा। प्राङ् षष्ठः प्राङ्क्षष्ठः प्राङ् खषष्ठः सुगण्साधुः सुगण्टसाधुः पकारे परे न्ददन्ननकारस्यन्स्वा। स्रोर्विसर्गः। सकार
रेफयोर्विसर्गो भवत्यधातो रसे पदान्तेच। कुप्वोः ᳲकᳲपौ वा। कवर्गपवर्गसंबंधिनि खसे परे विसर्गस्य ᳲकᳲपौ वा भवतः। कपावुच्चारण
र्थौ। न्दᳲपाहि न्दःपाहि न्दन्पाहि। इति हससंधिः॥ विसर्जनीयस्य सः। खसे परे। कस्तनोति। शसपरे खसे विसर्जनीयस्य विसर्ग एव। कः त्सरुः
देशनिमित्तयोर्यथाक्रमसमत्वास्ति आदेशे ककारपकारावुच्चारणार्थौ केवलयोर्जिह्वामूलीयोपध्मानीययोरुच्चारणासंभवात् किंच क
कारखकारयोः परतः ᳲकः स्यात् पकारफकारयोश्च ᳲपः स्यात् कुप्वोरिति किं कश्चारः वाग्रहणात्पक्षे विसर्गः। विसर्जनीयस्य स इत्यस्यापवादोयं उपध्मानी
येन्दᳲपाहि विसर्गे न्दःपाहि तदभावे न्दन्पाहि। इति हससंधिः। विसर्जनीयस्य सः विसर्गस्य सकारः स्यात् खसे परे कस्तनोतीत्यत्र विसर्गस्य सत्वे कृते
तस्य पुनर्विसर्गादेशो न। असिद्धत्वाद्विधिर्मर्यादा। शसपरे खसे विसर्जनीयस्य विसर्ग एव। शसः परो यस्मात् स शसपरस्तस्मिन् शसपरे खसे विसर्ज्ज
नीयस्य विसर्जनीय एव भवति न त्वन्यत् यदि तु शसपरे खसे नेत्येवोच्यते तर्हि प्रकृतेः सत्वे निषिद्धेपि ᳲकᳲपौ स्यातां विसर्गवचनात्तु विकारमात्रमपिनिषि

तेनवासः सौमंअद्भिः प्सातमित्यादौ विसर्गएव॥ ॐ॥शर्सेवा।शर्सेपरेविसर्जनीयस्यविसर्जनीयएववाभवतिपक्षेसः कस्सूरः श्चुत्वं।कष्षंडः ष्टुत्वं।खयपरेशर्सेविसर्गलोपोवा।खयः परोयस्मात्सखयपरः तस्मिन्खयपरेशर्से।विसर्जनीयस्यलोपोवाभवतिवाग्रहणात्पक्षेशर्सेवेतिविसर्गसत्वेचैत्रेरूप्यं।हरिस्कुरतिहरिः स्फुरति।हरिस्स्फुरति।वाचस्पत्यादयोनिपातात्सिद्ध्यंति।सिद्धस्वरूपोच्चारणंनिपातस्तस्मादेतेशब्दाःसिद्धिंयांतिवाचः पतिरित्यत्रषष्ठ्या अलुक्निपातनाद्विसर्गस्यसत्वंवाचस्पतिः तत्चौर्यंकरोतीतिरकारस्यसत्वंनिपातनात्तस्करः बृहतांपतिरितिनिपातनात्तकारस्यसत्वंबृहस्पतिः कुनः कुतआगतइत्यत्रत्यतनाविप्यनेनाव्ययात्त्यप्प्रत्ययेप्राप्तेगणपाठसामर्थ्याद्दणप्रत्ययष्टिलोपश्चनिपातनाद्विसर्गस्यजिह्वामूलीयाभावः कौतस्कुतः

शर्सेवा।कश्शूरः।कः श्शूरः।कष्षण्डः।कः षंडः।कस्साधुः।खसपरेशर्सेविसर्गस्यलोपोवा।हरिस्फुरति।हरिः स्फुरति।हरिस्स्फुरति।कुप्वोः कᳲपौवा।कᳲकरोति।कः करोति।कᳲपचति।कः पचति।वाचस्पत्यादयोनिपातात्सिध्यंति।वाचस्पतिः।बृहस्पतिः।तस्करः।कौतस्कुतः।कान्कान्।कांस्कान्।भास्करः।पयस्पात्रम्।यशस्कल्पम्।यशस्कम्।यशस्काम्यति।सर्पिष्पाशम्।सर्पिष्कल्पम्।सर्पिष्कम्।सर्पिष्काम्यति

कान्कानितिअत्रएकः किम्शब्दः प्रश्ने द्वितीयोनिंदार्थेसगागमाभावोत्र।भिन्नार्थत्वात्गणेचाम्रेडितस्येवग्रहणात्कान्कुत्सितान्पश्यसीत्यर्थः कांस्कानितिअत्रआम्रेडितत्वात्पूर्वेनकारस्यसगागमोभवतिनिपातनात्कांस्कान्कान्कान्पश्यतीत्यर्थः कः कइतिकस्कः जिह्वामूलीयाभावोत्रभासः करोतीतिभास्करः जिह्वामूलीयाभावः।कुत्सितंपयइतिपयस्पाशंकुत्सायामितिपाशः ईषन्न्यूनंयशइतियशस्कल्पं।ईषदसमाप्ताविति कल्पः कुत्सितंयशइतिकुत्सितेर्थेकः यशस्कंआत्मनोयशइच्छतीतिकाम्यच्चेतिकाम्यप्रत्ययः।यशस्काम्यतिइत्यादौविसर्गस्यजिह्वामूलीयोपध्मानीयाभावोनिपातनात्कुत्सितंसर्पिरितिसर्पिष्पाशं।ईषन्न्यूनंसर्पिरितिसर्पिष्कल्पंकुत्सितंसर्पिरितिसर्पिष्कंआत्मनः सर्पिरिच्छतीतिसर्पिष्काम्यतिइत्यादौविसर्गस्यषत्वंनिपातनात् ॥ ६॥

नमस्करोति। नमः करोतीत्यत्र विकल्पेन सकारविसर्गौ निपातनात् पुरस्करोतीत्यत्र जिह्वामूलीयाभावः निष्प्रत्यूहं आविष्कृतं दुष्कृतमित्यादौ विसर्गस्य ष
त्वं निपातनात् तिरस्कर्ता तिरःकर्तेत्यत्र विकल्पेन सकारविसर्गौ। द्विर्वा करोतीति द्विष्करोति द्विः करोति त्रीन् वारान् करोतीति त्रिष्करोति त्रिः करोति चतुरो वा
रान् करोतीति चतुष्करोति चतुः करोति द्विः चतुर्भ्य इति सुः चतुर्षु कपालेषु संस्कृत इत्यर्थे अण् द्विगुसमासेऽणो लुक् च। चतुष्कपालः। चतुःकपालः
सर्पिष्करोति सर्पिः करोति धनुः करोति धनुष्करोति इत्यादौ विकल्पेन विसर्गस्य षत्वं विसर्गौ निपातनात् सर्पिषो घृतस्य कुंडिके ति सर्पिष्कुंडिका नित्यं षत्वमत्र अ
यसः कार इत्ययस्कारः अयसः काम इत्ययस्कामः अयसः कुंभ इत्ययस्कुंभः इत्यत्र विसर्गस्य जिह्वामूलीयाभावः अयसः पात्रमित्ययस्पात्रमित्यत्रोपध्मानी

नमस्करोति। पुरस्करोति। निष्प्रत्यूहम् आविष्कृतम्। तिरस्कर्ता। द्विष्करोति। द्विः करोति त्रिष्करोति। त्रिः करोति। चतुष्करोति। चतुः क
रोति। चतुष्कपाल। सर्पिष्करोति। सर्पिः करोति। धनुष्करोति। धनुः करोति। सर्पिष्कुण्डिका। सर्पिः कुंडिका॥ अयस्कारः। अयस्कामः। अयस्कु
म्भः। अयस्पात्रम्॥ अयस्सहिता कुशा अयस्कुशा। अयस्कर्णी। अधस्पदम् शिरस्पदम् आकृतिगणोयम् अविहितलक्षणस्सकारो
वाचस्पत्यादिषु द्रष्टव्यः। रोऽरात्रिषु। अह्नो विसर्जनीयस्य परान्ते रो भवति न तु रात्र्यादिषु अहर्गणः अहरहः अरात्रिषु किम्॥

याभावः अयः सहिता कुशेत्ययस्कुशा वेदे औदुंबर शंकुं कुशेति व्यवहरंति अयो विकारे कुशीति अय इव कर्णौ यस्याः साऽयस्कर्णी नासिकोदरे तीप् इ प
त्यत्र जिह्वामूलीयाभावः पदस्याध इत्यधस्पदं॥ शिरसः पदमिति शिरस्पदम् इत्यत्रोपध्मानीयाभावः आकृत्या स्वरूपेण गण्यते यः स आकृतिगण इति
रोऽरात्रिषु॥ पदान्तेऽहन् शब्दस्य विसर्गस्य रः स्यात् रात्र्यादिवर्जितेषु परतः रात्रिष्विति बहुवचनमादिशब्दार्थं तेन रात्रिरात्ररूपरथंतराणि रात्र्यादयः
अह्नां गण इत्यहर्गणः अह्न इति नस्य सः अहः अह इत्यहरहः वीप्सायां द्वित्वमहश्च रात्रिश्चानयोः समाहारः॥ ६॥ ६॥ ६॥ ६॥

इत्यहोरात्रः समासांतो ऽप्रत्ययो ऽत्र रात्राह्नाहाः पुंसि इति पुंस्त्वम् अहोरात्रिरेषा इदमहरेषा रात्रिरस्तीत्यर्थः प्रशस्तमहरित्यहोरूपं प्रशंसायामिति रूपः। अहोरूपः गुणवाचको रूपशब्दोप्यत्रास्थंतरं साम वेदस्य तद्वा। अहोरथंतरं एषु विसर्गस्य उत्वाननतो ऽत्वापदाने किम् होभ्याम् अतो ऽत्युः आदेवलोपशित्यस्यापवादोयमतः परस्य विसर्गस्य उत्वं स्यादिति अत इति किम् अग्निरत्र न परः किं देवा अत्रासुस्रोतः ३ अत्र इत्याह्ने इति प्लुतः अतीति किं देव इह तपरः किं देव आगतः तिष्ठतु पयः अग्नि हनेत्यत्र गुरोरनृत इति प्लुतः विसर्गस्य उत्वे ओत्वे च एदोतोनत इत्यल्लोपः को ऽर्थः। हवे। अत इत्यनुवर्तते अतः परस्य विसर्गस्य उत्वं स्यात्

अहोरात्रः। अहोरूपम् अहोरथन्तरम्। अतो ऽत्युः। अकारात्परस्य विसर्ज्जनीयस्योकारो भवत्यति परे। को ऽर्थः। हवे। अकारात्परस्य विसर्ज्जनीयस्योकारो भवति हवे परे। देवो याति मनोरथः। आदेवे लोपश्। अवर्णात्परस्य विसर्ज्जनीयस्य लोपश् भवत्यवे परे। देवा अत्र। वा तो वान्ति। देवा इह। स्वरे यत्वम्वा। देवायिह। भोसः। भोस भगोस अघोस इत्येतस्य विसर्ज्जनीयस्य लोपश् भवत्यवे परे। भो हरे भगो नमस्ते अघो याहि। स्वरे यत्वम्वा। भोस भगोस अघोस् विसर्गस्य स्वरे यत्वम्वा भवति। भोयेहि। भगोयेहि अघोयपगच्छतु। नामिनो रः। नामिनः परस्य विसर्जनीयस्य रेफो भवत्यवे परे। अग्निरत्र। पटुर्वक्ता। उषसो बुधे। उषसो विसर्ज्जनीयस्य रेफो भवति बुधे परे। उषः बुधः उषर्बुधः

हवे आदेवे लोपशित्यस्यापवादोयम्। अतः किम्। वायुर्वेयः न परः किं वे धावन्त्यः हवे किम्। देवः पश्यति। आदेवे लोपश् आदिति पंचम्यन्तम्नुतन परत्वं देव औरित्यादि निर्देशात् अवे किं देवाः संति। स्वरे यत्वं वा। लोपश्शो विकल्पेनाऽपवादोयम् अवर्णात्परस्य विसर्गस्य यत्वं वा स्यात् पक्षे लोपश् स्वरे किं रामश्चतुरः। भोसः। भोस भगोस् अघोस् इति सकारांता निपाताः संति तत्र ऽऽ यं ताभ्यां प्रत्याहारो भोस् इति गृहीतः भोस् इति षष्ठ्यंतं भोस भगोस अघोस एषां विसर्गस्य लोपश् स्यादवे किं। भोस्तपस्विनः। स्वरे यत्वम्वा। भोस भगोस् अघोसां विसर्गस्य यत्वं वा भवति स्वरे पक्षे लोपश्। नामिनो रः। नामिन इति किम्। ए
अवे

रेफप्रकृतिकस्य स्वपे वा रेफः प्रकृतिर्मूलकारणं यस्य सः रेफप्रकृतिकस्तस्य रेफप्रकृतिकस्य विसर्गस्य रकारो वा भवति स्वपे परे वाग्रहणात् पक्षे विसर्गोपध्मा
नीयौ अहन् शब्दस्य विसर्गस्य रो रात्रि ष्विति रत्वे विसर्गे च कृते ऽयं विधिः प्रवर्त्तते अहर्प्पतिः अहःपतिः अहᳵपतिः रः षष्ठ्यंतमिदं रेफस्य स्थाने विहितो यो
विसर्ज्जनीयस्तस्य रो भवत्यवे परे अवे किं। प्रातः कालः। रेफप्रकृतिकस्येति किं। रामो नम्यः रि लोपो दीर्घश्चर इति षष्ठ्यंतमनुवर्त्तते रि इति सप्तम्यंतं रो
लोपः स्याद्रेफे परे च कारो विधेययोर्लोपदीर्घयोः समुच्चयार्थः तेन पूर्वस्वरस्य दीर्घश्चरीति किम् प्रातर्वायुः र इति किं मनोरथः। सेषाद्हसे। सश्च एषश्च तयोः
समाहारः सैषं तस्मात् अनञ्समासेऽककारान्सेषात् परस्य विसर्गस्य लोपः स्यात् हसे परे स इति एष इति च॥ कृतात्व सत्वस्य तच्छब्दस्य एतच्छब्द।

रेफप्रकृतिकस्य स्वपे वा। गीः पतिः गीर्प्पतिः गीᳵपतिः अहर्प्पतिः अहः पतिः अहᳵपतिः। रः। रेफसम्बधिनो विसर्ज्जनीयस्य रेफो भव
त्यवे परे। प्रातरत्र अन्तर्गतः रि लोपो दीर्घश्च। रेफस्य रेफे परे लोपो भवति पूर्वस्य च दीर्घः। पुनारमते हरीराजते भानूरम्यः शम्भूराजते।
सेषाद्हसे। सशब्दादेषशब्दाच्च परस्य विसर्ज्जनीयस्य लोपो भवति हसे परे। स चरति एष हसति सशब्दाद्धि सर्गस्य लोप स्वरे।
लोप एव पादपूरणञ्चेत्।

स्य चानुकरणम् अनुकार्य्यानुकरणयोर्भेदेऽर्थवत्वाद्धि भक्तयुत्पत्तौ सत्यां द्वन्द्वे विभक्तिलोपे च कृते नामत्वात् ङसि पर
तः स्मटो भावः द्वन्द्वे सर्वादीनां न सर्वकार्य्यमित्युक्तत्वात् त्रकारात् किम् एषको रुद्रः अनञ्समासे किम् असः शिवः हसे किम् एषोत्र॥ सशब्दा
द्धि सर्गस्य लोपः स्वरे लोप एव पादपूरणं चेत् स इति शब्दस्य विसर्गस्य लोपः स्यात् स्वरे परे चेद्यदि लोपे सत्येव पादः पूर्य्येत पादः श्लोकचतुर्थांशः इ
तिपादपूरणमिति किं स एवमुक्त्वा लोपश्चेत्यवधारणादन्यथा पादपूरणे लोपो न सो हमाजन्मशुद्धानामिति॥ ५॥ ॥६॥ ७॥ ८ ॥९।

सएषरामोस्ति। कीदृशः दशरथस्यापत्यं दाशरथिः। अतइञ् अनृषेरितीञ्। सएषयुधिष्ठिरः कीदृशः राजतेइतिराजा सएषकर्णः कीदृशो महांश्चासौत्या
गश्च महात्यागः महात्यागोस्ति यस्य सः महात्यागी मानोपधाद्वेति विनाविनीन् सएषभीमः कीदृशो महांश्चासौ बलश्च महाबलः महाबलोऽस्ति यस्य सम
हाबलः अइकौ चेन्यः प्रत्ययः ५ इतिविसर्गसन्धिः ५॥ अविभक्तिनाम॥ विभक्तेरन्यदित्यविभक्ति अन्यच्छब्देन शब्दरूपंविशेष्यं गृह्यते तत्क्लीबेनस्य
विशेषणमिदं सूत्रे विभक्तिशब्देन तं त्रादिना विभक्तिः विभक्त्यंते चेत्युभयमुच्यते विभक्तिशब्देन सहनञ् तत्पुरुषो नञ् तु द्विधा तथाहि द्वौ नञौ तौ
समाख्यातौ पर्युदासप्रसज्यकौ पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत् १ प्राधान्यंतु विधेर्यत्र प्रतिषेधेप्रधानता पर्युदासः सविज्ञेयो यत्रोत्तरपदेनन
ञ् २ अप्राधान्यंविधेर्यत्र प्रतिषेधे प्रधानताप्रसज्यस्तु सविज्ञेयः क्रियया सहयत्रनञ् एवंहि विभक्तिभिन्नं विभक्त्यंतभिन्नमर्थवच्छब्दरूपं संज्ञितिनाम

सैषदाशरथीरामस्सैषराजायुधिष्ठिरः सैषकर्णोमहात्यागी सैषभीमोमहाबलः॥ इतिविसर्गसन्धिः॥ अविभक्तिनाम॥ ६॥

च संज्ञा विभक्त्यंतं न भिन्नमिति कथनेन धातूनां व्यावृत्तिः कृता तेषां तिबादिविभक्त्यंतत्वात् तच्छब्दरूपम् नामप्रातिपदिकमुच्यते कीदृशं तत् अविभक्ति प
र्युदासोऽयम् गृह्यते विभक्तिसदृशं विभक्तिभिन्नमित्यर्थः विभक्तिसदृशमिति कथनेनार्थवदेवागतं पुनः कीदृशं विभक्त्यंतभिन्नमिति कथनेन धातुवर्जि
तमित्यागतं पुनः कीदृशमर्थवत् अत्रार्थशब्दोऽभिधेयवचनः न तु धननिवृत्तिप्रयोजनवचनः यथार्थवान् धनवानित्यर्थः मशकार्थो धूमः मशकनिवृत्त
येइत्यर्थः कोर्थः किंप्रयोजनमित्यर्थः तत्राभिधेयं तु चतुर्विधं जातिगुणक्रियाद्रव्यभेदात् जातिशब्दाः यथा गौः अश्वइत्यादयः गुणशब्दो यथा शुक्लः कृष्ण
इत्यादयः क्रियाशब्दा यथा पाचकः गंतेत्यादयः द्रव्यशब्दा यथा डित्थः कपित्थ इत्यादयः ननु वंध्यापुत्राभावशशविषाणगगनकुसुमादीनामर्थाऽभावा
देषां नाम संज्ञा न स्यादिति चेदुच्यते अभावोपि पदार्थांतरं तेनाभिधेयत्वात् भावशब्दस्य सिद्धा संज्ञा वंध्यादिशब्दार्थः पुत्रादिशब्दार्थश्च प्रसिद्ध एव तयोः संस
व

॥ विभक्तिरहितमिति किं हरिषु करोषि सुप् सिपोर्मा भूत् पदादित्वात्तस्य षो न स्यात् विभक्त्यंतरहितमिति किं न्दे वौ भवंति अत्र ह्नित्वाद्यनभिधानेप्यऽव्य
यादिवच्चेकवचनं स्यात् धातुवर्ज्जितमिति किं। महन्नित्यत्र नाम्नो नो लोप शित्यनेन लोपश्च स्यात् अहन्नित्यत्रा ह इत्यनेन सत्वं तु न तस्य लाक्षणिक
त्वात् अर्थवदिति किं धनवनमित्यादौ प्रतिवर्णसंज्ञा मा भूत् अत्र वार्त्तिकं कृत्तद्धितसमासाश्चेति चकारोऽनुक्तसमुच्चयार्थः तेन निपातस्यानर्थक
स्य प्रातिपदिकसंज्ञा वक्तव्येति। तस्मात् इत्यधिकारोयं धातोरित्यतः प्राक् स्यादयोऽणादयश्च प्रत्ययानाम्नः परास्युः तस्मादिति पंचमीयं न विश्लेषा व
धौ विश्लेषस्यासंभवात् किन्तु ऋते आदिषु दिक्शब्द पाठाद्दिग्योगलक्षणा पंचमी तत्र परः पूर्वो वा इत्यनियमेनाऽध्याहारे प्रसक्ते बहुर्वा उक्तेर्थे स च
प्रयोगेवेत्यनेन वह्नोः पूर्वत्व स्यानियतत्वादन्यः प्रत्ययः पर एवेति परशब्दोऽध्याहार्यः। सिऔजस् १ अम् औशस् २ टाभ्यांभिस् ३ ङे भ्यांभ्यस् ४ ङ

विभक्तिरहितं धातुवर्ज्जितं अर्थवच्छब्दरूपं नामोच्यते तस्मात्। सि· औ· जस्· अम्· औ· शस्· टा भ्याम्· भिस्· ङे· भ्याम्· भ्यस्· ङ
सि· भ्याम्· भ्यस्· ङस्· ओस्· आम्· ङि· ओस्· सुप्· नाम्नः परास्स्यादयस्सप्तविभक्तयो भवन्ति एकत्वद्वित्वबहुत्वेषु एकवचनद्वि
वचनबहुवचनानि

सिभ्यांभ्यस् ५ ङस् ओस् आम् ६ ङि ओस् सुप् ७ सिप्रत्ययस्येकारोऽन्त्यसोः सा विन्यादौ विशेषणार्थः जस्शसोर्जकारशकारौ जसी
शसीत्यनयोर्विषयविभागार्थौ टाप्रत्ययस्य टकारः टेन टाना टौ सो टाङ्योरित्यादौ भेदकः ङे ङ सि ङस् ङीनामूङ्कारस्तु ङितीत्यादौ विशेषणार्थः ङसे
रिकारो ङसिर इति विशेषणार्थः सुप् प्रत्ययस्य पकारः प्रत्याहारार्थस्तेन सिप् प्रत्याहारो यथा स्यात् स्यादित्यादि भेदतो विभक्तिर्द्विधा तत्र सिऔज
सित्यादीनां सप्तानां त्रिकाणां प्रथमादयः सप्तसंज्ञाः प्राचां संज्ञास्ताभिरिहापि व्यवहारस्तेषु त्रिकेषु त्रीणि त्रीणि वचनानि एक शः एकवचन द्विवचन
बहुवचनसंज्ञकानि संति एकत्वद्वित्वबहुत्वेषु एकत्वद्वित्वबहुत्वशब्दाः इह संख्यापराः संति तेन बहुः पर्वत इति वैपुल्यवाचिनो ग्रहणं न ॥ ६ ॥

आश्रयद्रव्यगतेषु एकत्वद्वित्वबहुत्वेषु सत्सु एकवचनद्विवचनबहुवचनसंज्ञकाः प्रत्यया भवन्ति उच्यते ऽनेनेति वचनं एकस्य वचनमेकवचनं द्व
योर्वचनमिति द्विवचनं बहूनां वचनमिति बहुवचनं सरूपाणामेकशेष एकविभक्तौ एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते रू
प्यते बोध्यते ऽनेनेति रूपमर्थः समानं रूपं येषां ते सरूपाः सहादित्वात्समानस्य सादेशः तथा समानं रूपं स्वरूपं येषां ते सरूपाः सरूपाश्च सरूपाश्चेति स
रूपास्तेषामित्येकशेषेण व्याख्यानम् एकविभक्ताविति विभक्तिसारूप्ये उपलक्षणं नत्वेकशेषे निमित्तं एवं चानैमित्तिकत्वेनान्तरङ्गोप्येकशेषः सामुत्पत्तेः
प्रागेव प्रवर्त्तते यद्येतन्नारभ्येत तर्हि प्रत्येकं विभक्तिः स्यात् द्वंद्वश्च प्रवर्त्तेत आरब्धे त्वेकशेषो भवति न तु द्वंद्वः अनेकपदाभावात् ननु सामुत्पत्तेः प्रागेक
शेषप्रवृत्तौ शिष्यमाणयन्त्रोति पदे कृते तदेकमेवार्थं बोधयतीति द्विवचनाद्युत्पत्तौ देवौ देवा इत्यादि न सिध्येत् उच्यते शिष्यमाणो लुप्यमानार्थं कथयति एक

स्त्वो द्विसर्गाः। देवः देवौ। जसोजकारोजसीति विशेषणार्थः। देवाः॥ ३॥ अमृशसोरस्य। समानादुत्तरयोरम्शसोरकारस्य लोपो भवति। दे
देवम्। देवौ। शसस्शकारश्शसीति विशेषणार्थः। सोनः पुंसः। पुल्लिङ्गात्समानादुत्तरस्य शसस्सकारस्य नकारादेशो भवति नत्वाम्शसौ

शेषस्य वृत्तिषु पाठात् परार्थाभिधानं वृत्तिरिति अत एव लुप्तेपि प्रत्यये लिट् धुक् इत्यादौ कर्ता प्रतीयते एकस्यां विभक्तौ परतः सरूपाण्येवेति किं मातृशब्द
योर्जननी परिच्छेत्तृवाचिनोर्नैकशेषो भवति मातृभ्यां मातृभिरित्यादौ सारूप्येपि औजसादिषु वैरूप्यान्नत्वेवं पयः १२ पयो २१ नयति देवदेवदृत्या द्वावति
प्रसंगः स्यादिति अधातोरिति चानुवर्त्तते सह विवक्षायामेकशेषः प्रवर्त्तते इतरेतरयोगे द्वन्द्वस्य विषये इत्यर्थो नान्यत्र॥ अमृशसोरस्य समानाद्वेर्लोपोऽधा
तोरित्यतः समानादिति लोपइति अधातोरिति चानुवर्त्तते अधातोः समानात्परयोरम्शसोरकारस्य लोपः स्यात् अधातोरिति किम् श्रियं भुवमित्यादावियुवौ से
नान्यरवल्लप्वमित्यादौ प्वौ सोमपामित्यादौ सवर्णे दीर्घः समानादिति किम् रायं ग्लावं सोनः पुंसः पुंल्लिंगात्समानान्तान्नाम्नः परस्य शसः सस्य नः स्यात् शसइत्यनुवृ

पंचमीपुल्लिंगात्समानांतान्नाम्नइति।पदातुलिंगंप्रत्ययार्थस्तदापुंसइतिषष्ठीसमानांतान्नाम्नः परस्यपुंसोवाचकस्यशसःसस्यनःस्यादितिउक्तंचाएकंद्विकं त्रिकंचाथचतुष्कंपंचकंतथा।नामार्थाइतिसर्वैमी पस्याःशास्त्रेनिरूपिताः१ इतिस्वार्थद्रव्यलिंगसंख्याकारकात्मकः पंचकोनामार्थःउक्तपंचसुपूर्वस्यपूर्वस्य नामार्थत्वेपरःपरोविभक्त्यर्थोज्ञेयः शब्दप्रवृत्तिनिमित्तंस्वार्थोस्तिस्वार्थश्चानेकविधःस्वरूपजातिगुणक्रियाद्रव्यसंबंधभेदात् स्वरूपंयथाडित्थः यदाशब्द रूपेणविशिष्टाजातिःकथ्यतेगौरितितदागोशब्दस्यस्वरूपंस्वार्थोस्तिविशेषणत्वात् जातिस्तुद्रव्यंभवतिविशेष्यत्वात् यदाजात्याविशिष्टोगुणःकथ्यतेपट स्यशुक्लोगुणइतितदाजातिःस्वार्थोभवतिविशेषणत्वात्शुक्लगुणोद्रव्यंभवतिविशेष्यत्वात् यदागुणेनविशिष्टंद्रव्यं कथ्यतेशुक्लःपटइति तदाविशेषण भूतोगुणःस्वार्थोभवतिविशेष्यभूतंपटादिकंद्रव्यंभवति यदातुद्रव्यमपिद्रव्यांतरस्यविशेषणंभवतियष्टीःप्रवेशयेत्यादौतदायष्ट्यादिकंद्रव्यंविशेष णत्वमापन्नंस्वार्थोभवतिपुरुषादिविशेष्यंद्रव्यंभवतिदंडीत्यादौदंडपुरुषसंबंधःस्वार्थोभवतिदंडीतिद्रव्यंविशेष्यम् भवतिपाचकइत्यादौक्रियास्वा

॥शसि।शसिपरेपूर्वस्यदीर्घोभवति॥

र्थोभवतिपुरुषोद्रव्यंभवतिकिंचशब्दस्ययत्रविश्रांतिवाच्यंद्रव्यंतदिष्यतेपर्यवसानभूमिरित्यर्थः तच्चानेकप्रकारंजातिर्गुणःक्रियाद्रव्यंस्वरूपमिति गौःशुक्लःपाचकःडित्थःसिसनासीस्यपामिट्लिङ्गंस्त्रीत्वादिसंख्याएकत्वादिःकर्मादयःकारकविशेषास्तत्रस्वार्थोविशेषणंद्रव्यंतुविशेष्यमितितिर्ग लितार्थःआम्शसोतिसूत्रेणौकारस्यानेआत्वेकृतेसतिसोन पुंसइत्येतत्सूत्रंनप्रवर्ततेइत्यर्थःकुतोलब्धउच्यते पदविभागात् यथास १ओ २ न् ३ अः ४ पुंसः ५ इतिपंचपदानिछित्वापुल्लिंगात्समानान्तस्यसःसस्यन्स्यात् ओकारसंबंधिनोऽवर्णात्तुविसर्गःस्यादितिव्याख्येयम्नोगाःपश्येत्यादौनत्वंनपुल्लिंगा दितिकिम्बुद्धीःसमानादितिकिंरायःग्लावःलोप विषयेएवास्यप्रवृत्तिसमानादम्शसोरत्वापस्यानिषेधात् अतएवबहुशइत्यत्रनत्वंनस्याद्यधिकाराद्वा शसिदीर्घश्चुत्योपस्थितस्यस्वरस्येति पदस्यनाम्नोविशेषणत्वात्तदंतविधिःपूर्वस्यस्वरांतस्यनाम्नोदीर्घःस्यात्॥ःः॥शसिपरेसानःपुंसइतिनत्वेदीर्घत्वंपूर्वंनत्वंततो

वैपरीत्यं वा ज्ञेयं॥ शसि किं॥ महर्षिभिः स्वरस्य किम्॥ लिहः ननु इह शसः परत्वाभावात्कथं दीर्घः उच्यते षष्ठ्यास्थाने आदेशो यदादेशः स तेन स्थानिना तुल्यं न
हत्स्थानिवद्भवतीत्यर्थः स्थानिवर्णाश्रयविधौ कर्तव्ये न भवति अस्य व्याख्यानं परिभाषाप्रकरणे उक्तम् तेन पदद्वयमपि प्रथमांतं संकेतितं अतः पर
शाइनः स्यात् अतः किं कर्त्राभवनात्परः किं हाहाटाकिम् देवैः अद्भि अकार आकारो भवति भादौ स्यादौ अदिति किम् हरिभ्याम् तपरत्वमुत्तरार्थं भीतिकिम्
देवभवनं बहुत्वे तु परत्वादेत्वं भवति देवेभ्य इति॥ भ्यः एस्मि बहुत्वे इत्यस्यापवादोयं भूमि अ इति पदच्छेदो भिइत्येकदेशद्वारेण भिस एवानुकरण अ
त इत्यनुवृत्तम् अतो भिस ऐः अकारस्याकारः स्यात् स्याद्यधिकारात् स्यादिसंबंधी भिस गृह्यते तेन ब्राह्मण भिस्सेत्यादौ नातिप्रसंगः ङेः अक् ङे इत्यविभक्तिको

यद्यादेशस्तद्वद्भवति ननु वर्णमात्रविधौ॥ देवान्॥ टकारश्चेनेति विशेषणार्थः॥ टेन अकारात्परष्टाइनो भवति देवेन॥ अद्भि॥ अकारस्या
त्वम्भवति भकारादौ स्यादौ॥ देवाभ्याम्॥ भ्यः॥ अकारान्तरस्य भिसो भकारस्याकारादेशो भवति॥ देवैः॥ ङ कारो ङि त्कार्यार्थः॥ ङे रक्॥ अका
रान्परस्य ङे इत्येतस्यागागमो भवति॥ देवाय॥ देवाभ्याम्॥ एस्मि बहुत्वे॥ अकारस्यैत्वम्भवति सकारभकारादौ विभक्तौ बहुत्वे सति॥ देवेभ्यः
॥ ङसिरत्॥ अकारान्परो ङसिरद्भवति॥ देवात् देवाभ्याम् देवेभ्यः॥

॥ निर्देशः अतो ङे इत्यस्याकू स्यात् कित्वादंते अनइत्यनुवृत्तेर्नेह वातप्र
म्येत परत्वान्नेह हाहे अथ अकि कृते एदोतो त इत्यकारस्य लोपश्च तुन विधानसामर्थ्यादपदांतत्वाद्धान हि अकि कृते एतः पदांतत्वं संभवतीति एस्मि बहुत्वे अ
कारस्यैकारो भवति बहुत्वे वर्तमानेषु सकारभकारादिषु स्यादिषु परेषु अकार इति किम् हाहाभ्यः बहुत्वे किं देवस्य स्यादिष्विति किम् पचध्वम् ङसिरत् अदंतान्ना
म्नः परो ङसिरत् स्यात् अतः किं वातप्रम्यः ग्लावः तपरः किं हाहाः॥ ननु ङसे रदादेशे कृते यस्य लोप इत्यतो लोपः स्यादुच्यते स्यादौ यस्य लोप इत्यस्याभावो ज्ञापि
तो ऽकारविधाने नान्यथा ङसिस्तस्त इत्येवावक्ष्यत् यद्यानद्धित प्रकरणादौ पीतिसूत्रारंभाच्च नात्र यस्य लोपः देवादित्यत्र वावसाने इति जवत्त्वपक्षे हसे ऽहे सः इतिदतयो॥

।ई८५॥

ङस्यस्याऽनो ङस्सः स्यात् अन इति किं वा तप्रम्यः तपरः किं हाहाः ओसि अत एकारः स्यात् ओसि परे अ दिति किं हयोः स्तपरः किं हाहो ओसि किम् देवस्यानु
डामः आमो नुडिति कर्तव्ये नुटः पूर्वोच्चारणे प्राथम्यार्थं यत्र नुड्ङ्यच्च प्राप्नोति तत्र प्रथमं नुडेव भवति तेन स्त्रीणां वारिणामित्यादावुभयप्रसंगे परत्वपीप्
नुमौ बाधित्वा नुडेव अत एव प्राक् प्रायशो हृस्वनामित्युक्ते वा तत्र नुटा क्वचित्पूर्वेणापि परस्य बाधः क्रियत इति तदर्थः किंच मंडूकप्लुत्या ङ्गाणो हृस्वा
दिति स्त्रत्रात् हृस्वादिति पदं पुंसइ तिचात्रानुवर्त्यवाक्यभेदेन संबध्यते समानादित्यनुवृत्ते समानां नाम्नः आमो नुट् स्यात् पुल्लिंगे तु हृस्वसमानां
तानू नाम्नः एव परस्यामो नुट् नदीर्घांतान्नाम्न इत्यर्थः समानादिति किं रायां भवतां हृस्वानातू पुंसइति किम् हाहामू वा तप्रम्यां नाम्न इति किम्। का

ङस्य। अकारात्परो ङस्योभवति देवस्य ओसि अकारस्यैत्वम्भवति ओसि परे। देवयोः। नुडामः। समानादुत्तरस्यामो नुडागमो भव
ति पुंसि तु हृस्वादेवानामि नामि परे पूर्वस्य दीर्घो भवति देवे। देवयोः। क्विलात्षः सः क्रुतस्य। कवर्गादिलाच्च प्रत्याहारात्परस्य केन
चिन्हत्रेणाकृतस्य सकारस्य षकारादेशो भवति अन्ते स्थितस्य न भवति हरिस्तत्रेत्यादौ। देवेषु॥

॥रयां च कारप च तित्तरामित्यत्रत्वका
रानुबंधभामृत्तेपस्तेन न नुट् निरनुबन्धकग्रहणे न सानुबन्धकस्येति वचनात् ङेरादेशस्याम स्तु न नट्परत्वेनाङः ष्ङ्भ्यांबाधनात् स्त्रियामित्यादि
निर्देशाच्चानामि। पूर्वस्यस्वरांतस्य नाम्नो दीर्घः स्यात् नुट्सहिते आमि परे नुम् सहिते आमि तु नदीर्घो भवति यदि हि नुम् सहिते आम्यपि दीर्घः स्यात् र्हि नुम
बाधित्वा नुड्विधानं व्यर्थं स्यात् नुम् चिरतृज्वद्भावेभ्यो नुट् पूर्वं विप्रतिषेधेनेत्युक्तत्वात् नुट्सहित एव नाम गृह्यते क्विलात्षः सः कृतस्य कुश्च इलश्चानयोः समा
हारः क्विलं तस्मात् क्विलात् क्रियते स्म विधीयते स्मेति कर्म्मणि क्तः कृतो विहितः तस्य कृतस्य शास्त्रेण विहितस्येत्यर्थः सइति षष्ठ्यंतेषइति प्रथमांत मकारोच्चारणा
र्थः क्विलात्परस्य कृतस्यादेशरूपस्य प्रत्ययावयवस्य च सः स्यानेषः स्यात् प्रुर्नाणोनंनेइत्यतोऽनंतेइत्यनुवर्तनेनेनपदांते स्थितस्य सस्यषत्वं न क्विलात् किं देवस्य कृत

इसिकी फुंकौ किंवदासिमयसभवर्तयोरेत्र यासि द्विवासिन्दिसि द्वित्रितीतिनि किरियत

सिर्द्दिः आमंत्र्यते प्रसन्नं क्रियतेऽनेनेत्यामंत्रणं साधने युट् आमंत्रणे किम् रामः सन्यः। सिः किम् रामे। समानाद्धेर्लोपोऽधातोः ङ एतो ह्रस्वादित्यतो मंडूकप्लुत्या
ह्रस्वादिति पदं एदोतोनोत इत्यत एदोत इति चानुवर्त्तते। ह्रस्वसमानान्तादेदोदन्ताच्च नाम्नः परस्य धेर्लोपः स्यात् ह्रस्वसमानान्तादिति किम्। हे हाहाः हे वातप्रमीः
अधातोरित्युत्तरार्थम् एदोत इति ग्रहणं किम् हे हरे हे विष्णो। अत्र हि परत्वान्नित्यत्वाच्च धाविस्यनेनैदोतोः कृतयोर्ह्रस्वान्तत्वं नास्ति अभिमुखस्य भाव
आभिमुख्यं सम्मुखीकरणम् आभिमुख्यस्याभिव्यक्तिः प्रकटीकरणम् आभिमुख्याभिव्यक्तिस्तस्यै नाम्नः प्राक् हे शब्दस्य प्रयोगोऽर्थतः शब्दतो वा योज्यः
सर्व विश्व उभ उभय· अन्य· अन्यतर इतर डतर डतम कतर कतम सम सिम त्वत् त्वाभवतु। नेम। एक। पूर्व। पर। अवर। दक्षिण। उत्तर। अपर। अधर। स्व

सिर्द्धिः। आमन्त्रणेऽर्थे सिर्द्धिसञ्ज्ञको भवति। समानाद्धेर्लोपोऽधातोः। ह्रस्वान्तसमानादेदोतश्चोत्तरस्य धेर्लोपो भवत्यधातोः॥ आभिमुख्याभिव्यक्तये हे शब्दस्य प्राक् प्रयोगः। हे देव। हे देवौ। हे देवाः। एवं घटपटरामकृष्णमुकुन्दादयः सर्व्व· विश्व उभ· उभय· अन्य· अन्यतर· डतर· डतम· सम· सिम· त्वत्· त्व· भवतु· नेम· एक· पूर्व· पर· अवर· दक्षिण· उत्तर· अपर· अधर· स्व· अन्तर· त्यद्· तद्· यद्· एतद्· इदम्· अदस्· द्वि· किम्· युष्मद्· अस्मद्· एते सर्व्वादयस्त्रिलिङ्गाः॥

॥ अंतर त्यद्। तद्। यद्। । एतद्। इदम्। अदस्। द्वि। किम्। युष्मद्। अस्म
द्। एते पंच त्रिंशच्छब्दाः त्रीणि लिंगानि येषां ते त्रिलिंगाः सर्वादिसंज्ञका ज्ञेयाः गणसूत्रमिदम् आदिशब्दोऽत्रावयववाची सर्व आदिराद्यवयवो येषां ते स
सर्वादयः तद्गुणसंविज्ञानोऽयं बहुव्रीहिस्तस्यान्यपदार्थस्य गुणानां विशेषणानां वृत्तिपदार्थरूपाणां कार्येऽन्वयितया संविज्ञानं यस्मिन् स तद्गुणसंवि ज्ञा
न इत्यस्यार्थः आदिशब्दस्यावयववाचित्वाद्भूतावयवभेदः समुदायः समासार्थः इति बहुवचनं तस्य च युगपदुत्पत्तेः प्रयोगाभावात्तदंगेष्विति न्यायेन तद
वयवेषु प्रवर्त्तमाना सर्वादिसंज्ञाऽविशेषात्सर्वशब्देऽपि वर्त्तते इति युक्तम् तद्गुणसंविज्ञानत्वं संयोगसमवायान्यतरसंबंधेऽलंबकर्णमानयेत्यादौ तद्गुणसंवि

भावसंबंधेनुचित्रगुमानयेत्यादावतद्गुणसंविज्ञानत्वेनतदंतस्यापीयंसर्वादिसंज्ञाभवतिद्वंद्वेसर्वादीनांसर्वकार्य्यनेतिज्ञापकात् संज्ञोपसर्जनीभूतेषुसर्वा
दिषुसर्वादिसंज्ञानप्रवर्त्तते मुख्यामुख्ययोर्मुख्येकार्य्यसंप्रत्ययोनाऽमुख्येइतिन्यायात् मुख्योहिलोकप्रसिद्धोऽर्थः तत्रसर्वविश्वशब्दौकृत्स्नपर्यायौ २
उभशब्दोद्वित्वविशिष्टस्यवाचकोऽतोनित्यंद्विवचनांतः।ननुउभस्यसर्वनामत्वेकोर्थइतिभाष्यकारप्रयोगोविरुध्येत।उच्यतेअर्थपरस्यैवनित्यंद्विवचनांत
तानतुस्वरूपानुकरणस्येति अथसर्वादिषुउभशब्दपाठोव्यर्थः सर्वादिकार्य्याणांस्मडादीनांद्विवचनेऽभावात् उच्यतेसर्वादिगणेउभशब्दस्यपाठस्तुउभकावि
तिरूपसिद्ध्यर्थः तथाहिउभशब्दस्तावद्द्विवचनमात्रविषयः जित्स्वरितेतउभेइतिलिंगात् समासतद्धितादौतुद्विवचनंलोपेनासौप्रयुज्यतेऽनभिधानात्।
द्विवचनलोपेतुउभशब्दाद्धितविषयेस्वार्थेनित्यमयट्भवति।उभयोन्यत्रेति अन्यत्रद्विवचनपरत्वाभावइत्युक्तत्वात् तेनउभयत्तःउभयत्र उभाभ्यापक्षाभ्यां
विनीतानिद्रायैस्तेइतिविग्रहेउभयपक्षविनीतनिद्राइत्यादिप्रयोगवत् कप्रत्ययेप्यट्प्राप्तःअयटिसति उभयकावितिरूपापत्तिःस्यात् तन्निवारणार्थःसर्वा
दिषूभशब्दस्यपाठः तेनाकच्यात्ताव्ययसर्वादेष्टेःप्रागऽकचइत्यऽकच्प्रत्ययेउभकावितिसिध्यति तद्धितस्यमध्यपतितत्वेनद्विवचनपरत्वानपायात् ३ उभय
शब्दस्तुअवयववृत्त्यारब्धोऽवयविनिवर्त्ततेउभाववयवौयस्यसउभयःसंख्यायाअवयवेतयड्‌यटावित्ययट्ननुद्वयेषामपिमेदिनीभृतामितिमाघप्रयोगः
कथंसंगच्छतेतस्यसर्वादित्वाभावादुच्यतेद्वयंद्वैधमिच्छंतिगच्छंतीतिद्वयेपक्षेतेषांद्वयेषामितिद्वयेः किंवतस्यरूपम् ४ अन्यशब्दोभिन्नार्थः ५ अ
न्यतरशब्दोऽव्युत्पन्नःस्वभावात्द्विविषयेनिर्द्धारणेस्ति ६ इतरस्त्वन्यनीचयोः ७ डतरडतमौप्रत्ययौयद्यपिसंज्ञाविधौप्रत्ययग्रहणेतदंतग्रहणंनास्तिवि
भक्त्यंतेपदमितिज्ञापकात् तथापीहतदंतग्रहणंयेभ्योडतरडतमौविहितौतेषांतदंतानांग्रहणमित्यर्थः केवलयोःसंज्ञायाःप्रयोजनाभावात् कतरक
तमयतरयतमादयस्तदंताः द्वयोर्बहूनांचैकस्यनिर्द्धारणेइतिडतरडतमौ ९ समशब्दःसर्वपर्यायस्तुल्यपर्यायस्तुनेहगृह्यते १० सिमःकृत्स्नेचश
केचस्यान्मर्यादावचद्वयोः ११ त्वतत्वशब्दावन्यपर्यायौआद्यस्तांतएतस्यपाठोऽकार्थः १२ भवतुशब्दस्तुभवदर्थःउणादौभातेर्डवतुप्रत्ययांतउकारा
नुबंधोव्युत्पादितःआसर्वादेरित्यात्वमकप्रत्ययश्च

पू. सि. चं. टी. सु. २२

प्रयोजनमस्यभवाद्वक्ष्भवकान् १४ नेमशब्दोऽर्द्धवाची १५ एकोन्यार्थे प्रधानेचप्रथमेकेवलेतथा साधारणेसमानेऽल्पेसंख्यायांचप्रयुज्यते १५ संख्याया
मेकवचनांतः १७ पूर्वपरावरशब्दा दिग्देशकलवाचकाः सर्वादिसंज्ञकाः १९ दक्षिणशब्दस्तुदिग्देशवाचकः सर्वादिःनतुप्रवीणवाची २० उत्तरपरशब्दौदि
ग्देशकालवाचिकौ सर्वादी २२ अधरस्तुदिग्देशवाचकस्सर्वादिः स्वोज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वोऽस्त्रियांधनेइत्यमरःस्वःस्यात्पुंस्यात्मविज्ञातेत्रिष्वा
त्मीयेऽऽस्त्रियांधनेइतिमेदिनीइतिचत्वारोऽर्थाःस्वशब्दस्यतत्रात्मीययोरेवसर्वादित्वम् २४ अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्येछिद्रात्मीयविनाबहिर
वसरमध्येंतरात्मनिचेत्यंतरशब्दस्यार्थास्तत्रपरिधानबहिर्योगयोरेवसर्वादित्वम् २५ त्यदतदौशब्दौपूर्वोक्तपरामर्शकौ २७ यद्शब्दउद्देश्यसमर्थकः २९
एतद्इदमौशब्दौप्रत्यक्षोपस्थितवाचकौ ३० अदसशब्दस्तुव्यवहितवाचकः उक्तंचइदमस्तुसन्निकृष्टंसमीपतरवर्त्तिचैतदोरूपंअदसस्तुविप्रकृष्टंतदि

जसी। सर्वादेरकारान्तात्परोजस ईर्भवति। सर्वे॥ ष्ठुर्नोणोऽनन्तेषकाररेफऋवर्णेभ्यः परस्यनकारस्यैकपदस्थस्यणाकारादेशोभवत्य
न्तेस्थितस्यनभवति सर्वाणिनामादि॥

ति परोक्षे विजानीयादिति ३१ द्विशब्दोद्वित्वविशिष्टवाचकः ३२ किम्शब्दःप्रश्नेआक्षेपेच ३३ अलिंगःसंबो
धनेकविषयकश्चयुष्मदर्थः ३४ अलिंगउच्चारयितृर्थोस्मच्छब्दः ३५॥ ॥ जसीअदंतात्सर्वादेर्जसईः स्यात्षष्ठ्याअविधानात्नातस्यायमादेशोभवतिनि
र्दिश्यमानस्यादेशाभवंतीतिन्यायेनजसइत्यस्यसर्वस्यैवस्थानेआदेशः यद्वाजसीत्यत्रदइइति प्रश्लेषेणगुरुत्वात्सर्वादेशेअन्यथादीर्घग्रहणस्यप्रयोज
नाभावात् यद्वाऽस्यत्रदीर्घस्यप्रयोजनंद्वितीयइकारः प्रथमचरमादिभ्योपिविध्यर्थः ननुअकारमाश्रित्यजातईकारःकथमेतद्रूपेणाकारस्यविघातकः
स्यात् उच्यते उभयइतिनिर्देशेनसन्निपातपरिभाषायाअनित्यत्वाऽभ्युपगमादविघातकोभवतीत्यर्थः ष्ठुर्नोणोनंतेषुचरस्चआचएषांसमाहारःषृतस्मात् षुःसं
ज्ञापूर्वकत्वेनानित्यत्वात्यामिनःस्वरइतिनतुम् अनंतेइत्यत्रनञ् प्रसज्यप्रतिषेधएवअंतशब्देनपदांतएवगृह्यतेननुवाकांतःव्याकरणेपदसंस्कारपक्षस्याभ्युपग

सर्वादीनि सर्वनामानि इत्यादि ॥

राम. २२

णत्वविधिरस्तितेनैकपदस्थस्यषरऋवर्णेभ्यः परस्यनस्यणः स्यादऽपदान्ते यथा पुष्णाति चतुर्णाम् धातॄणाम् अपदान्ते किम् पितॄन् प्रुरिति किं देवेन॥ ॥ अ
वकुप्वनरे पि। अश्व अकुश्व पुश्व नेषां समाहारः अवकुपु तेनांतरं अवकुप्वंतरं तस्मिन् स्वरावधर्यं तस्येति अवशब्दस्य पूर्वनिपातः इंनौ अवकारेणाव प्रत्याहारः
अंतरशब्दो मध्यवाची प्रुरित्यनुवर्त्तते पंचमीनिर्देशाद्व्यवधाने सति णत्वं न प्राप्नोत्यतइदमारभ्यते अत्रापिशब्दोऽनुक्तसमुच्चयार्थस्तेनानुस्वारविसर्गजि
ह्वामूलीयोपध्मानीयानेयाः। एतेषां व्यस्तानां यथासंभवं मिलितानां च मध्ये व्यवधाने सति प्रुः परस्य नस्य णः स्यादऽनंते। अवेत्याहेति किम् मृन्त्वं। प्रुरिति
किम् भानुना अनंते किं सर्वान् अनुस्वारादिव्यवधाने यथा बृंहणम् उरःकेन उरःकेण उरःपेन उरःपेणेत्यादि॥ सर्वादेः स्मट्। ङे रगित्यस्यापवादोऽयं॥

अवकुप्वन्तरेऽपि। अवप्रत्याहारेण कवर्गेण पवर्गेणानुस्वारेण विसर्गेण ᳵकᳵपाभ्यां च मध्ये व्यवधानेऽपि भवतीत्यनेन। सर्वेण सर्वा
देस्स्मट् सर्वादेरकारान्तात्परस्य ङे इत्येतस्य स्मडागमो भवति। सर्वस्मै॥ अतः। सर्वादेरकारान्तात्परस्यातस्स्मडागमो भवति। सर्वस्मा
त्। सुडामः॥ सर्वादेरवर्णान्तात्परस्यामः सुडागमो भवति। सर्वेषाम्। ङिस्मिन्। सर्वादेरकारान्तात्परो ङिः स्मिन् भवति सर्वस्मिन् शेष।
न्देववत् सर्वविश्वादयः डतरडतमौ प्रत्ययौ ततस्तदन्ताश्शब्दा ग्राह्याः॥

॥ अदंतात्सर्वादेर्ङेङ्स्यस्स्मट् स्यात् अदंतादिति किम्। त्वत्ते भवते
सर्वादेरिति किं रामाय। अतः। ङसिरदित्यतो ङसिरित्यनुवर्त्य विभक्तिविपरिणामेन व्याख्यातव्यं। यथा अदंतात्सर्वादेः परस्य ङसेरादेशस्यातः स्मट् स्यात्
सुडामः॥ अम् शसोरस्येत्यतो मंडूकप्लुत्याऽस्येत्यनुवर्त्य व्याख्येयं यथा अवर्णान्तात्सर्वादेरामः सुट् स्यात् सुडाम इत्यत आम् इत्यनुवर्तनीयं तेनामः षष्ठीबहु
वचनस्यामः सुडित्यर्थो ज्ञेयः तेन आम् ङेरित्यादिना कृतस्यामस्सुट् न युवां आवां सर्वस्यामित्यत्र परत्वात् ङितां यडित्यपि समाधानमस्ति। ङिस्मिन् अदंतात्स
र्वादेर्ङिः स्मिन् भवति अतः किं भवति सर्वादिगणे डतरडतमौ प्रत्ययौ पठितौ न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययस्त्युक्तत्वात् तौ डतरडतमा वंते येषां ते

पूर्वादीनांनवानांजसङसिङीनामस्मात्स्मिन्नौवा।पूर्वादीनांसप्तानांव्यवस्थायामसंज्ञायांशब्दस्यचान्त्याऽऽत्मीयार्थयोरंतरशब्दस्यबाह्येपरिधानीयेचार्थेगण
पाठात्सर्वत्रसर्वादिसंज्ञाप्राप्तासाजसङसिङिषुपरतोवाभवतीत्यर्थः॥सर्वादिः सर्वकार्यौस्यान्नचेद्गौणोऽथवाभिधा॥पूर्वादिश्चव्यवस्थायांसमोऽतुल्येंऽन्तरोपु
रि१परिधानेबहिर्योगेस्वोर्थज्ञात्यन्यवाच्यपिचेत्यादिसर्वादिः सर्वादिगणेगौणोनाऽथवाऽभिधानामनस्यात् तदासर्वादिः सर्वशब्दस्यकार्य्यमस्तियस्यसःस
र्वकार्यौस्यात्द्ववेत्मानोपधादितीन् सर्वनामाख्यइतिवापाठःयेतुसंज्ञोपसर्जनीभूताःसर्वादयस्तेषांसर्वादिकार्यमन्तर्गणकार्यंचनसर्वादिसंज्ञायाअभा

पूर्व्वादीनान्नवानांजसङसिङीनामस्मात्स्मिन्नौवा।पूर्व्वे।पूर्वाः।पूर्व्वस्मात्।पूर्वात्।पूर्व्वस्मिन्।पूर्वे।शेषंसर्ववत् एवम्परादयः।सर्व्वादिस्स
र्व्वेकार्य्यौस्यान्नचेद्गौणोऽथवाभिधा।पूर्व्वादिश्चव्यवस्थायांसमोऽतुल्येऽन्तरोऽपुरि।परिधानेबहिर्य्योगेस्वोऽर्थज्ञात्यन्यवाच्यपि।सर्वम
तिक्रान्तोऽतिसर्वः तस्मैअतिसर्व्वायदेहि।प्रियंसर्व्वंयस्यासोप्रियसर्व्वःतस्मैप्रियसर्व्वाय।सर्व्वोनामकश्चित्तस्मैसर्वाय अतिपूर्वाय
अन्तरायापुरि।समाय।तुल्याय।व्यवस्थायांकिम् दक्षिणागायकाःकुशलाइत्यर्थः।असंज्ञायांकिम् उत्तराःकुरवः।अन्तरेऽन्तरावा
शाटकाःपरिधानीयाइत्यर्थः।अन्तरेन्तरावाचाराण्डालस्यगृहाःबाह्याइत्यर्थः।बहिर्योगेकिम् ग्रामयोरन्तरेतापसःमध्यइत्यर्थः॥एवान्सर्वा

दिकार्यम् यथाजसीतीत्वं।सर्वादेरितिस्मट्।अतइतिस्मट्ङिस्मिन्निति स्मिन् सुडामइतिसुडागमः यटोच्चेतिसुट्इत्यादिअंतर्गणकर्यं।यथाश्चत्यादेरि
तिश्रुःत्यदादेष्वेवित्यःद्स्यमइतिमःसोसइतिसइत्यादिस्वार्थंपरित्यज्यअन्यार्थंब्रूतेसगौणःगौणेयथासर्वमतिक्रांतइत्यत्रान्यादयःक्रांताद्यर्थेद्वितीय
येतितत्पुरुषःअतिसर्वस्तस्मैअतिसर्वायपुरुषायत्वंदेहिगौणत्वादत्रनस्मट्प्रियंसर्वंयस्येतिबहुव्रीहिःसप्रियसर्वःसंकेतकरणंसंज्ञायथाकश्चित्पुरुष
स्तस्यनामसर्वइतितस्मैसर्वायसंज्ञात्वादत्रनस्मट्पूर्वादिसप्तकोगणोव्यवस्थायांसर्वकार्यौस्यात्स्वाभिधेयापेक्षाऽवधिनियमोव्यवस्थेतिस्वस्यपूर्वादिशब्दस्याभि

यमइत्यर्थः अपेक्ष्यतेइति अपेक्षः कर्मणि घञ्प्रत्ययः॥ ॥स्वशब्देनपूर्वादयः सप्तगृह्यंते स्वेषांपूर्वादीनामभिधेयः स्वाभिधेयो दिग्देशकालरूपोऽर्थः स्वाभिधेयस्यापेक्षः स्वाभिधेयापेक्षः कर्तृकार्ययोरक्तादाविति तृषष्ठ्यासमासः स्वाभिधेयेनापेक्ष्यतेइत्यर्थः स्वाभिधेयापेक्षश्चासाववधिनियमश्च स्वाभिधेयापेक्षः स्वाभिधेयापेक्षा वधिनियमश्च स्वाभिधेयावस्था अवधिमपेक्ष्यते पूर्वादयो यत्र सुस्तत्र व्यवस्था भवतीत्यर्थः॥ व्यवस्था यां किम्॥ दक्षिणानराः कुशला इत्यर्थः एवं अधरे तांबूलरागः उत्तरे प्रत्युत्तरे चशक्ते इति गौणे यथा पूर्वं मतिक्रांतोऽतिपूर्वस्तस्मै अतिपूर्वाय पुरुषायत्वं देहि गौणत्वादत्र न स्मट् समशब्दोऽतुल्ये ऽर्थे सर्वकार्यीतुल्येऽर्थेन भवतीत्यर्थः समाय देहि॥ तुल्यार्थत्वादत्र न स्मट् अंतरशब्दः परिधाने उत्तरीये ऽर्थे बहिर्योगे चार्थे सर्वकार्यी अपुरि पुरि विषयत्वायां सर्वकार्यी न भवति बहिः शब्देनात्राक्षरे योबाह्यं चोच्यते अंतरायां पुरीति प्राकाराद्बाह्यायां पुरि प्रकारांतरवर्तिन्यां वा पुरि गृहाः संति सत्यपि बहिर्योगे पुरि विषयत्वान्न स

॥ स्वमज्ञातिधनाख्यायां वा॥

र्वादिसंज्ञात्र सर्वादित्वाभावाद्घटोच्चेति न स्मुट् परिधाने तु अंतरे अंतरा वा शाटकाइति परिधानीया इत्यर्थः सर्वादित्वाद्वाजसीनीत्वं बहिः शब्दोऽर्थेद्वयवाचीउक्तः तत्रायेयथा अंतरे अंतरा वा गृहा इति नगराद्बाह्याश्चांडालादिगृहा इत्यर्थः द्वितीये तु नगराभ्यंतरा गृहा इत्यर्थः बाह्येन सह्याभ्यंतरस्य योगो ह्यस्तिबहिर्योगे किम्॥ ग्रामयोर्द्वयोरंतरे मध्ये तापसाव संतीति अंतरशब्दस्य मध्यार्थत्वान्न सर्वादिसंज्ञा अत एवात्र पाक्षिकोन स्मिन् अर्थश्च ज्ञातिश्च अर्थज्ञाती अर्थज्ञातीभ्यामन्यावात्मात्मीयावर्थौ अर्थज्ञात्यन्यौ अर्थज्ञात्यन्यौ वक्तीत्यर्थः ज्ञात्यन्यवाचीस्वशब्दः सर्वकार्यी आत्मात्मीयज्ञातिधनवाचीस्वशब्दस्तत्रज्ञातिधनयोः पर्युदासाद्ग्रहणात्मात्मीयौ परिशिष्टौ तत्र सर्वादिसंज्ञा भवति स्वेस्वाः आत्मानः आत्मीया वेत्यर्थः सर्वादित्वादत्र वा जसी नीत्वं ज्ञातिधनवाचिन स्मुस्वायेन्यत्र स

युक्तं पर्युदासग्रहणमनर्थकमुच्यते ज्ञातित्वेन धनत्वेन च विवक्षायां सम्यामात्मीयार्थे सर्वादिसंज्ञा माभूदित्यर्थं पर्युदासग्रहणमिति अन्यशब्दग्रहणमनर्थकमुच्य
ते आत्मीयार्थस्यापि ज्ञातित्वेन धनत्वेन च विवक्षायां समासे सर्वादिसंज्ञा माभूदित्येतदर्थमन्यशब्दग्रहणमिति॥ ः॥ द्वन्द्वे च॥ सर्वादीनां सर्वकार्यं न॥ द्वन्द्वसमासे स
र्वादिसंज्ञा न भवति। समुदायस्यायं निषेधो न त्ववयवानां। वर्णाश्च आश्रमाश्च इतरे च ते वर्णाश्रमेतरे तेषां वर्णाश्रमेतराणां सर्वादिसंज्ञाभावान्न सुट्। वाज
सीद्दद्वे उकारस्य ज्ञा वास्यात् जसीति इश्राद्देशे कर्तव्ये। तृतीयासमासे। तृतीयासमासार्थवाक्ये च न तृतीयान तत्पुरुषसमासे तृतीयासमासः अर्थः प्रयोजनं
यस्य तत् तृतीयासमासार्थं तृतीयासमासार्थं च तद्वाक्यं च न तृतीयासमासार्थवाक्यं तस्मिन् तृतीयासमासार्थवाक्येपि सर्वादिसंज्ञा न भवति मासेन पू

द्वन्द्वे सर्वादीनामल्पसर्वकार्यम् पूर्वपरावराणाम् वाजसी। वर्णाश्रमेतरे वर्णाश्रमेतराः। तृतीयासमासे। तृतीयासमासार्थवाक्येपि। मासपूर्वा
य। मासेन पूर्वाय। प्रथमचरमतयडयडल्पार्द्धकतिपयनेमानाञ्जसीवा। प्रथमे प्रथमाः चरमे चरमाः। तयडयटौ प्रत्ययौ न तत्स्तदन्ताः शब्दाः।
द्वितये द्वितयाः द्वये द्वयाः शेषं सर्ववत् नेमे नेमाः शेषं सर्ववत् तीयस्य ङित्सु वा सर्ववद्रूपम् द्वितीयस्मै द्वितीयाय द्वितीयस्मात् द्वि
तीयात् द्वितीयस्मिन् द्वितीये एवं तृतीयः॥

एवं मासपूर्वस्मै मासपूर्वाय देहि। तृतीयासमासेऽत्र सर्वादित्वाभावान्न स्मट्। प्रथमचरमतयडयडल्पा
र्द्धकतिपयनेमानां जसी वा एतेषां सर्वादिसंज्ञा वा स्यात् जसीतीत्वे कर्तव्ये नेमशब्दस्य नित्यं प्राप्ते अन्येषामप्राप्ते चायमारम्भः। तयडयटौ प्रत्ययौ केवलत
योः संज्ञाः प्रयोजनाभावात्। तयडयडं नाद्वितयद्वयादिकाग्रास्याः संख्याया अवयवे इति तयडयटौ द्वावयवौ यस्य सः द्वितयः द्वयः तीयस्य वा ङित्सु सर्ववद्रू
पम् तीयप्रत्ययान्तस्य वा सर्वशब्दतुल्यं रूपं भवति ङे ङसि ङि सु परतः द्वित्रिभ्यां तीय इति तीयः अर्थवद्ग्रहणान्नेह पटुजातीयायेत्यत्र प्रकारेण जातीयः इति॥ सम
जातीयः उभशब्दस्य आख्यातात्यय सर्वादेरित्यकार्थः सर्वादौ पाठः द्विवचनपरत्वाभावे तु उभशब्दान्नित्यमयट् भवतीति नकप्रत्ययादिष्टसिद्धिः॥ ः॥ २४

उभयशब्दस्य द्विवचनं नास्ति अनभिधानादिति कैयटः उभयशब्दस्य द्विवचनमस्ति अनभिधाने प्रमाणाभावादिति हरदत्तः उभयशब्दस्यायच्प्रत्ययान्तत्वात् प्रथ
मचरमेति विकल्पे प्राप्ते सर्वादौ पाठसामर्थ्यान्नित्यं संज्ञा भवति। विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वाच्च। अयमर्थः उभयशब्दे प्रथमचरमेति विकल्पस्य जसपेक्षया
बहिरङ्गत्वं सर्वादिगणपाठसिद्धनित्यसंज्ञायास्तु विभक्त्यपेक्षारहितत्वेन अन्तरङ्गत्वं तत्रोन्तरङ्गबहिरङ्गयोर्मध्ये अन्तरङ्गो विधिर्बलीयानिति न्यायादत्र नित्यैव सं
ज्ञास्यान्न तु विकल्प इति॥ निःक्रान्तो जराया इति निरादयः क्रान्ताद्यर्थे पञ्चम्येति तत्पुरुषः अन्यार्थे इति ह्रस्वः निर्जरः अमरा निर्जरा देवा इत्यमरः जरायाः
स्वरादौ जरस् वा वाच्यः। जराशब्दस्य वा जरस् भवति स्वरादौ विभक्तौ परतः। तदन्तविधिरत्र। जराया इत्यस्य नाम्नो विशेषणत्वात् षष्ठीनिर्दिष्टस्येति परिभा

उभशब्दो नित्यं द्विवचनान्तः। उभौ। उभौ। उभाभ्याम् उभाभ्याम् उभाभ्याम् उभयोः। उभयोः। उभयशब्दस्य द्विवचनं नास्तीत्येके। अस्तीत्यन्ये।
उभयः। उभये। निर्जरः। जरायाः स्वरादौ जरस् वा वक्तव्यः। तदन्तविधिरत्र षष्ठीनिर्दिष्टस्यादेशस्तदन्तस्य ज्ञेयः। गुरुश्शिच्च सर्वस्य। नि
र्दिश्यमानस्यादेशा भवन्ति एकदेशविकृतमनन्यवत्। निर्जरसौ निर्जरौ। निर्जरसः। निर्जराः। पक्षे हसादौ च देववत्। संख्या वि
साय पूर्वस्याह्नस्याहन्वा ङौ। वेङ्योः। अन्नन्तस्योपधाया लोपो वा भवति ईङी इत्येतयोः परयोर्मकारवकारान्तसंयोगाद्धन्नरसन॥

षया निर्जरशब्दस्यान्तस्य स्थाने जरस् प्राप्तोऽत आह। गुरुश्शिच्चेति। अनया परिभाषया सोपपदस्य सर्वस्य स्थाने जरसादेशे प्राप्ते सत्याह निर्दिश्य।
मानस्यादेशा भवन्ति। निर्दिश्यन्ते इति निर्दिश्यमानः उच्चार्यमाणस्तस्य स्थाने आदेशाः स्युरेवमपि निर्दिश्यमानजराशब्दस्य जरसादेशो भवति न त्वन्यत्रे।
त्यत आह एकदेशेन विकृतमेकदेशविकृतं शब्दस्वरूपं अन्येन तुल्यमित्यनन्यवत् भवति अनया परिभाषया निर्जर इत्यत्र जरोऽपि जरावदिति यः जरसादेशा
भावपक्षे हसादौ चे देववद्रूपम् संख्याविसायपूर्वस्याह्नस्याहन्वा ङौ संख्याविसायाः पूर्वे यस्य सः संख्याविसायपूर्वस्तस्य संख्यादिपूर्वस्याह्नस्य स्थानेऽहन् आ

पू॰
सि॰च॰
टी॰सु॰
२५

इतिसूत्रेण कनोऽत्र ग्रहणं तेन तु जस्‌शसोः शिरिति शिः नापि ई पूतिरनुबंधग्रहणे न सानुबंधकस्येत्युक्तत्वात् अल्लोप इति नित्ये प्राप्ते विकल्पोयम् अन्नंतस्य नाम्न उपधाया लोपो वा स्यात् ङिश्योः परतः वकारमकारौ अंते यस्य संयोगस्य स वकारमकारांतः वकारमकारांतश्चासौ संयोगश्च वकारमकारांतसंयोगस्तस्मात्परस्यान उपधाया लोपो न भवतीत्यर्थः यथा बहु यज्वनी चर्मणी इत्यादि ॥ ॥ द्व्योरन्होर्भवइति तद्धितार्थे द्विगुसमासोयं भवार्थे इकप्रत्ययस्तस्य लुक् च ततः समासांतष्टप्रत्ययः नो वेत्युपधालोपः द्व्यन्हः विगतमहइति तत्पुरुषः व्यन्हः अन्हः सायइति क्वचिदमाद्यंतस्येति परनिपातः स्यतेर्घञ् प्रत्यये युकि च कृते साय शब्दोऽवसानवाची साधितः अहन्नादेशे उपधालोपे द्व्यन्हि लोपाऽभावे द्व्यहनि अहन्नभावे द्व्यह्ने पाद दंत नासिका मास हृदय निशा असृज् यूष दो

द्व्यन्हि। द्व्यहनि। द्व्यह्ने विगतमहो व्यन्हः। व्यन्हि। व्यहनि। व्यह्ने। अन्हस्सायः सायान्हः। सायान्हि। सायाहनि। सायाह्ने। पाद। दंत। नासिका। मास। हृदय। निशा। असृक्। यूष। दोष। यकृत्। शकृत्। उदक। आस्य। मांस। एतेनासानूना म्पद्। दत्। नस्। मास। हृद्। निश्। असन्। यूषन्। दोषन्। यकन्। शकन्। उदन्। आसन्। मांस। एतानस्तु। एते आदेशा भवंति शसादौ वा। पदः। पदा। पद्भ्याम्। पद्भिः। दतः। दता। । दद्भ्याम्। दद्भिः। मासः। मासा। माभ्याम्। मासाभ्याम्। अल्लोपस्स्वरेऽम्वयुक्ताच्छसादौ। अन्नन्तस्योपधाया लोपो भवति शसादौ स्वरे परे मकारवकारान्तसंयोगादुत्तरस्य न। ॥ यूष्णः यूष्ण॥

यूषयकृत्‌शकृत्‌उदकआस्यमांस एतेनासानूनां एषां पदादय आदेशा वा स्युः शसादौ। माभ्यामित्यत्र सस्य विसर्गे आदेवेति विसर्गलोपः यूषो मंडः मुद्गामलकयूषस्तु भेदी दीपनपाचन इति दर्शनात्। अल्लोपः स्वरेऽम्वयुक्ताच्छसादौ। नोपधायाः इत्यनुवर्तनेन नांतस्य नाम्न उपधाया अतो लोपः स्यात् शसादौ स्वरे नांतस्येति किम्। भवतः अत इति किं दंडिनः। नपर इति किम् प्रतानयतीति प्रतान् क्विप् प्रत्यय स्तान् प्रतानः स्वरे किं। राजभ्यां। शसादौ किं मघोन इदं मघवनं। देवनेरमर्थे इन्यण् मचवश्चम्वौ युक्त इति युज धातोः क्तेकर्मणि क्तः म्वाभ्यां युक्तः म्वयुक्तः नम्वयुक्तः अम्वयुक्तः तस्मादम्वयुक्तात् म्वाभ्यां युक्तात् हृर्णात् परस्यातो लोपः। एम २५

दितिकिं अ य्यमृणः णत्वे कृते षुणायोगेषाा इत्यसरं भवतियूष्णः॥ ॐ॥ नाम्नोनो लोपधौ। न इत्यनेन नाम विशेष्यते। विशेषणत्वात्तदंत विधिर्भवतिनांतस्य ना
म्नोंतस्यलोपशस्यद्रुसे परं चाधौ। नाम्नइतिकिं अहन् नोम्न इत्यनुवर्तमाने पुनर्नामग्रहणं नामसंज्ञाप्रहतिकाले स्थितस्य नकारस्य लोपशर्थं तेनागमा
देशयोर्नकारस्यलोपशनभवति। यथा पचन्। भवान्। श्वन्। सुहिन्। प्रशान्। पूषभ्यामत्र नस्यलोपशिष्कते अह्नीत्यात्वे प्राप्ते उच्यते। नस्यलोपशिनविभक्तिका
र्यमिति। विभक्तौ कार्य्यं विभक्तेर्वा कार्यमितिसमासः पृथिविषित्यादौ षत्वंतुन विभक्तिकार्य्यं सैषादि तिज्ञापकात् आदेशाभावपक्षे सर्वाणि रूपाणि देववत्आ
देशपक्षेपंचवचनानि देववत् परादयो नादेशाः किंतु पृथक् शब्दा एके आचार्याः इति वदंति। तेन पदं ग्रिश्वरणो क्रियां स्वांतं हन्मानसंमनइत्यादि संगच्छे

नाम्नो नो लोपशधौ। नान्तस्य नाम्नो नस्य लोपशभवति रसे परान्ते चाधौ। यूषभ्याम्। यूषभिः। पक्षेपञ्चसु देववत् पद्दादयः पृथक्श
ब्दा इत्येके। सोमपाः सोमपौ सोमपाः सोमपाम्। आतो धातो र्लोपः। धातुसंबन्धिन आकारस्य लोपो भवति शसादौ स्वरे परे। सोमपः। सोमपा सो
मपाभ्याम् इत्यादि। एवं कीलालपा शंखध्मा मधुपा विश्वपा प्रभृतयः। धातो ४ किम्। हाहान्। हाहाः हाहौ हाहाः हाहै हाहौः हरिः औ
यू इकारान्तादुकारान्ताच्च परऔयूआपद्येते इउ भवतः हरी॥

॥ नेँ इत्यदन्ताः॥ सोमंपिबतीति सोमपाः पापाने इत्यस्मादातोऽप्रत्ययं ज्ञाधित्वाक्वि
पृ आतो धातो र्लोपः आकारांतस्य धातोर्लोपः स्याच्छसादौ स्वरे। शतृशानच्कसंतानां तृजंतानां तथैव च क्विवंतानां च शब्दानां धातुत्वं नोपहन्यते १ प्राति
पदिकसंज्ञयेत्यर्थः आतोडस्य हे संज्ञेत्रसः षष्ठी निर्दिष्टस्यान्त्यंत लोपः धातोः किं। हाहान्। गंधर्वविशेषवाचकमव्युत्पन्नं प्रातिपदिकमिदं हाहा हूहूश्चैवमाद्यागं
धर्वाः इत्यमरः टासवर्णे दीर्घः हाहाङे एत्वं हाहेङसिङसो दीर्घः हाहाः २ ङोसि ओत्वं हाहोः ङौ एत्वं हाहे। शेषं सोमपावत् आत इति योगविभागाद्धातोरप्याका
रलोपः क्वचित्कः। क्वः। इत्यादन्ताः औयू इदुद्भ्यां परऔयूस्यानाम् ईदूतो दीर्घयोग्रहणे ईऊ इति पदद्वयं बोध्यम् ह्रस्वग्रहणपक्षे तु यूइत्यत्रेनेरेतरद्वंद्वः इदुद्भ्यामिति

एङोजसि। इदुद्‌भ्यामित्यनुवर्तनेन तत्तु षष्ठ्या विपरिणम्यते तच्च नाम्नो विशेषणं विशेषणेन्हितदंतविधिः इदुदंतस्य नाम्न एओ स्यातां जसि परतः इदुदंतस्येति किम् रायः ग्लावः तपरत्वं किम् वातप्रम्यः हूहूः घौ इदुदन्तस्य एऽ उ भवतः घौ परे ह्रस्वान्तत्प्रसंगित्वेन नित्यत्वाच्च पूर्वमेत्वमोत्वं च ततः समानाद्देरिति धिलोपः इदुदंतस्य किं। हेग्लौः तपरत्वं किम् हेवातप्रमीः हे हूहूः। टानास्त्रियाम् इदुद्भ्यां परस्य टा ना स्यात् स्त्रीलिंगे तु न किं च पुंसीत्युक्ते तु अदसष्टाप्रत्यये त्यदाद्यत्वे मत्वे च अमुटाइ नि स्थिते इनादेशः ततः परत्वादंतरंगत्वाच्च मात्‌ इत्युत्वे पुल्लिंगे सिद्धममुनेति क्लीबे त्वमुनेति न सिद्ध्यति नामिनः स्वरे इतिनुमि कर्तव्ये उत्वस्यासिद्धः

एओजसि। इकारान्तस्योकारान्तस्य च जसि परे एकार ओकारश्च भवति। हरयः। घौ। इकारान्तस्योकारान्तस्य च घौ परे एकार ओकारश्च भवति हेहरे हरिम् हरी हरीन्। टानाऽस्त्रियाम्। इकारान्तादुकारान्ताच्च परष्टा ना भवत्यस्त्रियाम्। हरिणा हरिभ्याम् हरिभिः। ङिति। इकारान्तस्योकारान्तस्य च ङिति परे एकार ओकारश्च भवति। हरये। हरिभ्याम् हरिभ्यः। ङसः। एदोद्भ्यामुत्तरस्य ङसि ङसोरकारस्य लोपो भवति। हरेः। हर्योः। हरीणाम्। ङेरौ ङितः। इदुद्भ्यामुत्तरस्य ङेः औ भवति स च ङित्। ङितिटेः। ङिति परे टेर्लोपो भवति। हरौ। हर्योः। हरिषु। एवं मणिगिरिरविकविमुन्यादयः। उकारान्तः। विष्णुवायुभानुशब्दादयोऽप्येवं ज्ञेयाः। भानुः। भानू। भानवः॥

एत्वात् अतोऽस्त्रियामित्युक्तं इदुद्भ्यां किं। गवा। तपरत्वं किम् वातप्रम्या। हूहूा। ङिति। इदुदंतस्य नाम्नः एओ स्यातां ङ इत्युपलक्षितस्तस्मिन् ङिति स्याद्दोङिति किं हरिभ्यां स्यातां किं हरिरिवाचरती निहरयति आचारक्विप् ततः प्रत्ययोत्पत्तौ त्वस्त्रियामङिन्यङ् हर्यो नाम्नः किं तुतः तुवेति किं च ङ्चासौ ङिच्च तस्मिन् ङिति इतिकर्मधारयकरणे इत्संज्ञकङकारादौ प्रत्यये परे इत्यर्थो भवति तस्यानाम्नः स्याद्दाविमेतयोरनुवृत्तिर्न कर्तव्येति लित्तु पाटेर्डे इत्यादि ङप्रत्यये तु परत्वादियुवौ अशिश्रियत् अदुद्रुवत् इत्यादि ङस्य एदोनोत इति सूत्रमनुवर्तते लोपश इति च एदोत्भ्यां परस्य ङस्याकारस्य लोपः स्यात् ङकारस्य इत्संज्ञायामकारः परत्वेन लभ्यते एदोत इति किम् रायः ग्लावः ङसेति किं हरयेभानवे ङ

सच ङित्संज्ञकः ननु ङेः डौ इत्येव वक्तव्यं किं ङित्शब्देन उच्यते ङिद्ग्रहणं ऋतो ङेः उः इत्यादौ ङिदित्यस्यानुवृत्त्यर्थं । इदुद्भ्यां किम् । एयि पिगविा नपरत्वं किं वा न प्रमी
हृह्यि । ङिति टेः । नाम्न एव लोपः स्यात् ङिति परतः अव्ययानां टेर्लोपश्च न ह्वि तस्य ये स्वरे च यथा बहिषः भावो बाह्यः पुनः पुनरेव पौनःपुन्यं एण्प्रत्ययादिप कारे न तदुदाहरण
म् कुतः कुत आगतः कौतस्कुतः कारकादित्यण् ॥ ॐ ॥ सेर्डा धेः । सखिशब्दान्तस्य सखिशब्दान्तान्नाम्नः परस्य सेर्डा स्यात् ऐ सख्युरिति सूत्रे विपरीतनिर्देशात्तदन्तग्र
हणं कीदृशस्य सेः न धिः अधिस्तस्याधेर्धिभिन्नस्येत्यर्थः समानं ख्यायते जनैरिति सखा नीव्यादयः इति निपातनात् ख्या धातोरिप्रत्ययो यादेरस्य निवृत्तिश्च तदन्ते तु शो
भनः सखा सुसखा धौतु धाविस्मे कारो न तु डा अधेरिति निषेधात् ऐ सख्युः तस्मादित्यनुवर्तते तस्य सखिशब्देन विशेषणात्तदन्तविधिः सखिशब्दस्य सखिशब्दान्तस्य

लोपः स्याद्धोरसे पदान्ते च सम्भिन्नस्वरान्ता। अनड्वान्। अनड्वाहौ। अनड्वाहः। धावम्। चतुरनडुहोर्वामागमो भवति। आम्ना हे अनड्वन्। वसांर
से। वसुस्रंसु ध्वंसुभ्रंसु अनडुहां दत्वम्भवति रसे पदान्ते च। अनडुद्भ्याम्। अनडुत्सु॥

ईप्याम् वा ईकारे बहु अनडुही। ईपि। अनडुही। अनड्वाही। पत्न्या

दित्वान्नद्यादित्वाद्वेपू तरंत विधिरत्र प्रियानड्वान्। सावनडुहः। अस्य नुम् स्यात् सौ परे नुम यम इत्यतो नोनुमित्यनुवृत्तम यचोरान्नित्यमिति सूत्रान्मण्डूकप्लुत्या आ
दित्यनुवर्तते तेन अवर्णान्तरो यनुम् अतो विशेषविहितेनापि नुनुमाम् न बाध्यते अमा च नुम् न बाध्यते संयोगान्तस्य लोपः। संयोगेति अन्तस्येति च छेदः अनुकर
णादिभक्तेर्वैकल्पिकत्वात् ष्ठीविभक्तिको निर्देशः। नाम्न इति विशेष्यं संयोगेति विशेषणं विशेषणे च तदंतविधिः तेन संयोगांतस्य नाम्नोंतस्य लोपो भवति स्याद्योरसे।
न पुनः पदान्ते वर्तमानो नाम्नो धातोश्चायः संयोगस्तस्यांतस्य लोप इति पदान्ते यथायमर्थः अचास्कुन् संयोगान्तस्य किम् रुनं संयोगस्य नाम्नो विशेषणत्वाद्दारे
नेनट् अनः शकटं वहतीति विग्रहे अनसि वहेः क्विप् अनसोड श्चेति क्विप् यजामिति संप्रसारणं अनडुहसि इति स्थिते आम् नुमोः परत्वात् संयोगांतलोपे कृते सिलो

राम ३९

समिन्नसंख्यरान्ता। रात्परस्य सस्यैव लोपः स्यान्नान्यस्य वर्णस्य चतुरोवा राम् इति चतुः सुप्रत्ययस्य लोपोत्र सस्येति। उर्कू। अमार्ट्। धावम् चतुरनडुहोरमागमः स्याद्धोपरे आम्नोपवादः। चतुरशब्दानुगौणे। हे प्रियचत्वः। वसां रसे। बहुवचनमाद्यर्थं। वसुचात्र प्रत्ययो गृह्यते न धातुर्व्याख्यानात्। उगित्स्थानुबंधकत्वेन वसुकसोः सामान्य ग्रहणं सोस इत्यतः सदृत्यनुवर्त्य षष्ठ्यंतं व्याख्येयं न च वसोर्विशेषणं न संसादेरव्यभिचारात्। नाप्यनडुहो ऽसंभवात्। सांतवस्वंत सस्त्वसादेश्च नाम्नो ऽनडुह शब्दस्य दः स्यात् सांतेति किम् विद्वान्। नाम्न इति किं स्वस्त। ध्वस्तं। स्वसे चपाद् इतितः अनडुत्सु॥ ❀॥ दादेर्घः॥ इह आदिर्यस्स सदादिः स यदादेः अत्र धातुग्रहणं इ यमनुवर्त्यतन्तैवकमाद्योच्चारणप्रतिपत्त्यर्थम्। आद्योच्चारणे दादेर्ह्यतो हस्य घः स्यात् झसे पदांते च दादेर्नाम्नश्च हस्य घो रसे पदांते चा ढसो ऽपवादोयम्। धातो र्यथा

दादेर्घः। अघोच्चारणोदादेर्हकारस्य घत्वम्भवति धातोर्झसे नाम्न श्वरसे पदान्ते च। आदिजवानां झभान्तस्य झभास्स्ध्वोः धातोर्झभान्त॥ स्यावयवस्यादेव र्तमानं जवानां झभा भवन्ति सकारे ध्वशब्दे नाम्नश्वरसे पदान्ते च। धुक्। धुग्। धुग्ड्‌ड् हौ। दुहः। धुग्भ्याम्। धुक्षु। आद्योच्चारणे किम्। दा मलिह्यतीति दामलिट्। दामलिड्। दामलिड्‌भ्याम्। दामलिट्सु। दामलिट्त्सु। अवयवस्य किम्। गर्दभमाचष्टे गर्दभयतीति गर्धप्। गर्दभौ गर्दब्भ्या ऽम्। गर्धप्सु॥

दोग्धि। अधोक्। आद्योच्चारणे किम्। अधोगित्यत्र यथा स्यात्। दामलिहमात्मन इच्छतीति दामलिह्यति नाम्नो यइति यप्रत्ययः ततः क्विपि दामलिट्। अत्र मा भूदिति। आदिजवानां झभांतस्य झभाः स ध्वोः। मंडूकप्लुत्या भिर्दयामित्यतो भि इत्यनुवर्तते पदांते इति च आदिशब्दः स्यावयववाचित्वादवयव्याक्षां सायां धातोर्नाम्नश्चेत्याक्षिप्यते। झभांतस्येति। न धातोर्विशेषणं किंत्ववयवस्य झभांतस्य धातोरवयवस्यादौ स्थितानां जबा झभाः स्युः सादौ भादौ पदांते च ध्वे निधे ध्व मोः सामान्यग्रहणं धातोर्यथा धक्ष्यते। धुग्ध्वे। अधुग्ध्वं अधोक्। जवानामिति किं। योत्स्यते। झभांतस्येति किं। दास्यति। जवानामित्यत्र दवानां त्वभा इत्यत्र धभाक्ष्यपेक्षितमाद्ययोरदर्शनात्। अवयवस्येति किं गर्दभमाचष्टे इति गर्दभयति नाम्नो जिर्डिदिति जि प्रत्ययः ततः क्विपि जिलोपे गर्द्दप् अवयवग्रहणाभावे गकारस्थाने ऽत्रघः

सू॰
सि॰ चं॰
टी॰ सु॰
८०

त्यर्थः। दुह प्रपूरणे क्विप्। दादेर्धः इति घत्वे झभांतत्वाद् भष्भावः सानेइ इति जश्त्वचर्त्वे। धुग् धुक्। झल्वे जश्त्वा इति जश्त्वं धुग्भ्यां धत्वचर्त्वे। धुक्षु॥ ❀ ॥ हो ढः। धातोर्हस्य ढः स्या
त् झलि से पदान्ते च नाम्नो हस्य च ढः स्यात् से पदान्ते च धातोर्यथा लेक्ष्यति अलेट्। लिह आस्वादने क्विप् सौ परत्वात् ढत्वे सिलोपः जश्त्वचर्त्वे लिट् लिड्। सु
पि ढस्य चर्त्वे कृते टना त्सस्य वेति धुट्। धुटः चर्त्वेन ततः शसे च परस्य हि नो यो वेति तस्य थो न। कुकूटुक्षु वर्जितस्ये त्युक्तत्वात्। ष्टुत्वं तु नकारस्य न शंकामेव। स्यादी
नां सुपि तस्य नेति निषेधात्। लिट्त्सु। धुड भावे पि शसे च पत्वेति स्वयोगेन। पूर्ववत् ष्टुत्वं तु स्यादीनामिति निषिद्धमेव द्रुह मुह ष्णुह ष्णिह। घत्वं वा। द्रुह जिघांसायां मुह
वैचित्ये ष्णुह उद्गिरणे ष्णिह प्रीतौ। द्रुहेर्दादित्वान्नित्यं प्राप्ते अन्येषामप्राप्ते विभाषेयं द्रुहादीनां हस्य घः स्यात् धातोर्झसे पदान्ते च। नाम्नोर से पदान्ते च पक्षे ढः धा॥

हो ढः। हकारस्य ढत्वम्भवति धातोर्झसे परे नाम्नश्चर से पदान्ते च। लिट् लिड्। लिहौ लिहः। लिट्सु लिट्त्सु। द्रुहादेर्वा। ध्रुक् ध्रुग् ध्रुट् ध्रुड्। मुह ष्णुह ष्णिह। हाम्वा घत्वम्। ध्रु
क्। ध्रुग्। ध्रुट्। ध्रुड्। द्रुहौ द्रुहः। ध्रुग्भ्याम्। ध्रुड्भ्याम्। ध्रुक्षु ध्रुट्सु ध्रुट्त्सु एवम्मुह ष्णुह ष्णिहः। विश्ववाट् विश्ववाड्। वाहो वौ शसादौ स्वरे। वाहो वका
रस्यौ भवति शसादौ स्वरे परे। नद्धितयस्वरयोरीपी कारे च। विश्वौहः विश्वौहा। विश्ववाड्भ्याम्। विश्ववाट्सु विश्ववाट्त्सु। सहे स्साढ्। साढि रूपे सति
सहेस्सस्य षो भवति। तुराषाट्। तुराषाड्। तुरासाहौ। तुरासाहः। तुराषाड्भ्याम्। तुराषाट्सु। दिव औं दिवो नाम्न औकारादेशो भवति सौ परे। द्युः द्यौः सु

नोर्यथा। द्रोढा द्रोग्धा अदोऽधोघ्रोढा। अदोधो क्। विश्वं वहतीति विग्रहे। भजो ण्वि णि ति विण् प्रत्ययः। विश्वं वाहयतीति ण्यंतात् तुं वा विण् प्रत्ययो बोध्यः। वाहो श सादौ स्वरे व
कारविशिष्टस्य वा शब्दस्ये त्यर्थः। टना दिति धुट् चर्त्वे विश्ववाट्त्सु सहेः साढ़ि पत्वमनुवर्तते तुरं वेगं सहते इति विग्रहे विण्। तुरं त्वरितं सा हयत्यभिभवत्यरी
निति विग्रहे तु ण्यंतात् क्विप् सहादित्वात् पूर्वपदस्य दीर्घः तुराषाट् इति हांताः। दिव औ। समानाद्धुलौ पदइत्यतो मंडूकप्लुत्या अधातोरित्यनुवर्तते। तेन धातोर्न भवति
अक्षैर्दीव्यतीति अक्षद्यूरिति क्विबंता द्विवेर्डिविति डिव् प्रत्ययः। वर्णमात्र विधित्वेन स्थानिवत्वाभावाद्हसे प इति सिलोपो न सुद्युः द्यौर्यस्मिन् सः सुद्यौः॥ ६॥ ❀ ॥ ॥ राम
८०

उरसे अधिकृतस्य नाम्नो दिवशब्देन विशेषणात्तदंतविधिः। दिवो नाम्नः उः स्यात् रसे पदांते च। तदंते विमलद्युः इति वांताः। चतुराम् शौ च। नाम्नश्चतुर् शब्देन विशेषणा
त्तदंतविधिः। चकारेण पंचस्विति संबध्यते। चतुरित्यविभक्तिको निर्देशः। तदंते प्रियचत्वः। चतेरुरित्युर् प्रत्यये चतुर् शब्दः। ईमावितीकारे तु नारः संख्यायाः ना
म्नो रकारेण विशेषणात्तदंतविधिस्तेनांतग्रहणं न त्वरह्रादयो ह्रि रिति द्वित्वं चतुर्णां यकृ चतुर्ष्विति सूत्रे रकारपठनान्न विसर्गः। प्रियाश्चत्वारः पुरुषाः। प्रियाणि च
त्वारि कुलानि वा यस्याः सा स्त्री प्रियचत्वाः तदंतत्वाद् आम् हे प्रियचत्वः इत्यत्र धावमित्यम् गौणत्वे तु नुट् न गौणत्वे रेफांत संख्याया आमो नुङ् न अन्यपदार्थ इति त्वेनसं

उरसे दिव उत् आदेशो भवति रसे पदान्ते च। सुद्युभ्याम्। सुद्युषु। चतुर् शब्दो नित्यम्बहुवचनान्तः। चतुराम्शौ। चतुर् शब्दस्य आमागमो भवति पञ्चसु शौ
च न त्वीति। चत्वारः चतुरः। चतुर्भिः। रसंख्यायाः। रेफान्त संख्यायाः परस्य आमो नुडागमो भवति। णत्वं द्वित्वं। चतुर्णाम्। चतुर्षु। प्रियाश्चत्वारः प्रियाणि
वा चत्वारि वा यस्याः सा सौ प्रियचत्वाः। हे प्रियचत्वः। प्रियचत्वारौ। प्रियचत्वारः। प्रियचतुरः। गौणत्वे नुट् नास्ति। न्यीवच्छिन्न पर ग्नां र्या वत्त्ववनं गौणत्वम्। प्रिय
चतुराम्। कमलं कमला म्वा ऽऽचष्टाणः कमल्। कमलौ कमलः। फलं फलौ फल्भ्याम्। मो नो धातोः। मान्तस्य धातोर्मस्य नो भवति रसे पदान्ते च
। वमयोश्च नस्य लोपो न। प्रशान् प्रशामौ प्रशामः प्रशान्भ्याम् प्रशान्सु कः कौ कैः शेषं सर्ववत्॥

॥ ख्याभिधायित्वाभावात्। प्राधान्ये भवत्येव परम चतुर्णामिति रान्ताः
। कमलं जलपद्मयोरिति विश्वः। कमला श्रीर्हरिप्रिये त्यमरः। कमलं कमलां वा ऽऽचष्टाण इति नाम्नो जिर्डिदिति जिप्रत्ययः त्र्यंतात् क्विपि जेरिति जिलोपः। कमल्। ष
त्वं कमल्षु। फलमाचष्टाण इति फल्। तोयमाचष्टाण इत्यादौ तु यवयोर्वसे इति यलोपे तो इति स्यात्। तोयांतो नोक्तः इति लांताः मो नो धातोः। मांतस्य धातोर्नः स्या
त् रसे पदांते च। वमयोश्च षष्ठ्या निर्दिष्टत्वादंत्यस्यादेशः। सिप्रत्यये परत्वान्नकारे कृते सिलोपः। प्रशानित्यत्र नाम्नो नो लोप शितिनलोपो न। नत्वस्यासि
द्धत्वात्। यद्वा नाम्नो न इति सूत्रे पूर्वमेवोपपादितत्वात्। शमु उपशमे क्विप् ज्ञमांतस्येति दीर्घः। प्रशाम्यतीति प्रशान्। वमयोस्तु चक्षणव्वहे ॥ ६ ॥

चसणमहेपरांनेचअशंसन् अचंस्कनूपरांनेकिं।प्रशामौंधात्वधिकारादेवधातोरितिलभ्यमानेपुनर्धातुग्रहणान्नामधातोर्न।अयमिवाचरनूइदामूप्रशा
न्भ्या।मित्यादौनश्चेतिनकारस्यअनुस्वारेविशेषाभावात्साम र्थ्याच्चनानुस्वारःकायतेर्डिमितिडिम् प्रत्ययेनिष्पन्नःकिम्शब्दः।त्यदादेरित्यत्वेकृतेसर्वशब्दव
द्रूपम्॥ ॥ इदमोयंपुंसि।साविम्यनुवर्त्ततेसौसइत्यतःसिलोपेअयम्पुंसिकिम्इदम्।नन्वत्रलुकिनतन्निमित्तमितिपरिभाषयानभविष्यतिसत्यंतस्या अ
नित्यत्वज्ञापनार्थम्।पुंसीतितेनप्रियनिस्त्रइत्यादिसिद्ध्यति।इदेःकमिनेर्लोपश्चेतिकम्प्रत्ययेइदम्शब्दः।इदमःत्यदादेईसमःस्यात्स्यादौविभक्तौस्या
दौकिम्।अस्यापत्यमैदमःअसुमिच्छतीत्यदस्यतिनतुद्वावित्यत्रकस्मान्नमतंनशृणु।स्याद्वाविनिदस्यविशेषणमर्थवशाद्विभक्तिविपरिणामइत्युक्तत्वात्स्या

इदमोयम्पुंसि।इदमःपुंसिसावयंभवति।अयम्।इदमःत्यदादेईकारस्यमत्वम्भवतिस्यादौ।इमौ।इमे।त्यदादेस्सम्बोधनाभावः।इमम्।इमौ।इ
मान्। अनटौसो।इदमोऽनादेशोभवतिटौसोःपरयोः।अनेनस्भ्यःसकारेभकारेचपरेइदमोऽकारोभवतिकृतस्यअद्भिआभ्याम्।भिस्भि
स्।इदमइदमोर्भिस्भिसेवभवति नमकारस्याकारः।एभिः।अस्मै ।अस्मात्।अस्य।अनयोः।एषाम्।अस्मिन्। अनयोःएषु।इदमेतदो
रन्वादेशेद्वितीयाटौस्स्वेनन्।एनत्।एनौ।एनान्। एनेन।एनयोः।किञ्चित्कार्य्यम्विधातुमुपात्तस्यकार्य्यान्तरम्विधातुंपुनरुपादानमन्वादेशः।

दिपरस्यदस्येत्यर्थः।येननाव्यवधानंतेनव्यवहितेपीत्युक्तत्वाद्कारव्यवधानेसतिनचद्विव्यवधानेक्वचिद्द्वयोरितिनिर्देशाद्यानत्यदाद्यत्वेमत्वेओत्वेचइमौ
।त्यदादेःसंबोधनंनास्तीत्युत्सर्गः।प्रचुरप्रयोगादर्शनमेवात्रमूलंभाष्येतुहेसइत्युक्तम् अनटौसोः इदमोऽयमित्यतइदमइत्यनुवर्त्ततेटेनेतीनादेशेअनेन।
स्भ्यःसुचभ्चअनयोःसमाहारःस्भ्तस्मिन्स्भिसकारभकारादौस्यादौ इदम्शब्दस्यअःस्यात्स्भशितिसुवचं।यतःसर्वस्यस्यात्अङ्गीन्यात्वे आभ्यांभिसभि
सइदमोऽदसश्चभिस्भिसेवभवतिभिसोभिस्विधानंब्रुमइत्यत्ववाधनार्थंएस्मीन्येत्वे।एभिःअदसस्तुअमीभिः।इदमेतदोरन्वादेशेद्वितीयाटौस्स्वेन

द्राव कव्य ः। द्वितीयायां टौसोश्च परतोऽन्वादेशे इदमेतदोरेनत्सादेशो वा स्यात्। अन्वादेशमाह। किंचित्कार्यं विधातुमुपात्तस्य गृहीतस्य शब्दस्य कार्यान्तरं विधा
यातुं बोधयितुं पुनरुपादानं ग्रहणं सोऽन्वादेश उच्यते ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः एतमातं ङितं विद्याद्वित्यत्र तु ईषदर्थाद्यो न विधीयते
किं त्वनूद्यते इति नात्रैनत्सादेशः एवं नक्तं भीरुरयंतमेवनदिमं रोधे गृहं प्रापयेत्यत्रापि भीरुत्वस्यानुवाद्यत्वं बोध्यम्॥ ॥ यथा श्रनेन पुरुषेण व्याकरणम
धीनं पठितं एनं पुरुषं छन्दोऽध्यापय पाठय इति। मां नाः। राजन् इति रा जाक नृ युकृषितस्मिराजि धन्विद्युप्रतिदिवइति कनू प्रत्ययः परत्वान्नोपधा
याः स्तुप धा दीर्घः हसेपः इति सिलोपः ततो नाम्नो नो लोप शिति नलोपः शसितु अल्लोपः स्वरे इत्यल्लोपे कृते श्चुत्वं जञोर्ज्ञः उभयोर्योगे ज्ञ इत्यस्य ज्ञं भवति। रा

यथानेन व्याकरणमधीनम् एनं छन्दोऽध्यापय। नोपधायाः। नाम्नो नो लोपशऽधौ। राजा। राजानौ। राजानः। हे राजन्। अल्लोप स्वरेम्व युक्ता
च्छसादौ। श्चुत्वम्। जञोर्ज्ञः जकार ञकारयोर्योगे ज्ञो भवति। राज्ञः। राज्ञा। राजभ्याम् नलोपशिनविभक्तिकार्यम् पञ्चस्विति ज्ञापकात्॥ ॥
राजभिः वेङ्गोः। राज्ञि। राजनि। राज्ञोः। राजसु। एवम्ब्रह्मादयः। यज्वनः। यज्वना। आत्मनः आत्मना। प्रतिदिवा। प्रतिदिवानो। अल्लोपे कृते। य्वोर्वि
हसे। धातोरिदुतोर्दीर्घो भवति रेफवकारयोर्हसपरयोः। प्रतिदीव्नः। प्रतिदीव्ना। प्रतिदिवभ्याम्॥ ज्ञः नस्य लोप शिनविभक्तिकार्यं। पंचस्विति ज्ञाप
कात्। अतो राजभ्यामित्यत्राङीत्याख्वं राजभिरित्यत्र भ्यः इत्येत्वं राजभ्य इत्यत्रैत्वं भीत्येत्वमेवं वेङ्गोरितिन्नोपधालोपे राज्ञि राजनि रिषादन्द्रः कन्नंनः इष्टवानिति यज्वा
कि पूर्वनिपृडाइतिवनिपू प्रत्ययः अम्वयुक्तादित्युक्तत्वान्नोपधालोपः यज्वनः अततीत्यात्मा अतेर्मनिण् इति मनिण् प्रत्ययः अम्वयुक्तादित्युक्तत्वान्नोपधालो
पः आत्मनः सुशु धर्मो यस्यासौ सुधर्मा धर्मादित्यन् अम्वयुक्तादित्युक्तत्वान्नोपधालोपः सुधर्मणः प्रतिदीव्यतीति प्रतिदिवा कनन्तः शसि। अल्लोपः स्वरे इत्यल्लोपे कृते य्वोर्वि
हसे इत्यवृतेन अनयोः समाहारो र्वं तस्मिन् र्वि रेफवकारयोः परतः पदान्ते च धातोरिकारोकारयोर्दीर्घः स्यात् कीदृशयोः हसः परो ययोस्तौ हसपरौ तयो

सू॰
सि॰ चं॰
टी॰ सु॰
४२

हेस्त परयोः प्रतिदीव्नः नाम्नो नइति नलोपे प्रतिदिवभ्याम्॥ ॐ ॥श्वादेः श्वयुवमघोनां वउः स्यात् शसादौ स्वरे ईपि प्रत्यये। ईमाविनीकारे च प्रातिपदिकग्रहणे
लिंगाभिधायिनी प्रत्ययविशिष्टस्यापि ग्रहणमिति परिभाषा विभक्तिनिमित्ते कार्ये न प्रवर्तते अतो युवतीः पश्येत्यादौ नोत्वं अकारसहितस्य वस्योत्वं श्वा कुक्कुरः।
युवा तरुणः। युवन् शब्दे वस्योत्वे कृते दीर्घत्वम् यूनः। मघवा इन्द्रः। वस्योत्वे ऊत्वे च कृते। मघोनः। अवर्णस्त्रसावनञः ननु ऋधातोर्वि प्रत्यये गुणे च
अरिति रूपं तस्माद्धतु प्रत्यये अर्वता वित्यादि सेत्स्यति ऋधातोरेव वनिप् प्रत्यये त्वऽर्वेति सेत्स्यति। रूढिशब्दश्चायं वाजिवाहार्वगंधर्वहयसैंधवसप्तयङ्गस्य
मरोक्तत्वानत श्वार्थोऽपि न भिद्यते किमनेन सूत्रेणेति चेदुच्यते नांततांतयोः सर्वत्र प्रयोगे प्राप्ते सौ परे नञ्युपपदे च नांतस्य प्रयोगोऽन्यत्र तु तांतस्य प्रयोगो भवती

श्वादेः। श्वादेर्व उत्वम्स्यात् प्रोक्तिशसादौ स्वरे ईपीकारे च। शुनः। शुनां श्वभ्याम्। यूनः। यूनां युवभ्याम्। मघवा। मघवानौ। मघवानः। मघोनः। मघोना
। अर्वणस्त्रसावनञः। नञा रहितस्यार्वन्नन्तस्य तृ इत्यन्तादेशः स्यान्न तु सौ। त्रितो नुम्। उकारानुबन्धस्य ऋकारानुबन्धस्य च नुमागमो भ
वति पुंसि पञ्चसु। अर्वन्तौ। अर्वन्तः। अर्वन्तम्। अर्वन्तौ। अर्वतः। अर्वता। अर्वद्भ्याम्। अनञः किम्। अनर्वाणौ। असौ किम्। अर्वा। इतोऽत्पंचसु प
थिन् मथिन् ऋभुक्षिन् शब्दानामिकारस्याकारादेशो भवति पुंसि पञ्चसु शौ च॥

॥तिव्यवस्थार्थं सूत्रम्। त्रितो नुम्। उश्च आच ववरौ वशावितौ यस्य स त्रि
त् तस्य त्रितः उदितः ऋदितः ऋदितश्च नुम् स्यात् सोनः पुंसइत्यतो मंडूकप्लुत्या पुंस इत्यनुवर्तते तेन पुंसि पंचस्वित्यर्थः धातोर्नलोपिनोऽञ्चतेरेव अंचेर्दीर्घश्चे सू॰
त्यतोऽञ्चेरित्यपकृष्यते तेनैव तां चेरिति विभज्य पंचस्विति नुमिति चानुवर्तते अचेरिति निर्देशात् नलोपिनो ग्रहणम् धातोश्चेद् त्रित् कार्यं तर्हि अंचतेरेवे सि॰
तिनियमार्थमिदं तेन। स्रंसादीनामीदृ नुमौ न। ऋदित्वान्नुम् अर्वतौ नञ् तत्पुरुषे तु न। अर्वा। अनर्वा यज्ववत्। इतोऽत्पंचसु पथ्यांटेरित्यतः पथ्यामित्यनुवृत्तं पथ्या टी॰ राम
देरितोऽत्स्यात् पुंसि पंचसु शौ च। शौ। सुपंथानि। पुंसि किं। सुपथी। पनस्थ श्चेति। चादिन् प्रत्ययः पथिन् मंथनेः किम् प्रत्यये मथिन् शब्दः। ऋभुक्षः। स्वर्गवज्रयोस्त सु॰ ४२
त्तना। ध्वदित्यादौ नेदीप्यपि पाठान्तरम् प्राचीनतरपुस्तके

प्रत्यये ऋभुक्षिन् थोनुट्। पथ्यादेः स्थ स्य नुट् स्यात् पुंसि पञ्चसु शौ च यस्येति किम्। ऋभुक्षाः पुंसि किम्। सुपथि। आ सौ। पथ्यादेरिति पदद्वयमनुवर्तते पथ्यादेष्टेरात्स्यात् सि प्रत्यये। सौ किं। पथिभ्यां। पथ्यादेः पथ्यादेर्लोपः स्यात् शसादौ स्वरे ईपि ईकारे च। पथामिति बहुवचनमाद्यर्थे स्त्रियां। ऋणइनीपू ननष्टि लोपः सुष्ठु पन्था यस्याः सा सुपथी। रथ्या। ऋक्पूरित्यप्रत्ययो न। नपूजनेद् इति निषेधात् का प्रत्ययस्तु समासान्तविधेरनित्यत्वान्न। सुष्ठु मन्थाय स्या सा सुमथी नगरी नविद्यते ऋभुक्षा इन्द्रो यस्यां सा अनृभुक्षी नगरी क्लीबे सुष्ठु पन्था यस्मिन् तत्। सुपथि। आत्वं वचनात् लुकि न ननिमित्तमिति निषेधात् धौ नपुंसकानां नस्य लोपो वा हे सुपथिन् इत्यत्र नलोपस्यासिद्धत्वा द्व्यर्णामिति गुणो न द्विवचने। पथामिति टिलोपः। सुपथी। शोत्वं अत्वे नुटि च दीर्घत्वं। सुपन्थानि किंच पन्थानमात्मन इच्छतीति पथीयति ततः क्विप् यत इत्यलोपः यवयोरि

थोनुट्। पथिमथोः स्थस्य नुट् स्यात् पुंसि पञ्चसु शौ च। आ सौ पथिमथ्यृभुक्षां टेरात्वं भवति सौ पन्थाः नौ पन्थानः। हे पन्थाः। पन्थानम्। पथां टेः पथिमथि ऋभुक्षां टेर्लोपो भवति शसादौ स्वरे ईपि ईकारे च। पथः पथा पथिषु। एवं मन्था। ऋभुक्षाः स्त्रियां न्नान्तत्वाद् ईप्। सुपथी। सुमथी। अनृभुक्षी सेना। क्लीबे शोभनः पन्था यस्मिन् वने तत् सुपथि वनम्। धौ नपुंसकानां नस्य लोपो वा हे सुपथिन्। हे सुपथि सुपथी सुपन्थानि। इनां शौ सौ। इन् हन् पूषन् अर्यमन् इत्येतेषां शौ सौ च। अधौ परे उपधाया दीर्घो भवति नान्यत्र दण्डी। हे दण्डिन्। दण्डिनौ दण्डिनः। एवं कलिन् हलिन् यशस्विन् वाग्मिन् प्रभृतयः। वृत्रहा वृत्रहणौ। वृत्रहणः॥

ति यलोपः एकदेशविकृतस्यानन्यत्वादासा वित्यात्वं थोनुडिति नुट् पन्था। अत्वं तु न इत इति न परकरणान्। ख्वौ धीतो रितीप् पथियो। एवं ऋभुक्षाः ऋभुक्षियौ। इनां शौ सौ बहुवचनमाद्यर्थे। अर्थवत्परिभाषाया अनित्यत्वादर्थवतोनर्थकस्यापीनो ग्रहणं उपधाया इत्यनुवर्तते अधा विति च नोपधाया इत्यनेनैव सिद्धे नियमार्थमिदं तदाह। इनादीनामुपधायाः शावेव दीर्घः स्यान्नान्यत्रेति। उपधादीर्घस्यैवायं नियमस्तेन वृत्रहेवाचरतीति वृत्रहायते। कर्तुर्यङ् इत्यत्र ये इति दीर्घो भवत्येव वृत्रहणीत्यत्र जमस्य ङ्किति इत्सेइनियो दीर्घः सोपि नियमेन व्यावर्त्यते उपधादीर्घमात्रापेक्षयानियमविधानादिति। सावितिनुवि

पू॰
सि॰ कौ॰
टी॰ सु॰
४३

टी॰ पं॰ ४। वाग्ग्मीत्यत्र गकारद्वयपाठ एव साधीयान् अन्यथा पाणिनीयशास्त्रेऽणास्य विरुद्धं नास्यात्। वाचो ग्मिनिरित्यत्र तु भाष्योदाहृतगकारद्वयघटकवाग्ग्मीति प्रयोगानापत्तेर्भाष्यकार स्याप्यप्रामाण्यापत्तेश्च सूत्रकारस्तीत्यापिलशाकटायनइत्यत्रागताद्वैतेति पर्युदासात्ते सञ्ज्ञायाः प्राप्तिर्ग्मिनः प्रत्ययादिगकारस्येत्संज्ञामुनिविरोधेन वचनकल्पनाया अन्याय्यत्वमेवेति ध्येयमिति श्रीनन्दनत्रिपाठी पूर्वेण नियमात् सावप्राप्ते योगविभागाभिप्रायेणैव सौसाविति निर्देशोस्ति अन्यथा शिस्योरित्येवावक्ष्यत्। ननु पंथ्याइवाचरतीति पथ्यीनति क्विप् इत्यादौ न्नमांतस्येत्युपधा दीर्घो न प्राप्नोति पथ्यादीनामिन्नंतत्वात् इन्नादीनां शौसावेवेत्युपधादीर्घस्य नियमादिति चेदुच्यते यत्र इन्नामिति सूत्रं प्रवर्तते तत्रैवायं नियमः यथा दंडीवाचरतीति दंडीनति क्विपि वृत्रहणति पूषणति अर्यमणति इति दंडोस्यास्तीति दंडी मांतोपधादिनीन् शौ बहवो दंडिनः संति येषां तानि बहुदंडीनि मुशलमस्यास्तीति मुशली हलमस्यास्तीति हली रेवतीरमणो रामः कामपालो हलायुध इत्यमरः यशोऽस्यास्तीति यशस्वी विन् वागस्यास्तीति वाग्ग्मी ग्मिनि वृत्रं हतवानिति वृत्रहा क्विबंतः वासवो वृत्रहा हरिः पूषेत्यमरः। अवकुप्वंतरेपीति णत्वं वृत्रहणौ॥ ॥ हनो घ्नेहनः। घ्ने इति च्छेदः आदिस्वरस्येत्यतो ञ्णित्यनुवृत्तं ञ्णिति णिति प्रत्ययेन कारे च परे हंतेर्हस्य घ

हनो घ्नः। हन्ते र्हकारस्य घो भवत्यव्यवधानेन नकारे ञ्णिति णिति च परे। घसंयोगेण णत्वन्न। वृत्रघ्नः। वृत्रघ्नाः। वृत्रहभ्याम्। एवम्पूषन् अर्यमन्। संख्याशव्दाः॥ पञ्चन् प्रभृतयो बहुवचनान्ताः त्रिषु सरूपाः। जश्शसोर्लुक् षकारनकारान्तसंख्यायाः॥ परयोर्जश्शसोर्लुक्। पञ्च २। पञ्चभिः। पंचभ्यः २। षष्णः। षकारनकारान्तसंख्यायाः॥ परस्यामो नुडागमो भवति पञ्चानाम् परमपञ्चानाम् गौणत्वेन लुड्न्नुटौ। प्रियपञ्चा। प्रियपञ्चानौ। प्रियपञ्चानः। प्रियपञ्चः। प्रियपञ्चा। एवं सप्तन् नवन् दशन् प्रभृतयः॥

॥ स्यात् अल्लोपः स्वरे इत्यल्लोपे घत्वे च कृते अवकुप्वंतरेइति णत्वे प्राप्ते आह। घसंयोगेण णत्वं न। घकारात्परस्य णत्वं न भवति। वृत्रघ्नः। वृत्रघ्नाः। पूषा सूर्यः। अर्यमा। रविः। जश्शसोर्लुक्। संख्याया इति ष्णइति चानुवर्तते संख्यायाः किम्। विप्रुषः। पामानः। ष्णइति किम्। चत्वारः। शतानि सहस्राणीत्यत्र संनिपातपरिभाषया जश्शसोर्लुग् न। तथाहि। संनिपतनं संनिपातः आनन्तर्यं सन्निपातो लक्षणं कारणं यस्य स संनिपातलक्षणो विधिस्तद्विघातस्य कारणविघातस्याऽनिमित्तं न प्रयोजकः यमुपजीव्य यो विधिः प्रवृत्तः स तस्योपजीव्यस्य विरोधं न करोतीति परिभाषार्थः शिमाश्रित्य प्रवृत्तो नुम् शेर्विघातको न। षणः षष् च नश्च अनयोः समाहारः ष्णं तस्मात् संख्याया इत्यनुवर्तते ष्ण इति तस्या विशेषणं विशेषणेन तदंतविधिः संख्याया राम ४३

यज्वनां। कुइतिकिं। त्रिंशतां पंचाशतां। नलोपेनोपधाया इति दीर्घे च पंचानाम्। प्राधान्ये परमाश्च ते पंच च परमपंच तेषां गौणत्वे न लुग् नुटौ गौणे ष्णांतसंख्यायाः जश्शसोर्लुक्। नामि तु नुट् नासंख्यावाचित्वाभावात् प्रियाः पंच यस्य सप्रियपंचा आमि प्रियपञ्चाम् जकारद्वयमध्ये चकारः॥ ॥ अष्टनो डौ अष्टन इत्येकवचनेन तु त्रेरितिवत् अल्लोपः स्वरे इत्यस्याप्रवृत्तिः स्त्रियां जश्शसोरित्यनुवर्तनेनैवा स्यादिति वा शब्द उभयत्र संबध्यते काकाक्षिगोलकन्यायेनेति। नानुषक्ती निर्दिष्टत्वात् तस्य डौ भवति। न चानेकवर्णत्वात् सर्वादेशः स्यात्। नानुबंधकृतमनेकवर्णत्वमित्युक्तत्वादुच्यते। डित्वसामर्थ्यान्नोक्तदोषस्तथाहि अंत्यादेशे सति जसि अष्टना विनिशसि स्त्रष्टौ विति प्राप्नोति नित्त्वान्तरेण डित्त्वं सिद्धं अतो डित्करणसामर्थ्यात् सर्वादेशः लुकोपवादोयमिति सर्वादेश इति वा डौ शिति वा सुवचं डौत्वं हि लु

अष्टनो डौ वा अष्टन् शब्दात्परयोर्जश्शसोर्वा डौ भवति अष्टौ अष्ट अष्टौ अष्ट वा सु। अष्टनस्स कार भकारादिषु विभक्तिषु वा त्वम्भवति अष्टाभिः। अष्टभिः। अष्टाभ्यः। अष्टभ्यः २॥ अष्टानाम् प्रिया अष्टौ यस्यासौ प्रियाष्टा। प्रियाष्टानौ प्रियाष्टानः प्रियाष्टः। प्रियाष्टा प्रियाष्टाभ्याम्। प्रियाष्टो राजवत्सर्वं हाहावच्चापरं हसि सुगण् सुगणौ सुगणः। सुगणम् सुगणौ सुगणः। सुगणट्सु भुत् भुद्भ्याम्। भुत्सु। राक् रागौ रागः। रागः रागभ्याम् राक्षु सुककुप् सुककुबौ सुककुभः। सुककुब्भ्याम् सुककुप्सु॥

ग नुटा विवप्राधान्ये एवं भवति न तु गौणत्वे सुप्यष्टभ्यांतु टचेत्यनेनसप्तन् अष्टन् शब्दौ निष्पन्नौ वा सुस्वीत्यपकृष्यते तेन स्यादयो विशेष्यं तेन वा आ आ सु इति छेदः सकार भकारादौ स्यादौ परे अष्टन आत्त्वं वा भवतीति फलितोर्थः। इत आरभ्य संख्याया इति निवृत्तम् व्याख्यानात् तेन गौणत्वेपि स्यादात्त्वम् स्यादावितिकिं अष्टभार्यः। अष्टसेवकः स्त्रीति किं प्रियाष्टानौ प्राधान्ये परमाष्टौ गौणत्वे प्रियाअष्टौ यस्य स प्रियाष्टा आत्त्वाभावे राजवत्। शसि अल्लोपः स्वरे इत्यकारलोपे ष्टुभिष्टुरिति णत्वं प्राप्तम् असिद्धं बहिरंगमंतरंगे इति परिभाषया नाशस्तन्निमित्तकत्वेन बहिरंगस्याल्लोपस्यासिद्धत्वात्। पूर्वं पूर्वं मंतरंगमिति स्वीकारात्। आत्त्वपक्षे प्रथमेकवचन प्रियाष्टाः हाहाशब्दवत् प्रियाष्टनूशब्दस्याऽऽत्त्वाभावपक्षे सर्वं रूपं राजवत्। आत्त्वपक्षे तु हसादावपरं रूपं हाहावत् इति नांताः ॥ ॥ ॥ ॥

पू॰
सि॰ चं॰
टी॰ सु॰
४५

सुष्ठु गणयतीति सुगाण्।गणयतेर्विण्प्रत्ययः।ह्रलोरिति टुकिः सुगण् सुशसेच परस्मै इति हितीये।सुगणट् सुट्।नादि ति धुटि।सुगणट्त्सु क्वि प्रत्यये तु सुगाणत्त्रमस्य कि नित्य से इति दीर्घे कर्ते व्येअस्तो पजिलोपयोः स्थानिवद्भावो न शङ्क्यः दीर्घविधौ तन्निषेधात् इति णान्ताः।बुध्यतेः क्विप्।आदिजवानामिति भः जवत्व चपत्वे भुत् भुद्र जवत्वे भुद्भ्याम् चपत्वे भुत्सु इति धान्ताः।एघृ सामर्थ्ये राघते इति राकुक्विबन्तः इति धान्ताः सुष्ठु ककुप् यस्मिन् सुककुप् दिश सुककुभः काष्ठादित्यमरः इति भान्ताः॥ ॥युजेः पञ्च सुनुम् न समासे इति च युजिर् योगे इत्यस्य धातोः पञ्च सुस्वादिषु नुम् स्यात् न तु समासे इति च न।यथा युजी कुलो युजिरिति धातुपाठ पठितेकार विशिष्टस्य ग्रहणं न तु धातु निर्देशे परकृतस्य तेनेह नुमन्।युज्यते समाधत्ते इति युक्।युज समाधौ दैवादिक आत्मनेपदी।दिशां बहुवचनमाद्यर्थं तेन दिश

युजेऽसमासे सुनुम्।न समासे इति च।दिशाम्।दिश दृश स्पृश सृज धृष पृच्छ त्विज जस्ज जुत्व युज्य सृज अञ्च उष्णिह्।आदीनां कुत्वं स्यात्। दोरसे पदान्ते चासं योगान्तस्य लोपः।युङ्।युञ्जौ।युञ्जः।युञ्जम्।युञ्जौ।युजः।युजा।युग्भ्याम्।समासे तु सुयुक्।चोः कुः।चवर्गस्य कवर्गो भवति धातोर्झसे नाम्न श्वर से पदान्ते च।समाध्यर्थस्य न नुम्।युक्।खन्।खंजौ।खञ्भ्याम्।खन्सु।छ्शषराजादेः षः।सम्राट्।सम्राड्।सम्राजौ।सम्राजः।देवेट्।देवेड्।देवे जौ।देवेजः।परिमृट्।परिमृड्।परिमृजौ।परिमृजः।विश्वसृट्।विश्वसृड्।विश्वसृजौ।विशस्य वसुराटोर्दीर्घः विश्वावसुः। विश्वाराट्।विश्वराजौ।वि
((श्वाराड्भ्याम्।विश्वाराट्सु।विश्वराट्त्सु ॥

१ दृश २ स्पृश ३ दधृष ४ क्रत्विज् ५ क्रुंच ६ युंज् ७ स्रज् ८ अंच ९ उष्णिह् १० गृहणंते दिश दृश स्पृश दधृष पृच्छ त्विज् स्रज जो षत्वे प्राप्ते कुंच युंज् अंच मप्राप्ते उष्णिह् ढत्वे प्राप्ते अयं कुत्व विधिः कुरित्यनुवर्तते चोः कुरित्यतः युनक्तीति सिलोपे संयोगान्तलोपे च नस्य कुत्वेनानुनासिको ङकारः।युङ्।नश्चापदान्ते इति नुमोनुस्वारे परसवर्णः तस्यासिद्धत्वाच्चोः कुरिति कुत्वं न।युञ्जौ।समासे तु सुष्ठु युनक्तीति क्विप् न नुम्।चोः कुः इसे किम् तन्नौ।नाम्नः किम् वच्मि पदान्ते किं वाचि धातोर्झसे यथावक्ता झसे किं वच्मि।कुत्वे।सुयुक्।समाध्यर्थस्य युजेर्नुम्।युक्।खजतीति।खजि गति वैकल्ये क्विबन्तः संयोगान्तलो पे खन्।संराजते इति षत्वड॰त्वे जवनत्व चयत्वे च सम्राट्

एम
४५

निक्किपि यजादित्वात्संप्रसारणे रुत्वे चरे वेट् विश्वंसृजतीति विश्वसृट् क्किन्नः दिशामिति कुत्वं न सृजि दृशोरिति सूत्रे रज्जुसृड्भ्यामिति भाष्यप्रयोगात् यद्वा सृजियज्योः कुत्वापवादः षत्वविधिरेवास्त्वक् ऋत्विक् शब्दयोस्तु दिशामित्यनेन कुत्वमेव परिमार्ष्टीति परिमृट् विश्वस्य वसुराटो दीर्घः विश्वशब्दस्य दीर्घः स्यात् वसुशब्दे राट्शब्दे च परे विश्वं वसु द्रव्यं यस्य स विश्वावसुः राडिति ङिशब्दस्य स्वरूपोपलक्षणार्थमविवक्षितं च षत्वं विश्वस्मिन् राजते इति विश्वाराट् ॥ ६ ॥ स्कोरादो श्च स्को रादि शब्दस्य वयवत्वा विनैन ससं बंधित्वादवयव्या काङ्क्षायां संयोगेनि संबध्यते। संयोगशब्दस्यापि हससमुदायवाचित्वादवयवार्थकत्वे नाऽवयव्याकांक्षायां नाम्नो धातोश्चेति संबध्यते संयोगांतलोपापवादः इसंत्वं पूर्वोविधिः इसे भ्रस्ज पदांते अवाभ्रट् आ यो किंद स्यति नंस्यति भृज्जतीति

स्कोरादो श्च। संयोगाद्योः सकारककारयोर्लोपो भवति धातोर्झले नाम्नश्च रसे पदान्ते च भृट् भृड् भृज्जौ भृज्जः इसवट् इसवड् इस इश्चौ विभ्राट् विभ्राजौ विभ्राड्भ्याम् विभ्राट् सु ऋत्विक् ऋत्विगृत्विजौ ऋत्विक्षु ऊर्क् ऊर्जौ ऊर्क्षु तः स्यदादेस्तस्य सत्वम्भवति सौ परे स्यः त्यौ त्ये सः नौ ते परम सः सञ्ज्ञायां गौणत्वे चात्वसत्वे न त्यत्त्यदौ अतिनत्यत् अनित्यदौ यः यौ ये एषः एनौ एते

(क्किप्) ग्रहामिति संप्रसारणं सोप

रत्वात् षत्वे स्कोरिति सस्लोपे चस्तिलोपः भृट् सस्य चुत्वेन शः शस्य स्वेजबाड् इति जः भृज्जौ वृसंवृश्चतीति क्किपि ग्रहामिति संप्रसारणं इच्छशेति षत्वं स्कोरिति सलोपः जवत्वं च पत्वे वृसद् वृड् सुपिटनादिति धुट् न तश्च षत्वं च सत्वे तु चानेषु वकुमुचितः विशेषेण भ्राजते इति विभ्राट् षत्वविधौ राजिसाहचर्यात् टुभ्राजृ दीप्ताविति फणादिरेव गृह्यते । यत्तु राजृभ्राजृ दीप्ताविति तस्य कुत्वमेव विभ्राक् विभ्राग् विभ्राग्भ्यामित्यादि ऋतौ यजतीति ऋत्विगुपपदे यजेः क्किप् यजादित्वा त्संप्रसारणं कुत्वम् ऋत्विक् ऊर्ज बलप्राणनयोः अस्माच्चुरादिर्ज्यन्तात् क्किपि णिलोपः ऊर्जयतीति सभिन्नस्येति नियमात् न संयोगान्तलोपः ऊर्क् ऊर्ग् तःस्यदादेरित्यतःस्यदादेरिति सोः स इत्यतः स इति सावितिचानुवृत्तं त्यदादेः किमन्तात् प्राधान्ये परमसः संज्ञायां गौणत्वे चात्वसत्वेन अत्वसत्वयोः सर्वे

वृ॰ स॰ वृ॰ ४

कार्यत्वादत्वं सत्वं च संज्ञायां गौणे च न प्रवर्त्तेते संज्ञायां त्यदाद्यन्तर्गतो गौणे त्वमतिक्रान्तो ऽतित्यद् ॥ ८० ॥ इदमेतदोरित्यन्वादेशे एनद् आदेशः एनमित्यादि इति दोनाः अग्निं मथ्नातीति क्विपि नो लोप इति न लोपः । अग्निमत् इति थो नाः प्रत्यं चतीत्यञ्चेः क्विपि कृते नो लोपः हसान्तस्येति किम् नीयते उपधाभूतस्येति किम् हन्यते पूजार्थाञ्चतेर्न पूजार्थवाचिनोऽञ्चतेरुपधाभूतस्य नस्य लोपो न भवति क्विपि निडि निचं निरुपपदात् क्रुञ्चेः क्विपि नं निर्गत उपपदेभ्यः निरुपपदस्तस्मात् उपपद रहितस्य क्रुञ्चेरुपधाभूतस्य नस्य लोपो न भवति क्विपि क्रुञ्च कौटिल्याल्पीभावयोः अंचेः पुंसि पंचसु नुम् आगमः स्यात् पुंसि पंचसु नलोपे पुनर्नुमि कृते प्रत्यन् त्स् इति स्थिते संयोगान्तलोपे सिलोपे च नुमो नकारस्य दिशामिति क्रुत्वेन ङकारः प्रत्यङ् । अनुस्वारपरसवर्णौ प्रत्यञ्चौ अंचेर्दीर्घ

अन्वादेशे । एनम् । एनौ । एनान् । एनेन । एनयोः । अग्निमत् । अग्निमथौ । अग्निमद्भ्याम् । अग्निमत्सु । प्रत्यञ्चतीति क्विपि कृते । नो लोपः । धातोर्हसान्तस्योपधाभूतस्य नकारस्य लोपः क्विनिच परे पूजार्थाञ्चतेर्न निरुपपदात् क्रुञ्चेः क्विपि न क्रुङ् क्रुञ्चौ क्रुङ्भ्याम् । क्रुङ्क्षु क्रुङ्षु क्रुङ्त्सु अंचेः पुंसि पञ्चसु नुम् दिशाम् प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः । प्रत्यञ्चम् प्रत्यञ्चौ अंचेदीर्घश्च नलोपिनोऽञ्चतेरकारस्य लोपः पूर्वस्य च दीर्घः शसादौ स्वरे परे तद्धितयस्वरयोरीपीकारे च । प्रतीचः । प्रतीचा । प्रत्यग्भ्याम् । प्रत्यक्षु । तिर्यङ् तिर्यञ्चौ तिर्यञ्चः ॥

लुप्तनकारस्यांचतेरतो लोपो भवति ईपि इकारे च । प्रतीचो न द्धितयस्वरयोः प्रतीच्यः । प्रतीचीनः अंचेरिति नायमिक् प्रत्ययः । किंतूच्चारणार्थो ऽयमिकारः नलोपनिर्देशो ज्ञापकः इक्कित्वात्तल्लोपे कृते ऽचेरित्यस्योक्तार्थे ऽज्ञापनात् । ननु पूर्वस्येति कस्माल्लभ्यं उच्यते दीर्घश्रुत्योपस्थितः स्वर एवात्र स्थानी शसादौ स्वरे इति लोपदीर्घयोर्निमित्तं सप्तमीनिर्देशात् पूर्वस्याऽव्यवहितस्य स्वरस्य दीर्घप्राप्तेर्येन नाव्यवधानं तेन व्यवहितेऽपीति वचनप्रामाण्यात् । चकारेण व्यवहितस्याप्यत्र दीर्घः । अचेरिति लोपः । स्वविषये ऽन्तरंगोऽपि इयमिति यकारो न । अकृतव्यूहा इति परिभाषया । प्रतीचः तिरोऽञ्चतीति सहादेरिति तिरसस्तिरिः तिर्यङ् ॥ ८१ ॥ ८२ ॥

तिरश्चादयः सिद्धरूपनिर्देशो निपातनं। एतेन निपात्यते ईपि ईकारे चं तिरश्चीन द्धितस्य स्वरे यकारे च। तिरश्चीनः। उदीच्यः। तिरश्चादिरिति सूत्रणीयम्। आदिशब्दा।
दुदीच इति बहुवचनं तु व्यर्थो। तृतीयस्याभावात्। एदादयः षोडश एदेशाः। न तु एच्यक् शब्दादिति पक्षाश्रयणे तु बहुवचनस्य सार्थकत्वं बोध्यम्। उदं चतीति उदङ्
ऋतो दीर्घो न ऋकारस्य दीर्घो न भवति लुप्ताकारनकारे ऽचतौ परे पित्रृचः। सहाञ्चतीति सहादेरिति सहस्य सध्रिः। सध्र्यङ्। समं चतीति सहादेरिति समः समिः।
सम्यङ्। प्रकर्षेण अंचतीति प्राङ्। पूजार्थस्याचतेस्तु प्रत्यंचति पूजयतीति क्विपि पूजार्थाचतेरिति न लोपाभावः। अत एव नुम्। प्रत्यङ्। शसि न लोपाऽभावादका
रलोपो न प्रत्यंचः। सुपि प्रत्यंच् सु इति स्थिते दिशामिति कुत्वात्। प्राक् संयोगांतस्येति च लोपेन सकुत्वे न ङकारे च कृते शसेङ्णोरिति कुक् षत्वं प्रत्यङ्क्षु शसे च

तिरश्चादयः। तिरश्चादयो निपात्यन्ते शसादौ स्वरे तद्धितयस्वरयोरीपीकारे चं तिरश्चां तिर्यग्भ्याम्। तिर्यक्षु। उदीचः। उदग्भ्याम्। उदक्षु। पित्ररम
च्चतीति पित्र्यङ्। पित्र्यञ्चौ। ऋतो दीर्घो नं पितृचः। पित्र्यग्भ्याम्। पित्र्यग्भिः। पित्र्यक्षु। सध्र्यङ्। सध्रीचः। सम्यङ्। समीचः। प्राङ्। प्राचः। पूजायां तु प्रत्य
ञ्चः। प्रत्यञ्चा। प्रत्यङ्भ्याम्। प्रत्यङ्क्षु। प्रत्यङ्षु। प्रत्यङ्खषु। उदञ्चः। उदङ्भ्याम्। तिर्यञ्चः। तिर्यङ्भ्याम्। सम्यञ्चः। सध्र्यञ्चः। प्राञ्चः। प्राञ्चा।
सहादेः स्यादिः अमुमञ्चतीति। अमुमुयङ्। अमुमुईचः। अमुमुयग्भ्याम्। अदमुयङ्। अदद्र्यङ्। पूजायां तु। अमुमुयञ्चः। अमुमुयङ्भ्याम्।
अदमुयञ्चः। अदद्र्यञ्चः। मरुत्। मरुद्भ्याम्। त्विनतो नुम्॥

॥ पक्षे इति पक्षे खकारः। प्रत्यङ्खषु। कुगभावे प्रत्यङ्षु। एवं पूजार्थे तिर्यङ्ङादयः। विष्वग्दे
वयोश्च टेरद्र्यं चतौ वप्रत्यये। वात्। अदसो ग्रहणं अनयोरदसश्च टेरद्र्यादेशः स्यात् वप्रत्ययांते चतौ परे। अमुमंचतीति विग्रहे अदस् अच इति स्थिते अद्र्यादे
शे अदद्रि अच इति यत्वं अदसोसेर्दादुदोमः असेरिति इकार उच्चारणार्थः। असकारांतस्यादसो दात्परस्य उदूतौ भवतः दस्य मश्च उ इति ह्रस्वदीर्घयोः समा
हारद्वन्द्वः ह्रस्वव्यंजनयोर्ह्रस्वो दीर्घस्य च दीर्घो भवति असांतस्येति किम्। अमुमान्मनइच्छतीति अदस्यति। दात्परस्येति किम्। अमुया इत्यत्रांतस्य यस्य मा भूत्
इकाराकारयोरीकारयोरीकाररकारयोश्च मुत्वे अमुमुयङ् शसि। अचे रित्यन्तो लोपे दीर्घे च अमुमुईचः। मुत्वस्यासि

हल्त्वाच्चवत्वं। अंत्यबाधेंत्यसदेशस्येति परिभाषां वदतां मते परस्य दकाररकारस्यैव सुत्वं। अदसइ तिस्थाने षष्ठी एवंहि षष्ठी निर्दिष्टस्येति परिभाषोपतिष्ठते अदसोयों त्यः सत्यान्त्यस्य सोऽदसौ त्योन एव मंत्यबाधेंत्य समीपस्य भवतीति दकाररकारयोर्मुत्वं। अदमुयङ्। अः अकारः सेः सकारस्य स्थाने यस्य सः त्रसिरिति व्याख्यानेन्त्य दाद्यत्वविषये एव सुत्वं नान्यत्रेति पक्षे उभयत्र सुत्वं नास्त्यदद्र्यङ् वार्तिकहृतोक्तं च। अदसो द्रेः पृथक् मुत्वं केचिदिच्छंति लत्ववत्। केचिदंत्यसदेशस्य नेत्येके से हि हस्य ते १ अदसो दकाररकारयोरिदं द्रेर्दकाररकारयोश्च पृथङ्मुत्वं केचिदाचार्या इच्छंति लत्ववत् यङं तस्य चली क्लृप्यतेइत्यस्य उभयोः कृपो रो ल इत्य नेन यथा लत्वं तथेत्यर्थः। अंत्यसदेशस्य दकाररकारस्य मुत्वं केचिदिच्छंति अः अकारः सेः सकारस्य स्थाने यस्य सोऽसिस्तस्यासेस्त्यदाद्यत्वविशिष्टस्यादसो हि मुत्वं

त्सम्महतोऽधौ दीर्घस्सौ च महान्। महान्तौ महान्तः हे महन्। द्विरुक्तानां जक्षादीनां च शतुर्नुम् न शौ वा ददत्। एव ञ्जक्षत्। जाग्रत्। दरिद्रत्। चकासत्। शासत्। अत्वसो स्सौ अत्वन्तस्य धातुभिन्नासन्तस्य चोपधाया दीर्घो भवति सौ वधो भवान्। भवन्तौ भवन्तः हे भवन् चन्द्रमाः। चन्द्रमसौ अधात्वसन्तस्य किम्। चीवराणि वस्ते असौ चीवरवः। शत्रन्तस्य तु अत्वन्तत्वाभावान्न दीर्घः भवन्। भवन्तौ पचन्। दीव्यन्॥ इत्यस्य ते इति केचिद्दृद्ह्य

नि तन्वते उभयोर्मुत्वं नन्यदाद्यत्वाभावात् एवं चामुद्र्यङ् इति केषांचिदुदाहरणं तद्वाच्येऽनुक्तत्वादुपेक्ष्यमिति भावः ९ इति चांताः ॥ मरुतौ पवनाऽमराविन्यम रः महपूजायां मस्त्राने पूज्यते इति महान् कर्मण्यऽतृप्रत्ययः ऋदित्वान्नुम् सम्महत इति दीर्घः सिलोपे संयोगांतलोपे च महान्। द्विरुक्तानां जक्षादीनां च शतुर्नुम् न शौ वा। द्विरुक्त धातुभ्यो जक्षादिभ्यश्च परस्य शतुर्नुम् न स्यात् शौ परे तु वा ददानीति दाञः शतृप्रत्यये अपृत्लादेरित्य पो लुक् द्वित्वं च। ह्रस्व इति पूर्वस्य ह्रस्वः दादेरित्यालोपः ददत् एवं जक्षतीति जक्षत्। जागर्तीति जाग्रत्। दरिद्रातीति दरिद्रत्। दरिद्राते रित्यालोपः चकास्तीति चकासत् शास्तीति शासत् अत्वसोः सौ अतुश्च असूच तौ अत्वसौ तयोः नोपधाया इत्यत उपधाया इत्यनुवर्तते अनुरिति मतुबतुक्तवत्वादीनामवयवो गृह्यते केवलस्य प्रत्यये स्याभावात् असस्त्वर्थवा
नन र्थकोपि अतु इत्युकारस्तु वन्त्यस्यानुकरणाच्छत्रंतस्य दीर्घो न अत्वं तस्य धातोरपि॥ … ॥ … ॥ … ॥ … ॥ … ॥ … ॥

शत्वं तस्य दीर्घेन अत्वं तस्य धातोरपि दीर्घः। गोमंतमिच्छतिगोमा निवाचरतिवा इति इच्छार्थ यंनात् आचार क्विबं ना ह्रा कर्तरिक्विप् ततो अल्लोपय लोपौ गोमा
न् अधातोरित्यनुवर्त्त्याऽसंशेयो ज्यं ते ना संतस्यानाम्न उपधायादीर्घोऽधो सौ अत्र तएव चानर्थकस्याप्यसौ ग्रहणम् भातेर्ई वतुरिति डवतुप्रत्यये भवच्छब्दः
नित्यमपि नुमं बाधित्वा वचनसामर्थ्याद्दादीदीर्घः। ततोनुम् भवान् शसादौ महद्वत् असंतस्य चेद्रमस्शब्दः। धात्वसंतस्योपधाया दीर्घेन यथा वस आच्छादने
क्विप् चीवरवः भवतीति शतृप्रत्ययांतस्याऽतुइत्सुकारानुबंधत्वाभावान्न दीर्घो न च्वितोनुमितिनम् भवन्। एवं पचतीति पचन् दीव्यतीति दीव्यन् अत्वं तस्या धातोर्य
था धीरस्यास्येति धीमान्। अत्रस्यार्थे मतुः इति मतुः। मघशब्दात् इतुप्रत्ययेम घवच्छब्दः। उपधादीर्घादि प्राग्वत् हविर्जक्षिति निः शेको मखेषुमघवान् सावितिभट्टिः व

धीमान् हे धीमन् धीमन्तौ मघवान् मघवन्तौ मघवद्भ्याम्। गुप् गुबौ गुपौ गुपः गुब्भ्याम्। नादृक् नादृग् नादृशौ नादृशः नादृक्षु। एवं यादृगादयः नसेऽक्को
वा प दान्ते स्यादौ द्वासेचं नक् नट् नड्। नशौ नशः नग्भ्याम्। नड्भ्याम्। नक्षु नट्सु। विट् विड् विशौ। विशः स्पृक् स्पृग् स्पृशौ स्पृशः। घृतस्पृक्।
उदकपूर्वस्यन कुत्वम् उदकस्पट् उदकस्पड् उदकस्पृशौ दधृक् दधृग् दधृषौ दधृक्षु रत्नमुट् रत्नमुड् रत्नमुषौ रत्नमुड्भ्यां षष्शब्दो नित्यं बहुवचनान्त
॥ त्रिषु सरूपः

त्वं तत्वा भावे महेर्ह स्यचोदुगागमः कन्प्रत्ययश्चैन्येत त्रिनयेनि पातनात्कते मघवन् शब्दः श्वादेरित्यत्रोक्त एवइति नांतः। गोपायतीति गुप्।
क्विबंतः आयादयोऽनपीतिविकल्पिकत्वादिहाय प्रत्ययाभावः आयप्रत्ययपक्षे तु पतत्यल्लोपे यलोपे च गोपा इति रूपं बोध्यमिति यांताः। तमिवपश्यतीति ह शेःहक्कसकावितिचकारात् क्विप् आगुर्वादेरित्यात्वे दिशामिति कुत्वं नादृक् नशेः कुत्वं तस्य शोवा स्यान् स्यादौ इसेपदांते चं नश
अदर्शने क्विप् षत्वं जत्वं चपत्वे नट् नड् कत्वे तु नक् विशप्रवेशने क्विप् षत्वं जत्वं चपत्वे विट् विड् घृतं घृतेन वा स्पृशतीति घृतस्पृक् उदकपूर्वस्य न कुत्वं उ
दकपूर्वस्य स्पृशेस्तु दिशामिति कुत्वं न उदकं स्पृशतीति षत्वं उदकस्पट् इति शांताः। त्रिधृषा प्रागल्भ्ये अस्मात् क्विप् दिखं निपातनात् दिशामिति कुत्वं धृष्णोतीति

इह य कुंतुषम्स्तेये रत्नानि मुष्णातीति रत्नमुट् रत्नमुड्॥

पू. सि. चं. टी. सु ४७

जश्शसोरिति जश्शसोर्लुक् डत्वम्। जबत्वचर्त्वे षड्। षट्। डत्वे षड्भिः। आमिष्ण इति नुटि कृते षस्य डत्वं नस्य च ष्टुत्वं। ष्णः ङकारस्य चये ष्टुत्वं न भूतत्वा दपदान्तत्वा
च्च जमेजमावेत्यस्याऽप्राप्तौ समानारंभः यदागमास्तद्गुणीभूता इति परिभाषया तुटः प्रत्ययावयवत्वात् प्रत्ययत्वमेइत्यनेन नञमन्वस्वीकारे व्यर्थमिदं टनादिति धुटि। षट्
त्सु। नन्दते ष्ट्यं विधिर्वाच्छितः। परमाश्च ते षट् च परमषट् ते षां परमषण्णां षड् इत्यर्थे प्राधान्ये एव लुग् नुटौ न तु गौणत्वे प्रियाः प्रियाणि वा षट् येषां ते प्रियषषस्तेषां प्रियष
षां। दोषां जबत्वचर्त्वविसर्गाणामपवादः बहुवचनमात्रार्थं शाम्यतीति दोः दमेर्डोसिति डोस् प्रत्ययः डित्वाट्टिलोपः भुजबाहु प्रवेष्टो दोरित्यमरः। पाददन्तेति वा
दोषन्नादेशः शसादौ अल्लोप इत्युपधालोपः। णत्वं। दोष्णः विसर्गनुम् स्थानिकानुस्वारव्यवधानेपि क्विलान्परस्य सस्य सः क्विलादिति पंचमीनिर्देशाद् द्व्यवहित

जश्शसोर्लुक् षट् षड् ष्णः ङकारस्य णो भवति नामि परे षण्णाम्। षट्सु षट्त्सु परमषट् परमषण्णाम् गौणत्वे तु प्रियषट् प्रियषषः। प्रियषषां
। दोषां रः दोषादीनां रो भवति रस्य पदान्ते च दोः दोषौ शसादौ वा दोषन् दोष्णः दोर्भ्याम्। दोषभ्याम्। शसविसर्गनुम् स्थानिकानुस्वारव्यवधानेऽपि
क्विलान्परस्य सस्य षः दोःषु दोष्षु दोषसु ष्वोर्विहसे पिपठीः पिपठिषौ पिपठीर्भ्याम्। पिपठीःषु पिपठीष्षु विविट् विविड् विविशौ विविशः नट् न
ड् नशौ नशः गौरट् गोरड् गोरक्षौ गोरक्षः नक्षि रक्ष्यो संयोगान्तलोप इत्येके नक् रगोरक् र॥

॥स्याप्राप्तौ वचनं एतद्व्यवधानेपि आभ्यां परस्य सस्य षः
स्यात्। सुपि रत्वविसर्गयोः कृतयोः शर्षसे वेति विकल्पात् पक्षे सकारस्तस्य षत्वं सुपः सस्य तु ष्टुत्वं दोष्षु विसर्गपक्षे विसर्गनुमिति षत्वं दोःषु नाम्नो न इति नलोपे दो
षु सु। नुम्स्थानिकाऽनुस्वारेति व्याख्यानान्नेह। सुहिन्सु पुंसु पिपठिषतेः क्विपि यनद इत्यल्लोपे कृते हलि ते ति साद्युत्पन्नो पिपठिष् सि इति स्थिते परत्वाद्रेफे कृते सि
लोपे च दीर्घः पिपठीः विश् प्रवेशने ऽस्मात्सः नानिटि सेइ ति गुणाभावः हृत्वादिः विवक्षते: क्विप् स्कोरिति कलोपः जबत्वचर्त्वे विविट् विविड् नक्षतेनूक रणेऽस्मात्
क्विप् स्कोरिति कलोपे 'नट् नड्' गोरक्षतीति क्विप् स्कोरिति कलोपे गोरट् गोरड् नक्षि रक्ष्योः संयोगान्तलोप इत्येके स्कोरिति कलोपो न किं तु संयोगान्तलोप इत्यर्थः॥ ६॥ राम. ४७

कलोपे कुत्वमसिद्धं। स्कोरिति कलोपे कर्तव्ये चोः कुरिति कुत्वस्यासिद्धत्वं वक्तव्यं अन्यथा स्कोरिति कलोपः स्यादित्यर्थः। पक्तुमिच्छतीति पिपक्ष संयोगांतलोपः व
क्तुमिच्छतीति विवक्ष दह भस्मीकरणे दादेरिति घः आदिजवानामिति घः दग्धुमिच्छतीति दिधक्ष इति धांताः पिसगतौ सुष्ठु पेसतीति सुपीः तुस खंडने सुष्ठु तोसः
तीति सुतूः क्विंवंतः वेतीति विदेर्वसुरिति शतृस्थाने वसुः अदादित्वात् शपो लुक् अपितादिर्ङिदिति ङित्वान्नोपधागुणः उगित्वान्नुम् सम्महतइति दीर्घः संयो
गांतलोपस्यासिद्धत्वान्नलोपो न। विद्वान् वसोर्वउः अचां स्यामित्यनः शसादाविति वा दीपोरित्यनः ईईपोरिति चानुवर्तनेन तद्धितपस्वरमनुष्विति च व्याख्याना

कलोपे कुत्वमसिद्धम् पिपक् पिपक्षौ पिपक्षः पिपक्षु एवं विवक् दिधक् सुपीः सुपिसौ सुपिक्षु एवं सुतूः विद्वान् विद्वांसौ विद्वांसः हे विद्वन् वसोर्वउः
।वसोर्वकारस्य उत्वं भवति शसादौ स्वरे तद्धितपस्वरमनुष्वपीकारे च विदुषः विद्वद्भ्याम्। विद्वत्सु सेदिवान्। वसोत्वे इडभावः सेदुषः। सेदि
वद्भ्याम् ऊषिवान्। ऊषुषः ऊषिवद्भ्याम्। शुश्रुवान्। नुधातौ शुश्रुवुषः शुश्रुवद्भ्याम् अस्महच्छ्वसाहचर्यात् धातोर्न संग्रहस्तेनेह। — ।सु
हिन्। सुहिंसौ सुहिन्भ्याम्। सुहिंसु ध्वत्। ध्वंसौ वसोरसे ध्वद्भ्याम्। एवं स्रत्। पुंसोऽसुङ् पुंसोऽसुङादेशः पुंसि पञ्चसु शौ च पुमान् पुमांसौ पु
मांसः हे पुमन्। पुंसः पुंभ्याम्। पुंसु वेधाः वेधसौ हे वेधः वेधोभ्याम् उशनसाम्। उशनसः पुरुदंशस् अनेहसां सेरधेर्डा उशनाः उशनसौ उ
((शनसः ॥

तवसु क्वसोर्वकारउकारः स्यात् तद्धिते वैदुषः अण् यणमतौ वैदुष्यम् विदुष्मान् ईईपोर्विदुषी सस्वरस्य वस्योत्वं यवराणामिति पृथक् निर्दे
शात् वसामिति दृत्त्वं विद्वद्भ्याम् समासे रे तिसटः क्वसुः हिंश्चेति हिंत्वं पूर्वस्येति हसादिशेषः लोपः पचामित्येत्वपूर्वलोपौ हित्वे सत्येकस्वरादिति नीट् उदित्वान्नुम् सम्म
हतइति दीर्घः सेदिवान् वस्योत्वे इडभावः निमित्ताभावे नैमित्तकस्याप्यभाव इत्युक्तत्वात् वकाराभावे इडभावः एवमुवासेति यजामिति संप्रसारणं वादेः पू
र्वस्येति पूर्वस्य संप्रसारणं दीर्घत्वं घसादेरिति षः ऊषिवान् शुश्रावेति शुश्रुवान्। नुधातोरित्युव् शुश्रुवुषः सुष्ठु हिनस्तीति सम्महतइति सूत्रेऽम्महस्साहचर्या
द्धातोर्न संनस्य न दीर्घः अधातोरित्यनुवृत्तेर्वा ततश्च संयोगांतलोपस्यासिद्धत्वान्नोपधादीर्घः सुहिन् रनादिति वा धुट् सुहिन्त्सु ध्वंसतेइति ध्वत्। संसु ध्वंसु

सि॰ चं॰
टी॰ पु॰
४८

अवस्वंसनेध्वंसुगतौ चाभ्यां क्विप् नोलोप इतिनलोपः वसामितिदत्वं ध्वद्भ्याम् पुंसोऽसुङ् सोनः पुंस इत्यनोमं डु कु पुन्मा पुंस इत्यनुवर्ततेनेन्सम्महतइत्यतः सिंहा
वलोकितन्यायेन शावित्यपकृष्यते पुल्लिंगस्य पुम्सशब्दस्याऽसुङ् स्यात् पंचसुडि त्वादतादेशः पातेर्डुम्सुरित्यौणादिकडुम्सुप्रत्ययस्योदित्वात् तेनैवनुम्
सिद्धेः असुङ उकारउच्चारणार्थः प्रौ प्रियपुमांसि। अथाविन्युक्तत्वात् न्सम्महतइतिनदीर्घः हेपुमन् सुपि संयोगान्तलोपेमोनुस्वारः नुम्स्यानि काऽनुस्वारव्यवधा
नेपीत्युक्तत्वान्नणत्वं पुंसु विधाञ्वेधचेत्यसुप्रत्ययः अत्वसोरितिदीर्घः वेधाः विश्वसृट् उशनसां बहुवचनमाद्यर्थं सेर्डाधेरित्यनुवर्तते उशना भार्गवः कविरित्य
मरः॥ धौनान्तत्वेदन्तत्वेसान्तत्वेचरूपत्रयं भवति उक्तं च संबोधनइत्यादि मध्यंदिनस्यापत्यं माध्यंदिनिः व्याघ्रपादपन्मा नामध्येवरिष्ठो वैयाघ्रपद्य आचार्यः संबोधा।

उशनसोधौनान्तता अदन्ततावावाच्या हे उशनन् हे उशनं हे उशनः उशनोभ्याम् उशनस्सु सोसः अदसोदस्यसस्लोसेरौ अदससेरौ भवति अ
सौ दस्यमः मादू अदसोमात्परस्य उश्च ऊश्च भवति अमू जसी एरीबहुत्वे अदसएकारस्येर्भवति बहुत्वेसति अमी अमुम् अमू अमून् अमु
ना अमूभ्याम् अमीभिः अमुष्मै अमुष्मात् अमुष्य अमुयोः अमीषाम् अमुष्मिन् अमुयोः अमीषु॥ इति हसान्ताः पुल्लिङ्गाः॥

॥ नेनूशनसः त्रया
णां रूपाणां समाहारस्त्रिरूपं पात्रादित्वात् क्लीबत्वं वष्टिइच्छति कानि तानि रूपाणीत्यत आह सांतस्यनकारादेशेनांतस्यलोपेऽदंतं इगंते इदंते उदंते ऋदंते च
क्लीबेधोगुणमिति॥ पुरुबहुदशतीति पुरुदंशाः इंद्रः न जिहन एह चेत्यसुप्रत्यये अनेहा कालः सोसः मत्वापवादः सेरौ अदसः परस्य सेरौ स्यात् असौ अत्र वा
शब्दमनुवर्त्य व्यवस्थितविकल्प आश्रयणीयस्तेन अकसहितस्यादसः सेर्वौत्वमोत्वाभावे सान्त्यरस्य उत्वं च वक्तव्यं असकौ असुक इति स्त्रियां असकौ औत्वाभावे
असुका असुक इति अमुकी इति च प्रयोगोऽसाधुरेवं अकथममुकगोत्रस्याऽमुकशर्मण इति अपभ्रंश एवायमिति प्राचः अमुकशब्दोऽव्युत्पन्नं नामवृत्तिविषये एव राम
वप्रयुज्यते इत्यन्ये मादू उश्च ऊश्च नयोः समाहारः ऊ सं तपूर्वकत्वान्नह्रस्वः एरीबहुत्वे अदसः किंते एकिम् अमून् बहुत्वे किं अमुयोः॥ इति हसांताः पुल्लिंगाः॥ ४८

नहो धः। ढस्यापवादः। होढ इत्यतो हसेत्यनुवर्तते उपपूर्वान्नहेः क्विप् नहिवृती इति पूर्वपदस्य दीर्घः उपनह्यते इति उपानत्। उत्पूर्वात् ष्णिह प्रीतौ विद्यस्मात् क्विपि पानतनात् हलोपः षत्वे दिशामिति हस्य घः जश्त्वं चर्त्वे उष्णिक् उष्णिगा दिव औत् इत्यौत्वे द्यौः। उरसेद्रसुत्वे द्युभ्यां गृ निगरणे अस्मात् गृ शब्दे इत्यस्मात् क्विप् ऋत इत्तीत्वे र्वोरुपधाया दीर्घः गीः। स्वं पृ पालनपूरणयोः। पोरुत्वे पुर् पूः। धुर्वी हिंसायां क्विपि यवयोरिति वलोपः। धूः। त्रिचतुरोरिति चतस्रादेशः। न तिसृचतस्रोरिति न दीर्घः चतसृणां प्रियाश्चत्वारो यस्याः सेति पदास्त्रियामुख्याविस्तुकत्वान्न चतस्रादेशः चतुरामित्याम् प्रियचत्वाः। धाव मित्यम्। हे प्रियचत्वः। इयं स्त्रिया

न हो धः। नहोहस्य धो भवति धातोर्झसे परे नाम्नि अरसे पदान्ते च। उपानत्। उपानद्। उपानहौ। उपानद्भ्याम्। उपानत्सु। उष्णिक्। उष्णिग्। उष्णिहौ। उष्णिहः। उष्णिग्भ्याम्। उष्णिक्षु। द्यौः। दिवौ। द्युभ्याम्। द्युषु। गीः। गिरौ। गीर्भ्याम्। गीर्षु। एवमुद्धुरादयः। चतस्रः। प्रियचत्वाः। प्रियचत्वा रौ। प्रियचत्वारः। हे प्रियचत्वः। इयं स्त्रियाम्। इदमः स्त्रियामियं सौ। इयम्। इमे। इमाः। अनया। आभ्याम्। आभिः। अस्यै। अस्याः। अनयोः। आसाम्। अ स्याम्। आसु। अन्वादेशे। एनाम्। एने। एनाः। एनया। एनयोः। स्रक्। स्रजौ। स्रग्भ्याम्। स्रक्षु। समित्। समिद्। समिधौ। समिधः। समिद्भ्याम्। समित्सु। सा। ते। त्याः। एवं तद्। यद्। एतद्। किम्। वाक्। वाचौ। वाग्भ्याम्। वाक्षु। ककुप्। ककुब्। ककुभौ। ककुब्भ्याम्। ककुप्सु। त्वक्। त्वग्। त्वचौ। त्वचः। त्वचम्। त्वग्भ्याम्। ऋक्। ऋचौ। ऋचः। ऋचम्। ऋग्भ्याम्। ऋक्षु। अप्शब्दो नित्यं बहुवचनान्तः। आपः। अपः॥ ९॥

ऽम इदमोयमित्यतः। इदम इत्यनुवर्तते सौ

त्यदः सौ इति चत्वे दाद्यन्ते आपृमत्वं औत्वं इमे अनटौसोरित्यनादेशः। टौसोरित्येत्वं अनया। स्य इत्यत्वं आभ्यामन्वादेशे इदमेनदोरित्येनत्। शेषं सर्वं वत्। सृजेः क्विप् अमागमश्च निपातितः दिशामिति कुत्वं स्रक्। स्रगे इधमेधः समित्। स्त्रियामित्यमरः। त्यदाद्यत्वे आप् तद् इति सः। स्या वचेः क्विपि वचीति क्विपि परे दीर्घोऽसंप्रसारणं च वचोः कुरिति कः। वाक्। आप्नोतेर्ह्रस्वश्चेति ह्रस्वश्चात् क्विप्। त्समह्रत इति दीर्घः आपः॥ ९॥ ॥ ९॥ ९॥ ९॥ ९॥

सर्वाशब्दस्य शब्दपरत्वेन निरूढसर्वनामत्वाभावान्नात्र सर्वनाम्नोऽट्ट इति मात्र इति पुंवद्भावशङ्के। तिनाप्यर्थे एतद्धि रहघटकमेवोक्तमिति ध्येयम्। २ टि०॥

पू॰
सि॰ चं॰
टी॰ सु॰
४९

मिदं पाम्। अपामिति बहुवचनं चिन्त्यं। अष्टनः त्रेरितिवदेकवचनमेव युक्तं दिशेः क्विप् दिशामिति कुत्वं दिक् दिग् त्विषेर्द्वी प्राविन्त्यस्मात् क्विप् षोडः इति डत्वं त्विट् दृशेः क्वि
पू दृशामिति कुत्वं दृक् जुषी प्रीतिसेवनयोरित्यस्मात् क्विप् दोषामिति रः र्वोरिति दीर्घः सजूर्मित्रम् शासे वेनिवासः विसर्गनुमस्थानिके निषत्वं सजूः षु षुत्वं सजूः।
षु आशासः क्वावित्युपधाइत्वं घसादेरिति षः आशीः त्यदाद्यत्वे आप् सौ सइति दस्य सः सेराविन्यौत्वं असौ दस्य मइति मत्वं औइतीत्वम् एत्वं माभूइत्यूत्वं अमू इति हसं
न्ताः स्त्रीलिङ्गाः॥ ।पुंसुष्टु अनड्वान् यस्मिन्तत् वसामिति दत्वं स्वनडुत् शौ अनडुहश्चेत्याम् नुमयइति नुम् स्वनड्वांहि टादौ पुंवद्रूपं पमान्तत्वान्न नुम् वारिंविम

मिदं पाम् अप्शब्दस्य दत्वमभवति भकारादौ विभक्तौ अद्भिः अद्भ्यः अपाम् अप्सु दिक् दिग् दिशौ दिशः दिग्भ्याम् दिक्षु त्विट् त्विड् त्विषौ त्विषः दृ
क् दृग् दृशौ दृशः सह जुषतइति सजूः सजुषौ सजुषः सजूर्भ्याम् सजूःषु सजूष्षु आशीः आशिषौ आशीर्भ्याम् आशीःषु आशीष्षु असौ अमू अमूः
अमुम् अमू अमुया अमूभ्याम् अमूभिः। अमुष्यै अमुष्याः अमूषाम् अमुष्याम् अमूषु इति हसान्ताः स्त्रीलिङ्गाः। स्वनडुत् स्वनडुद् स्वनडुही स्वन
ड्वांहि पुनस्तदत् शेषम् पुंवत् वाः वारी वारि वार्भ्याम् वार्षु ऊरसे विमलद्यु मलदिवी विमलदि विकिम् के कानि इदम् इमे इमानि अन्वादेशे एनत् एने
एनानि ब्रह्म ब्रह्मणी ब्रह्माणि हे ब्रह्मन् हे ब्रह्म अन्हः अहन्शब्दस्य सो भवति रसे पदान्ते च अहः अह्नी अहनी अहानि अह्ना। अहोभ्याम् कर्मकं
र्मणी कर्माणि एवं चर्म नर्म वर्मन् धन्वनादयः दण्डि दण्डिनी दण्डीनि स्रग्वि स्रग्विणी स्रग्वीणि वाग्मि वाग्मिनी वाग्मीनि बहुवृत्रहं बहुवृ
त्रघ्नी बहुवृत्रहणी बहुवृत्रहाणि बहुपूष बहुपूष्णी बहुपूषणी बहुपूषाणि बह्वर्यम बह्वर्यम्णी बह्वर्यमणी बह्वर्यमाणि असृक् असृजी असृं
(जि शसादौ वा असन् असानि अस्ना असभ्याम् ऊर्क ऊर्जी ऊर्ञ्जि बहूर्ज्जीनुम् प्रतिषेधः।
लादौ यस्मिन् तद्धि मलद्यु औ परतोऽन्तर्वर्तिनीं विभक्तिमाश्रित्य पूर्वपद
स्येवोत्तरखंडस्यापि पदसंज्ञायां प्राप्तायामाह। उत्तरपदत्वे चापदादिविधौ प्रत्ययलक्षणं नेति उत्तरशब्देनोत्तरपदमुच्यते उत्तरपदस्य पदत्वे पदव्यपदेशे कर्त्त
व्ये प्रत्ययलक्षणं न भवतीत्यर्थः पदादिविधौ तु प्रत्ययलक्षणं भवति पदत्वाभावादुत्वं न विमलदिवी लुकि नेति त्यदाद्यत्वं न किम् एवमिदम् इदमेनद्वारित्येन न्वादेशे ए

राम
४९

वकारमकारांतसंयोगाद्गुत्तरस्य नेति निषेधात् ब्रह्मणी' धौ नपुंसकानामिति वा नस्य लोपः' हे ब्रह्मन् हे ब्रह्म' अहः' नस्य विसर्गविधानं युक्तं सस्यापि विसर्गविधानाव
श्यकत्वात्' तदंते पोरुः सत्वं दीर्घाणि अहानि यस्मिन् स दीर्घाहाः निदाघः' दीर्घाहन् सि इत्यत्र हसेपइति सिलोपे नोपधाया इति दीर्घे च हृन्ते नतुः सकारः' वेड्यो
रिति वा ऽह्लोपः अह्नी अहनी' अह्लोपः स्वरे इत्यह्लोपः' अन्हाभ्यामितु सत्वे हृन्ते विसर्गः' हवेड्स्तु त्वे ओत्वं च' अहोभ्यां' दंडोस्यास्तीति मांतोपधादिती न् नाम्नो नड्
तिनलोपः' दंडि इनामिति दीर्घः' दंडिनी' स्वगस्यास्तीति विन् स्वग्वि' वागस्यास्तीति ग्मिन् वाग्मि बहवो वृत्रहणो यस्मिन् तत् नाम्नो नइति नलोपः बहुवृत्र हवेड्यो
रित्युपधालोपे हनो घ्नेइति घः बहुवृत्रघ्नी' अह्लोपाभावे बहुवृत्रहणी' इनामिति दीर्घः' बहुवृत्रहाणि' बहवः पूषाणो यस्मिन् तत् बहुपूष' बहवोऽर्यमणो यस्मिन्

अन्याम्पूर्वो वा नुम्' बहूर्ज्जि बहूर्ज्जि' त्यत्' त्ये' त्यानि' तत्' ते' तानि' यत्' ये' यानि' एतत्' एते' एतानि' अन्वादेशे' एनत् एने एनानि' बेभित्' बेभिदी' बेभि
दि' सयङन्तस्य शौ नुम्न' चेच्छित्' चेच्छिदी' चेच्छिदि' गवाक्शब्दस्य रूपाणि क्लीबे चर्ज्जी गतिभेदतः' असन्ध्यगागमाह्लोपैस्त्रैवाधिकशतम्म
तम्' स्यमसुप्सु नव षड् भादौ षट्के सु स्त्रीणि जश्शसोः। चत्वारि शेषे दशके रूपाणीति विभावय' गवाक्' गवाग्' गोअक्' गोअग्' गोक्' गोग्' ग
वाङ्' गोअङ्' गोङ्' गोची' गवाञ्ची' गोअची' गोञ्ची' गवाञ्चि' गोअञ्चि' गोञ्चि' गवाक्षु' गोअक्षु' गोक्षु' गवाङ्क्षु' गोअङ्क्षु' गोङ्क्षु' गवाङ्खु' गोअ
ङ्खु' गोङ्खु।

तत् बह्वर्यम' अस्यतेरौणादिके ऋज् प्रत्यये असृज्' चोः कुरिति कुत्वे असृक्' पाद्दंतेत्यसन्' अह्लोपः स्वरे इत्यह्लोपे' असृजा' ऊर्जतीति ऊर्क्' शौ' ऊर्न्जि' नरजानां संयो
गः' बहव ऊर्जो यस्मिन् तत् बहूर्क्' बहूर्जो नुम्प्रतिषेधः॥ अन्यान्पूर्वो वा नुम्' बहूर्ज् शब्दस्य भाष्यमते नुम् केषांचिन्मते रकारजकारयोर्मध्ये वा नुम्' लुकि नेति त्यदाद्यत्वेन
।स्यत् इदमेतदोरित्येनदादेशः। एनत्' बेभिद्यते इति बेभित्' यङ्' तान् क्विप् स यङ्' तस्य शौ नुम्न' सश्च यङ्' च स यङौ सयङौ तावंते यस्य स सयङ्' तस्य नाम्नो नुम् न शौ परे' बे
भिदि' चेच्छिद्यते इति चेच्छित्' शौ' चेच्छिदि' सप्रत्ययांतस्य शौ पि पठितिषि॥ जायंते नव सौ नश्याऽमि च नव भ्याम् भिस्भ्यसां संगमे षट् संख्यानि नवे व सुप्यथ जस्त्रीण्येवत

विबुधाः शब्दस्य रूपाणि तज्ज्ञानं तु प्रतिभाति चेन्निगदितुं षाण्मासिकोऽत्रावधिः १ राजसभायामिति श्लोकः केनचित्कविनोक्तस्तदा कश्चित्पंडितः श्लोकद्वयेनतदुत्त
रमाह गवाक् शब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः । असंध्यगागमाल्लोपैर्नवाधिकशतं मतं १ व्याख्या गवाक् शब्दस्य रूपाणि अर्चागतिभेदतः पूजागत्यर्थ
भेदेन नवाधिकशतं बोध्यानि विंशत्याद्याः सदैकत्वे संख्याः संख्येयसंख्ययोरित्युक्तत्वादेकत्वं शतेऽंचेर्गतौ नोनस्य लोपः पूजायां तु नेत्याशयः कीदृशं असंध्य
गागमाल्लोपैर्मतं गौरवेत्यगागमेन गोर्वेति प्रकृतिभावाल्लोपाभ्यां वाचार्याणां मननविषयीभूतं उक्तसंख्यामाह प्रत्येकं स्यमस्तुषुनवरूपाणि सुःभादौ षट्के
षट्जश्शसोस्त्रीणि शेषेद्दशके प्रत्येकं चत्वारि इति नवाधिकशतं रूपाणि त्वं विभावय जानीहि शसेचपस्येति वार्तिकमनाश्रित्योक्तमन्यथात्रीणि रूपाणि व
र्द्धेतेत्यर्थः ३ गामंचतीति विग्रहे क्विपूगनौ नलोप इति नलोपः गोअच् सुसि इति स्थितेऽगागमे चोः कुरिति कुत्वम् गवाक् १ गवाग् २ प्रकृतिभावे गोअक् ३ गो
अग् ४ अल्लोपे गोक् ५ गोग् ६ पूजायां नस्य कुत्वेन ङः अंकुं गवाङ् ७ प्रकृतिभावे गोअङ् ८ लोपे गोङ् ९ अस्यष्येतानि रूपाणि औपरतः अंचेरित्यल्लोपे गो
ची पूजायां तु गवाञ्ची गोअञ्ची ३ गोञ्ची ४ शौ नुमयमेइति नुम् गतिपूजनयोस्त्री एवं साहश्यान्गवांचि गोअंचि २ गोंचि ३ टापरतः अंचेरित्यल्लोपः गोचा १ पूजायाम् ग
वांचा २ गोअंचा ३ गोंचा ४ भ्यामि गवाग्भ्याम् १ गोअग्भ्याम् २ गोग्भ्याम् ३ पूजायां गवाङ्भ्याम् ४ गोअङ्भ्याम् ५ गोङ्भ्याम् ६ भिसि परे गवाग्भिः १ गोअग्भिः २ गोग्भिः
३ पूजायां गवाङ्भिः ४ गोअङ्भिः ५ गोङ्भिः ६ ङेपरतः अंचेरित्यल्लोपः गोचे १ पूजायां गवांचे २ गोअंचे ३ गोंचे ४ भ्यामिप्राग्वत् भ्यसि गवाग्भ्यः १ गोअग्भ्यः
२ गोग्भ्यः ३ पूजायां गवाङ्भ्यः ४ गोअङ्भ्यः ५ गोङ्भ्यः ६ ङसौ गोचः १ पूजायां गवांचः २ गोअंचः ३ गोंचः ४ भ्यामि भ्यसि च प्राग्वत् ङसपरे तोऽङसिवत् ओ
सि गोचोः १ पूजायां गवांचोः २ गोअंचोः ३ गोंचोः ४ आमि गोचाम् १ पूजायाम् गवांचाम् गोअंचाम् ३ गोंचाम् ४ ङौ गोचि १ पूजायां गवांचि २ गोअंचि ३ गोंचि
४ ओसि च गोचोः १ पूजायाम् गवांचोः २ गोअंचोः ३ गोंचोः ४ सुपि गवाक्षु १ गोअक्षु २ गोक्षु ३ पूजायाम् शसेङ्णानोरितिङांतानां कुक्पसे गवाङ्क्षु ४
गोअङ्क्षु ५ गोङ्क्षु ६ कुगभावे गवाङ्षु ७ गोऽङ्षु गोअङ्षु ९ एवं नवाधिकशतं रूपाणि ककपसे शसेचपस्येति ककारस्य खकारेण त्रयाणामाधिक्यं त्वे
यम् अन्यत्र तु कुत्वस्यासिद्धत्वान्न खकारः एवं द्वादशाधिकम् ॥ ६ ॥

टि॰ शुष्कगोमयमित्यर्थः २

तिरोऽञ्चतीति नोल्लोपइ तिनलोपः चोःकुरिति कुः तिर्यक् सहादित्वात्तिरिः औपरतः तिरश्चाद्य इति तिर्यक् तिरश्ची शौनुमपमइतिनुम् तिर्यंचि पूजायां तिर्यङ् यकृ
त्काल्लखंडंशकृत् पुरीषं गूथं शशादेः पाद्दन्नेति यकन् शकन्नादेशो वांदद्दिति पुह्लिंगे उक्तरूपवद्धि रुक्तानां जसादीनां ज चेति वानुम् दद्दंति दद्दन्ति वादीपोशतुः वा।
आन् ईपोरिति पदच्छेदः आदिति पंचमी न तु न परत्वं ईश्च ई पूचई पीतयोः शतुरित्येव यव षष्ठी तु तुदती इत्यत्र शिति चतुर्वदित्यनेनकृतस्य तुदादेरित्यऽप्रत्य
यस्यादेरत्यनेनान्तरंगत्वाल्लोपेकृतेऽवर्णात्परत्वाभावान्नुम् न स्यात् उच्यते प्रत्ययलक्षणेन तत्परत्वमस्त्येव न चैवं घ्नतीत्याद्रावपि प्रसंगः लुकि न तन्निमित्तमि
त्यनेन प्रत्ययलक्षणप्रतिषेधात् भातीति भात् भादीप्तौ शतृप्रत्यये शित्वाद्प् अदादित्वद्पोलुक् अप्ययोराम्नित्यम् वादीपोरित्यत्र ईपोरित्यनुवृत्तेर्विकल्पो

तिर्य्यक् तिरश्ची तिर्य्यञ्चिं तिर्य्यङ्ः तिर्य्यञ्चौ तिर्य्यञ्चिं यकृत् यकृती यकृन्ति यकानि यक्ना यकृता यकृभ्याम् यकृद्भ्याम् एवं शकृत् दद
त् ददती ददति एवं जाग्रदादयः तुदन् वादीपोश्शतुः अवर्णान्तात्परस्य शतुर्वा नुमीकारे ईपि च तुदती तुदन्ती तुदन्ति भाती भान्ती भात्
भान्ति अप्ययोराम्नित्यम् अप् प्रत्यय यप्रत्यय संबन्धिनोऽवर्णात्परस्य शतुर्नुम् नित्यमीकारे ईपि च पचन् पचन्ती पचंति दीव्यन् दी
व्यन्ती दीव्यन्ति स्वप् स्वप् स्वपौ सम्महत इति दीर्घः स्वांपि दीर्घो नेत्येके स्वपि स्वपा भिद्पाम् स्वद्भ्याम् स्वद्भिः जगत् जगती जगन्ति महत्।
महती महान्ति धनुः धनुषी

प्राप्ते नित्यविधानार्थमिदं यत्र अप् च यश्च ताभ्यां पीतयोरवत्परस्य शतुर्नित्यं नुम्भवति ईई पोः ननु अप्ययोरित्यत्र चपा अवे इति जवत्वं वक्तुं
युक्तम् उच्यते ज्ञापनार्थमेवं निर्देशः प्रत्यये परतः क्वचिदत्वं नेति तेन तडित्वो नित्यादिसिद्धम् पचतीति पचन् अप् कर्त्तरीत्यप् अदेरित्यल्लोपः दीव्यतीति।
दीव्यन् दिवादेरितियः सुदुआपो यस्मिन् सरसि तत् स्वप् क्रूक्पूरित्यप्रत्ययो न नपूजनेइति निषेधात् शौ नित्यत्वात् नुमः प्राक् दीर्घः। स्वापि नदंते दीर्घोऽ
स्यनेत्येके स्वपि अर्त्तिपृवपियजितनिनपिभ्यउसित्यौणादिकः धनेरुस् धनुः शौ न सम्महत इति दीर्घः विसर्गनुमिति षत्वं॥ ःः॥ १०१ ॥ ६ ॥

पूं. चं.
सि. सु.
टी.
५१

न ष पूर्वस्य शौ दीर्घः नुमम्म हत इत्यस्यैव प्रपंचः धनूंषि धनुर्भ्यां मत्रय्योर्विहसे इति न दीर्घोऽधातुत्वात् अर्चिंषि रुचिंहु सूपीन्यादिनाज्जु होतेरिस् हविः पिपठिषतेः क्वि पूर्वोर्विहसे इत्यनेन दीर्घत्वं पिपठीः सुष्ठु पुमांसो यस्मिन् तत् सुपुम् शौ पुंसोऽसुङ् इत्यसुङ् नुमयमइति नुम् न सम्म हत न दीर्घः सुपुमांसि त्यदाद्यत्वं विभक्तिकार्यं मन्दो न्वे। अमूः शौ नुम् दीर्घौ अमूनि शेषं पुंवत्॥ इति हसान्ता नपुंसकलिंगाः ॥ ६ ॥ समाप्तेयं षट्लिंगव्याख्या॥ त्वमहं सिना युष्मदस्मदोः स्याने त्व मह मित्येतौ यथासंख्यं स्तः सिनेति सहार्थे योगे तृतीया सिप्रत्ययेन सहितयोरित्यर्थः ननु त्वमहमोर्हसान्तत्वादेव सिलोपे सिद्धे सा विति वाच्यं व्यर्थं सिनेति उच्यते मान्तत्वस्य तथात्वकारोच्चार। णस्य गौणत्वेऽनितित्वमित्यादौ चरितार्थत्वात् सिलोपात्परत्वात्त्यदाद्येरित्यत्वे ततः आम् स्याविति त्वं तत इति तकारस्य सत्वं च स्यात् अतः सिनेत्युक्तं इह न दंत विधिरपि दृष्टो

स्यपूर्वस्य शौ दीर्घः धनूंषि हविः हविषी हवींषि पयः पयसी । पयांसि तेजः तेजसी तेजांसि वचः वचसी वचांसि पिपठीः पिपठिषी सयङ् तस्य शौ नुम्नपि पिठिषि सुपुम् सुपुंसी सुपुमांसि अदः अमू अमूनि शेषं पुम्वत्॥ ॥ इति हसान्ता नपुंसकलिङ्गाः॥ ॥ त्वमहं सिना सिना सहितयो र्युष्मदस्मदोस्त्व मह मित्येतावादेशौ भवतो यथासंख्येन त्वम् अहम् युवावौ द्विवचने द्व्यर्थवाचिनो र्युष्मदस्मदोर्युवावादेशौ भवतो विभक्तौ आ मौ युष्मदस्मद्भ्यां परऔराम् भवति युवाम् आवाम्॥

॥ सिपरमत्वं परमाहं गौणत्वेतु त्वां मां युवामाऽऽवां युष्मान् अस्मान् वाऽतिक्रान्त इत्यत्रापि अतित्व मऽत्यह मित्येव युष्मदस्मदोर्नान्तसंख्यावाचिनां चालिंगत्वमेवाऽलिंगे युष्मदस्मदी इत्युक्तत्वात् अत एव त्रिषु लिंगेष्वेषां समानं रूपं लिंगनिमित्तमाविवादिकमत। योर्नोर्लिंगत्वात् त्वं ब्राह्मणः अहं ब्राह्मणः त्वं ब्राह्मणी अहं ब्राह्मणी त्वं ब्राह्मणकुलम् अहं ब्राह्मणकुलमिति युवावौ द्विवचने द्वयोरर्थो द्व्यर्थः द्व्यर्थवक्त इति द्व्यर्थवाचिनोत योर्युष्मदस्मदोर्युवावौ स्तः स्यादौ विभक्तौ त्यदादेरित्यतः स्यादावित्यपकृष्यते द्वौ वक्त इति द्विवचने कृते रिपुटं किंच द्विवचने इति प्रत्ययविशेषणे कृते नेपि युवावौ सिद्धौ तथापि युवामऽतिक्रान्तान् अतियुवानित्यादौ युवावयोरप्रसंगवारणाय प्रकृत्यर्थविशेषणं कृतं आ मौ आभ्यामो आम् स्यात् अत्र योगविभागा।

राम
५१

विपरीतनिर्देशो बोध्यः विपरीतनिर्देशात् सुडामइतिसुडनप्रवर्त्ततेइतिकेचित् गौणत्वेपियुष्मदस्मदोस्त्यदाद्यत्वंभवति इत्येतदर्थंव्याख्यानांतरंक्रियते अत्र अअम् औइतिच्छेदः अइतियोगविभागःकर्त्तव्यः लोपः अतः युष्मदस्मदोरितिपदत्रयंचानुवर्त्तनीयंयुष्मदस्मदोरकारांतादेशोऽकारात्परस्याऽकारस्यलोपश्चस्यादित्येको योगः युष्मदस्मद्भ्यां परऔकारोऽम् स्यादितिद्वितीयः औकारस्यामिकृते आम्स्थाविन्यात्वंयद्यपिह्रस्वपूर्वत्वंयदाद्युपपन्नस्य दीर्घः नचामशसोरितिलोपः अकारोच्चारणसामर्थ्यात् इतिलघु भाष्येयुवामाऽऽवांतदंतेपरमयुवांपरमावांगौणत्वेतुत्यदादेरितियत्वंनभवति संज्ञोपसर्जनयोर्नात्वमित्युक्तत्वात् किंतर्हि आमावित्यत्रयोगविभागोनाऽनयोरंतस्या कारोऽतोलोपश्च औकारस्यअमिकृते आम्स्थाविन्यात्वेअतित्वांअतिमांअतियुवांअन्यावांअतियुष्मांअन्यस्माम्॥ ॥यूयंवयंजसातदंतेपरमयूयम् परमवयम् गौणत्वेऽतियूयं अतिवयम् त्वमावेकवचने एकत्वेगम्ये एकस्यभावः एकत्वंतस्मिन्गम्यमानेज्ञायमानेसतियुष्मदस्मदोस्त्वमादावादेशौस्तः स्यादावित्यत्रनसंबध्य

यूयंवयंजसा।जसासहितयोर्युष्मदस्मदोर्यूयम्वयंभवतः यूयम् वयम् त्वमावेकवचने युष्मदस्मदोस्त्वमदौभवतएकत्वेगम्यमाने आम्सौ युष्मद स्मदोद्वेरात्वम्भवति अमिसकारेभिसिचपरे त्वाम् माम् युवाम् आवाम् त्यदाद्यत्वेशसीतिदीर्घः

नेतेनतवपुत्रइति त्वत्पुत्रः तवापत्यमितित्वादः

त्वंपुत्रोयस्यसः त्वत्पुत्रः इत्यादौ विभक्त्यभावेपित्वमदौभवतः नचांतर्वर्तिनीविभक्तिमाश्रित्याप्येतौस्यातामितिवाच्यं युवयोःपुत्रइतियुष्मत्पुत्रइत्यादौयुवा वयोरपिप्रसंगात् लुकितन्निमित्तमितिनिषेधाच्च त्वादादेशाभावेतोनेतत्वादयतिमादयतित्वदीयंमदीयमित्यादिरूपसिद्धिः सूत्रेवावसानेइतिपाक्षिकतकारेण नेत्रमेत्रमावेतित्रमत्वंकचिज्जवस्यापित्रमोत्तायते नेनेति वावोध्यंसिद्धेङ सूक्तवक्ष्यमाणविधयस्त्वमदौबाधतेपरत्वात्तदंते परमत्वाम् परममाम् गौणत्वेतु अतित्वाम् अतिमाम् आमस्यौआ अम् इतिच्छेदः युष्मदस्मदोष्टेरात्वंस्यादमिसकारेभिसिच अमच्वसच्चभिश्चतेषांसमाहारोम्सितस्मिन् आगम जस्यानिमि त्वान्नुमइतिभावः भीत्येकदेशद्वारासमुदायाऽनुकरणंअत्रमाधवआहटेरितिनानुवर्त्तनीयंप्रयोजनाऽभावात् षष्ठीनिर्दिष्टत्वादंत्यस्यात्वेसवर्णेदीर्घेचत्वांमामि

र्ज्यंतयोः क्विपि युष्म् अस्मिति रूपं आभ्याममिशसि च युषां असां युषान् असानिमंत्यस्य मस्यात्वे सिध्यति अन्यथा न सत्वं अतियुष्माभ्यामित्यादावात्वं के न भवति गौ
णत्वेत्यदाद्यत्वाभावात् उच्यते आमाविन्यत्र योगविभागे नात्वे कृते रूपसिद्धिरिति तदा युष्मास्मोरपि योगविभागेनाऽत्वे कृते पश्चाद्देशत्वे चामि शसि च युषाम् अ
सां युषान् असानिति सिद्ध्यत्येव किं माधवोक्तयेति॥ ❀ ॥ शसो नो वक्तव्यः सो नः पुंस इत्यत्र सो न इति योगविभागेनायमर्थो लभ्यते इत्यर्थः। एटाड्योः अत्र टेरित्य
नुवृत्तं अनयोः शेषे एत्वं स्यात्। टाश्च ङिश्च टाङी तयोः परतः इदंतत्वात् ङेः पूर्वनिपाते प्राप्ते तस्यानित्यत्वज्ञापनार्थं परनिपातः किंच परत्वान्यदादेरित्यत्वे प्राप्तेपि।
आद्यैरेटाड्योरित्येत्वप्रवृत्तिरेव न्याय्या कृताकृतप्रसंगित्वेन तस्यानित्यत्वात् टेरेत्वे कृते अयादेशे च त्वया मयेति अत्र हि युष्मदस्मदोर्ज्यंतयोः क्विपि युष्म्

शसो नो वक्तव्यः युष्मान् अस्मान् त्वन्मदादेशे कृते। एटाड्योः युष्मदस्मदो शेषे एत्वं भवति टाङ्योः त्वया मया युवाभ्याम् आवाभ्यां युष्माभिः अ
स्माभिः तुभ्यमह्यौ ङयाः ङे सहितयोर्युष्मदस्मदोस्तुभ्यं मह्यमेतौ भवतः तुभ्यम् मह्यम् भ्यशभ्यम् युष्मदस्मद्भ्याम् परो भ्यशभ्यम् भवति शका
रो भकारोदित्वव्यावृत्त्यर्थः तेनात्वेत्वे न भवतः युष्मभ्यम्। अस्मभ्यम्। ङसिभ्यसोश्च ङसि साहचर्यात्पंचभ्यां भ्यसः ग्रहणे त्वत् मत् युवाभ्या
॥ म् आवाभ्याम्। युष्मत्। अस्मत्॥

अस्मद् इति टाङि ओस् सुपरतः युष्मा अस्मा युष्मि युष्मोः अस्मोरिति रूपाणि तत्र सिद्ध्यर्थं व्याख्यानांतरं क्रियते अत्रै
कारान्तपरो यवयोर्वेसे हकारे चेत्यनेन लुप्तोयकारो ज्ञातव्यः तेनायमर्थः अदंतयोरनयोरेत्वं हसंतयोर्यत्वं च न भवति एटाड्योरिति टाङी ओसां सुप्सप्तमी
को निर्देशः एषु परत इति तुभ्यमह्यौ ङयाः तदंते परमतुभ्यं परममह्यं गौणत्वे तु अतितुभ्यं अतिमह्यम् भ्यशभ्यम् अत्र भ्यसश्चतुर्थी बहुवचनं आभ्यां भ्यसः शभ्यं
स्यात् शकारोऽनर्वादेशार्थः भ्यमो गुर्वादेशत्वात् नहिं किमर्थः भकारादित्ववारणार्थः। सति शकारे भकारस्यादित्वाऽभावात् भादि निमित्तमेस्मीत्येत्वं अङ्गीत्या
त्वंचनं आदेर्भाव आदित्वम् भकारस्यादित्वं भकारादित्वं भकारादित्वस्य व्यावृत्तिर्निषेधः भकारादित्वव्यावृत्तिः भकारादित्वव्यावृत्तिरर्थः प्रयोजनं यस्य सः ङसि

उच्चारणार्थः अत्र ङसिसाहचर्यान्त्यं चम्याएव भ्यसरग्रह्यते किं च अत्रमाधवङसि भ्यसः अः शुरितिपदच्छेदः कर्तव्यः ततश्च युष्मदस्मद्भ्यां ङसिभ्यसोः शुर्भव
ति युष्मदस्मदोरंत्यस्याकारादेशो भवतितेनत्र्यंतयोर्युष्मऽस्मोर्युषत्असत्अयमेवाकारोभ्यसश्भ्याम्साम्आक मित्यत्राप्यनुवर्तते तेन युषभ्यम सभ्यंयुषाकं अ
साकमिति सिद्ध्यतीतिवदंति आमाविन्यत्रयोगविभागेनान्वेयुषद्ऽसदित्यादिसिद्ध्यन्येवकिंतन्प्रयासेन॥ ॥ तवममङसा' तदंतेपरमतव' परममम' गौणत्वेअ
तितव' अतिमम' सामाकं' अत्रतंत्रैकशेषाऽऽवृत्तिभिःसामितिद्वयंबोध्यं सकृदुच्चरितः शब्दोऽनेकार्थगमको भवतीतितंत्रंसरूपाणामित्येकशेषः द्विरुच्चारणमावृ
त्तिः एकस्यसुटासह आम्साम्द्वितीयस्यतु आमासहसाम् इत्यर्थः ततः सुट्सहित आम् केवलआम् चस्थाकं युष्मदस्मदोरंत्यस्याकारश्च भवतीत्यर्थः तेनातियु
ष्माकं' अत्यस्माकमित्यादिसिद्ध्यतीति लघुभाष्यकर्तुरपिप्रयासोव्यर्थ एवं योगविभागेनान्वेकृतेसुडामइति सुटोपिसर्वादिकार्यत्वाद्गौणेऽप्रवृत्तेः तंत्रादिनासा।

तवममङसा' ङसासहितयोर्युष्मदस्मदोस्तवममौभवतः' तव' मम' युवयोः' आवयोः' सुडामः' सामाकम्' युष्मदस्मद्भ्यां परस्साम आकम्भवति' युष्मा
कम्' अस्माकम्' त्वयि' मयि' युवयोः' आवयोः' युष्मासु' अस्मासु' समस्यमानेद्व्येकत्ववाचिनीयुष्मदस्मदी' समासार्थोऽन्यसङ्ख्यश्चेद्युवावौत्वन्म
॥ द्वावपि॥ १॥

मित्यस्यद्विरुच्चारणात् केवलस्यापि आम आकमिचविहितेरूपसिद्धेः॥ समस्यमानेद्व्येकत्ववाचिनीयुष्मदस्मदी' समासार्थोन्यसंख्यश्चेद्युवावौत्व
न्मद्वावपि १ युवावौद्विवचनेत्वन्मदेकत्वे इतिसूत्रद्वयेद्विवचनैकत्वशब्दौ प्रकृत्यर्थपरौ न तु प्रत्ययपराविति व्याख्यातं तत्फलं जातिलिंगव्यक्तिसंख्याकारका
त्मकः पंचकोनामार्थ इति पक्षाभिप्रायेणादर्शयतिचेद्यदियुष्मच्चास्मच्च युष्मदस्मदी शब्दरूपेसमस्येते इतिसमस्यमाने समासविषयीक्रियमाणे द्वौ च
एकश्च द्व्येकौ तयोर्भावः द्व्येकत्वं द्व्येकत्वं वक्ति इति द्व्येकत्ववाचिनौ स्तः॥ समासस्यार्थः। विग्रहः अन्यसंख्योऽन्यस्यान्यस्यपदार्थस्य संख्या यस्मिन्सोन्यसं
ख्यो युष्मदस्मदर्थगतसंख्येतरसंख्यायुक्तो भवतीत्यर्थः। तदा युष्मदस्मदोः स्थाने युवावौत्वन्मद्वावप्यादेशौ भवतः' द्विवचनैकत्वयोः प्रत्ययविशेषणत्वे तु नस्या

पू.
सि. चं.
टी. सु.
५२

सिजसङेङसुपरत आदेशाः सुःसदैवते त्वाहौ यूयव यौ तुभ्यमह्यौ तवममावपि २ नन्वेवं सिजसङेङस्स्वपि युष्मदस्मदोर्द्व्यर्थत्वे युवावौ स्यातामेकार्थत्वे तु त्वन्मदावित्याशंकायामाह। एतासु विभक्तिषु परतो युष्मदस्मदोः स्थाने ते आदेशाः सदैव सुःकेने आदेशा इत्यत आह त्वाहौ यूयवया वित्यादि २ एते परत्वाद्बाधन्ते युवावौ विषये स्वके त्वन्मदावपि बाधन्ते पूर्ववद्विषये स्वतः ३ एते त्वमहयूयंवयंतुभ्यंमह्यं तवममेत्यादेशाः स्वके विषये से आत्मीये स्थाने युवावौ बाधन्ते कस्मात्परत्वाद्धि प्रतिषेधे परं कार्यमिति न्यायात् उभयोस्तुल्यबलविरोधे सति सूत्रापेक्षया त्वमादयः परे त एव भवन्तीत्यर्थः एते त्वमादयः स्वतो विषये त्वन्मदावपि बाधन्ते पूर्ववत् उक्तन्यायेन स्वत इत्यत्र सप्तम्यर्थे तस् ३ द्व्येकसंख्यः समासार्थो बहूर्थे युष्मदस्मदी नयोर्द्व्येकनार्थत्वात् युवावौ त्वन्मदौ नच ४ यदा युष्मदस्मदी

सिजसङेङसुपरत आदेशाः सुस्सदैवते त्वाह्नौ यूयवयौ तुभ्यमह्यौ तवममावपि २ एते परत्वाद्बाधन्ते युवावौ विषये स्वके त्वन्मदावपि बाधन्ते पूर्ववद्विषये स्वतः ३ द्व्येकसंख्यस्समासार्थे बहूर्थे युष्मदस्मदी नयोर्द्व्येकनार्थत्वाद्युवावौ त्वन्मदौ नच ४ त्वांमांवाऽतिक्रान्त ।
इति विग्रहे 'अतित्वम्' 'अत्यहम्' गौणत्वे युष्मदस्मदोस्त्यदाद्यत्वम्भवति 'अतित्वाम्' 'अतित्वम्' 'अत्यहम्' 'अतियूयम्' 'अतिवयम्' त्वन्मदेकत्वे 'आम्भौ'

बहूर्थे बहूनामर्थो ययोस्ते बहूर्थे भवतः समासार्थो विग्रहः द्वौ च एकश्च द्व्येकौ द्व्येकयोः संख्या यस्मिन् स द्व्येकसंख्यो भवति तदा युष्मदस्मदोः स्थाने युवावौ त्वन्मदावपि न स्तः कस्मात् तयोर्युष्मदस्मदोः द्वौ च एकश्च द्व्येकौ द्व्येकयोर्भावः द्व्येकता द्व्येकताया अर्थः द्व्येकतार्थस्य भावो द्व्येकनार्थत्वं न द्व्येकनार्थत्वम् अद्व्येकतार्थत्वं तस्मात् द्व्येकतार्थत्वस्याऽभावात् ४ त्वंमां वातिक्रान्त इति विग्रहे अपवादो अतित्व अत्यहं त्वां मां वातिक्रान्ताविति विग्रहे उत्सर्गतः त्वन्मदादेशे कृते गौणत्वेपि युष्मदस्मदोस्त्यदाद्यत्वं भवति 'आमावित्यत्र योगविभागेन यद्व्याख्यानान्तरं कृतं तस्यायं निष्कर्षोऽस्ति गौणत्वेप्यनयोस्त्यदाद्यत्वं भवतीत्यर्थः एम
इत्यनेनात्वे तद्धोपे श्रौ विभक्तेरमि च कृते सवर्णे दीर्घः अतित्वां 'अतिमां त्वां मां वातिक्रान्ता इति विग्रहे अपवादो अतियूय मतिवयं एवमग्रे प्यूह्यम् १ अत्वे आमस्सौ ५२

अतित्वां अतिमां शसि अत्वे कृते अमू शसो रित्यल्लोपः शसो निटी घेः शसो न इति नत्वं अतित्वान् अतिमान् २ अत्वे कृते एटाड्योरित्येत्वे ऽयादेशे अतित्वया अतिमया अत्वे अड्डीत्यात्वे च अतित्वाभ्यां अतिमाभ्यां आम् स्याविस्यात्वं अतित्वाभिः अतिमाभिः ३ अपवादौ अतितुभ्यम् अतिमह्यम् अतित्वाभ्यां अतिमाभ्यां अत्वे शभ्य मि च अतित्वभ्यं अतिमभ्यम् ४ अत्वे पृथु आदेशे च अतित्वत् अतिमत् अतित्वाभ्यां अतिमाभ्यां अतित्वत् अतिमत् ५ अपवादौ अतितव अतिमम अत्वे ओसी त्वे च अतित्वयोः अतिमयोः अत्वे सुडभावे पि प्रागुक्तरीत्या आकमि च अतित्वाकं अतिमाकम् ६ अत्वे कृते एटाड्योरित्येत्वे अयादेशः अतित्वयि अतिमयि अ

अतित्वाम् अतिमाम् अतित्वान् अतिमान् अतित्वया अतिमया अतित्वाभ्याम् अतिमाभ्याम् अतित्वाभिः अतिमाभिः अतितुभ्यम् अतिमह्यम् अतित्वाभ्याम् अतिमाभ्याम् अतित्वभ्यम् अतिमभ्यम् अतित्वत् अतिमत् अतितव अतिमम अतित्वयोः अतिमयोः अतित्वाकम् अतिमाकम् अतित्वयि अतिमयि अतित्वासु अतिमासु युवामावां वा ऽतिक्रान्त इति विग्रहे सिजसङेङस्सु प्राग्वत् अन्यत्र युवावौ अतित्वम् अत्यहम् अतियुवाम् अत्यावाम् अतियूयम् । अतिवयम् अतियुवाम् अत्यावाम् अतियुवान् अत्यावान् अतियुवया अत्यावया अतितुभ्यम् अतिमह्यम् अतियुवाभ्याम् अत्यावाभ्याम् अतियुवभ्यम् अत्यावभ्यम् अतियुवत् अत्यावत् अतियुवाभ्याम् अत्यावाभ्याम् अतियुवत् अत्यावत् अतितव अतिमम ॥

तित्वयोः अतिमयोः अत्वे आत्वे च अतित्वासु अतिमासु ७ गुणीभूतयोर्युष्मदस्मदोरेकार्थत्वे उदाहरणान्युक्तानि संप्रति द्व्यर्थवाचित्वे उदाहरंति । युवामावां वा ऽतिक्रांतः अतिक्रांतौ अतिक्रांता वा इति विग्रहे अतित्वम् अत्यहम् अतियुवामत्यावाम् अतियूयमतिवयम् १ अतियुवां आत्यावां अतियुवां अत्यावां अतियुवान् अत्यावान् २ अतियुवया अत्यावया अतियुवाभ्यां अत्यावाभ्यां अतियुवाभिः अत्यावाभिः ३ अतितुभ्यम् अतिमह्यम् अतियुवाभ्याम् अत्यावाभ्याम् अतियुवभ्यं अत्यावभ्यं ४ अतियुवत् अत्यावत् अतियुवाभ्यां अत्यावाभ्यां अतियुवत् अत्यावत् ५ अतितव

पू॰ सि॰ च॰ टी॰ सु॰ ५४

अतियुवयोः अत्यावयोः अतियुवाकं अत्यावाकम् ६ अतियुवयि अत्यावयि अतियुवयोः अत्यावयोः अतियुवासु अत्यावासु ७ बह्वर्थयोरुदाहरति युष्मानस्मान्वा ऽतिक्रान्तः अतिक्रान्तौ अतिक्रान्ता वेति विग्रहे अतित्वं अत्यहं अतियुष्माम् अत्यस्माम् अतियूयं अतिवयम् । अतियुष्मां अत्यस्मां अतियुष्मां अत्यस्मां अतियुष्मान् अत्यस्मान् २ अतियुष्मया अत्यस्मया अतियुष्माभ्यां अत्यस्माभ्यां अतियुष्माभिः अत्यस्माभिः ३ अतितुभ्यं अतिमह्यं अतियुष्माभ्यां अत्यस्माभ्यां अतियुष्मभ्यं अत्यस्मभ्यं ४ अतियुष्मत् अत्यस्मत् अतियुष्माभ्यां अत्यस्माभ्यां अतियुष्मत् अत्यस्मत् ५ अतितव अतिमम अतियुवयोः अत्यावयोः अतियुष्माकं अत्यस्माकं ६ अतियुष्मयि अत्यस्मयि अतियुष्मयोः अत्यस्मयोः अतियुष्मासु अत्यस्मासु पुनर्गौणे रूपान्तरं युष्मानस्मान्वाकरोतीति णौ युष्मयति अस्मयति ततः

अतियुवयोः अत्यावयोः अतियुवाकम् अत्यावाकम् अतियुवयि अत्यावयि अतियुवासु अत्यावासु युष्मानस्मान्वाऽतिक्रान्त इति विग्रहे अतित्वम् अत्यहम् अतियुष्माम् अत्यस्माम् अतियूयम् अतिवयम् सिजस्ङे·ङ·स्सु प्राग्वत् अतियुष्माम् अत्यस्माम् अतियुष्माम् अत्यस्माम् अतियुष्मान् अत्यस्मान् अतियुष्मया अत्यस्मया अतियुष्माभ्याम् अत्यस्माभ्याम् अतियुष्माभिः अत्यस्माभिः अतितुभ्यम् अतिमह्यम् अतियुष्मत् अत्यस्मत् अतियुष्माभ्याम् अत्यस्माभ्याम् अतियुष्मत् अत्यस्मत् अतितव अतिमम अतियुष्माकम् अत्यस्माकम् अतियुष्मयि अत्यस्मयि अतियुष्मासु अत्यस्मासु

क्विप्जेरिति जिलोपे कृते युष्म् अस्मिति जाते स्यादिषु युष्मस्मोरपित्वमहमादयः आदेशा भवंति ए कदेशविकृतमनन्यवदिति युक्तत्वात् त्वं अहं औ विभक्त्यादिषु गौणत्वे पि टाङि·ओस्विभक्तीर्वर्ज्जयित्वा सर्वत्रात्वे कृते आ त्वं युषां असां यूयम् वयम् १ युयाम् असाम् युषाम् असाम् युषान् असान् २ एटाड्योरित्यस्य व्याख्यानान्तरेणान्तस्य यत्वं युष्मा अस्मा युषाभ्यां असाभ्यां युषाभिः असाभिः ३ तुभ्यं मह्यं युषाभ्यां असाभ्यां युषभ्यं असभ्यं ४ युषत् असत् युषाभ्यां असाभ्यां युषत् असत् ५ तव मम अंतस्य यत्वे युष्योः अस्योः युषाकं असाकं ६ यत्वे युष्यि अस्यि युष्योः अस्योः युषा

सि॰ च॰ राम· ५४

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्त्वेमेवांनौवसनमौषष्ठी च चतुर्थी च द्वितीया च षष्ठी चतुर्थी द्वितीयास्ताभिः अल्पांस्वरत्वात् षष्ठ्यास्य पूर्वनिपातः सहयोगे तृतीया।
यातयासाहित्यं बोध्यते ननु किं साहित्यं श्रूयमाणविभक्तिकयोरेवादेशाभवंतिनलुप्तविभक्तिकयो रितितेनेनसमासे युष्माकं पुत्रइति युष्मत् पुत्रोब्रवीति अस्माकंपु
त्रइत्यस्मत्पुत्रोब्रवीतीत्यत्रप्रत्ययलक्षणेनषष्ठ्यंतयोर्युष्मदस्मदोर्वस्नसौनंत्वामामातेमयोरपवादोयंषष्ठीबहुवचनस्यामोऽत्रग्रहणंनव्याख्यानात् व्याख्या।
नतोविशेषप्रतिपत्तिर्नहिसंदेहादलक्षणमितिभावः।श्रीशस्त्वावतुमापीहदत्तातेमेपिशर्मसः।स्वामीतेमेपिसहरिः पातुवामपिनौविभुः १ सुखंवांनौददात्वीशः प
तिर्वामपिनौहरिः सोव्याद्वोनः शिववोनोदद्यात्सेव्योत्रवःसनः २ उक्तानादेशान् वचनक्रमेणोदाहरति द्वितीयैकवचनेयथाश्रियईशःश्रीशोहरिरिहजगतित्वा

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्त्वेमेवांनौवसनसौ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयासहितयोर्यथासंख्येनामीआदेशाभवन्तिं नत्रैक
वचनेनसहतेमेद्विवचनेनवांनौबहुवचनेनवसनसौत्वामामाअमासहितयोर्युष्मदस्मदोस्त्वामाएतौभवतः।श्रीशस्त्वावतुमापीहदत्ता
तेमेऽपिशर्मसः।स्वामीतेमेऽपिसहरिः पातुवामपिनौविभुः १ सुखम्वान्नोददात्वीशः पतिर्वामपिनौहरिः।सोऽव्याद्वोनशिवम्वोनोदद्या
त्सेव्यात्रवस्सनः २ एकवाक्येयुष्मदस्मदादेशावक्तव्याः॥

त्वामापिमामपि अवतु रक्षतात् चतुर्थ्येकवचनेयथासहरिस्तेतुभ्यंमेपिमह्यमपिशर्मसुखं
ददातु दानपात्रे चतुर्थीषष्ठ्येकवचनेयथासहरिस्तवमेममापिस्वामीवर्ततेस्वाम्यादियोगेइतिषष्ठीसप्तम्यऽविधानात् द्वितीयाद्विवचनेयथा।
विभुर्विभुर्वांयुवांनावपिआवामपिपातुरक्षतुचतुर्थीद्विवचनेयथाईशः शंभुर्वांयुवाभ्यांनौआवाभ्यांसुखंददातुषष्ठीद्विवचनेयथाहरिर्वांयुवयोःनावपिआ
वयोरपिपातिरक्षतीतिपतिः द्वितीयाबहुवचनेयथासहरिर्वोयुष्मान् नोऽस्मानव्यात् रक्षतुचतुर्थीबहुवचनेयथासवोयुष्मभ्यंनोऽस्मभ्यंशिवंकल्याणं
दद्यात् षष्ठीबहुवचनेयथासहरिर्वोयुष्माकंनोस्माकमत्रलोकेसेवितुमर्हः सेव्यः अर्हसाद्यपणितिकर्मणिय्यण् कृत्यानांकर्तरिवेतिषष्ठीएकवाक्येयु
ष्मदस्मदादेशावक्तव्याः।एकवाक्येएकार्थ्यातेऽनयोःस्थानेउक्ताआदेशाभवंति॥

एकमाख्यातं यत्र तदिति बहुव्रीहिः॥ ॥ एकाख्यातं वाक्यमुच्यते ननु पश्य मृगो धावति इत्यादावेकवाक्यत्वव्यवहारो न स्यात् सत्यं एकाख्यातमित्यत्राख्यातं विशे
ष्यसमर्पकं विवक्षितं तत्तश्च पश्य मृगो धावतीत्यत्राख्यातद्वये सत्यपि पश्येत्यस्यैव विशेष्यसमर्पकत्वान्नोक्तदोषः तथा च वार्त्तिककारः आख्यातं सविशेषणं वाक्य
मित्याह त्वमोदनं पचतवौदनं भविष्यति अत्र ते इत्यादेशो न वाक्यद्वयत्वात् एकवाक्ये यथा अहं ते तुभ्यमोदनं दास्यामि एतेने मया दयन्न्यादेशाः अन्वादेशे वा वक्त
व्याः युष्मदस्मदोः स्थानेऽनन्वादेशेऽर्थे एते आदेशा विकल्पेन भवन्ति अन्वादेशे नित्यं युष्मदस्मदोः स्थानेऽन्वादेशेऽर्थे एते आदेशा नित्यं स्युः अनन्वादेशेऽर्थे धाता ब्रह्मा ते
भक्तस्त्वं भक्तोऽसीति वा। अन्वादेशे तस्मै पूर्वोक्ताय तुभ्यं विष्णवे नमो स्तु नादौ वाक्यादौ मा भूत् यथा त्वा पातु पादादावपि मा भूत् यथा कृष्णोऽस्मान् सर्वदा सर्वस्मिन्नुक्ता।

एकाख्यानम्वाक्यम् ते ने हन ओदनम्पचनवभविष्यति इहतु स्यादेवश्लीनामोदनन्तेदास्यामि अनन्वादेशे वा धाता तेनववा भक्तोऽस्ति अन्वा
देशे नित्यम् तस्मै ते नमः नादौ वाक्यादौ पादादौ च वर्त्तमानयोर्युष्मदस्मदोर्नैते त्वाम्पातु वेदैरशेषैस्समवेद्योऽस्मान्कृष्णस्सर्वदावतु विशेष्यपूर्वे
सम्बोधने सम्बोधनेतरपूर्वं सम्बोधनञ्च हित्वाऽन्यस्मात्संबोधनात्परयोर्नैते देवास्मान्पाहि नृहरे विष्णोस्मान्रक्षसर्वदा विशेष्यपूर्वात्तु ह
रे कृपालो नः पाहि सर्वदा रक्षदेवनः॥

त्वेवनुपातुकी दृशः अशेषैः समस्तैर्वेदैः कृत्वा संवेद्यो ज्ञायमानः सम्वेत्तुं योग्यः संवेद्यः कर्मणि ण्यत् विशे।
ष्य पूर्वे संबोधने तरपूर्वं संबोधनं च हित्वाऽन्यस्मात्संबोधनात्परयोर्नैते संबोधनात्परयोर्युष्मदस्मदोः स्थाने एते आदेशा न भवंति किं कृत्वा विशेष्यं पूर्वं यस्य
तत् एतादृशं विशेषणात्मकं संबोधनं त्यक्त्वा च पुनः संबोधनादितरत् पदं पूर्वं यस्य तत् एतादृशं संबोधनं त्यक्त्वा विशेष्यपूर्वात् संबोधनेतरपूर्वाच्च संबो
धनात् परयोर्युष्मदस्मदोः स्थाने एते आदेशा भवंतीत्यर्थः हे देव त्वमस्मान् पाहि रक्षेत्यर्थः हे नरसिंहावतार हे विष्णो त्वमस्मान् रक्ष पालयेत्यत्र संबोधना राम.
त्परस्यास्मानित्यस्य नसादेशो न जातः विशेष्यपूर्वात्संबोधनात्तु सुरेवं यथा हे हरे कृपास्यास्तीति कृपालुस्तस्य संबोधनं हे कृपालो त्वं नोऽस्मान्पाहि हरे इति विशे ५५

ष्यं कृपालो इति विशेषणं ॥ संबोधने तरपूर्वात्संबोधनात्तु यथा हे देव त्वं नो ऽस्मान् सर्वस्मिन्काले रक्षेत्यत्र देवेति संबोधनस्य सत्त्वेऽपि ततः प्राचीनं रक्षेत्या श्रि- त्यादेशः ॥ ॥ चादिभिश्च चादिगणस्थाः पंचैव चादयो ग्राह्या अनन्वधिकालस्यानुरोधात् सहयोगे तृतीयात्तया साक्षात्संबंधोऽपेक्ष्यते न तु परंपरासंबंधः यत्र यु- ष्मदस्मदर्थगतान्समुच्चयादीन् चादयो द्योतयंति तद्वा चादिभिः सहार्थद्वारा युष्मदस्मदोः साक्षात्संबंधस्तत्रायं निषेध इत्यर्थः यथा आवयोर्युवयोर्वा योऽस्यस- मुच्चये हरिरीशः स्वामीत्यर्थः वा विकल्पे प्रसिद्धो अर्हपूजायां स्वाववधारणे परंपरासंबंधे तु सुरेव यथा हरो हरिश्च मे स्वामीत्यत्र चशब्दो हरहरिगतं समुच्चयं व क्ति हरिहराभ्यां सहास्मदः संबंधो न तु समुच्चयेन किंतु परंपरासंबंधोऽस्ति लक्षणं तु समुच्चीयमानाः स्यर्थांतरसंबंधः परंपरासंबंधः ॥ अचाक्षुषज्ञानार्थधा

चादिभिश्च च वा ह अह एव एभिर्योगे नैते । आवयोर्युवयोश्चेशो हरिर्ममेवरक्षतु । अचाक्षुषज्ञानार्थधातुभिर्योगे चनं चेतसा त्वां समीक्षते भ- क्तस्त्व रूपं ध्यायति चाक्षुषज्ञाने तु भक्तस्त्वा पश्यति चक्षुषा विद्यमानपूर्वात्प्रथमान्तान्परयोरन्वादेशेऽप्येते वा भक्तस्त्वमप्यहं तेन हरिस्त्वा त्रायते स मां त्वा मेति वा चादिर्निपातः च वा ह अह एव एवम् नूनम् पृथक् शश्वत् युगपत् भूयस् न ह हन्त विना नाना स्वस्ति अस्ति । दोषानक्तम् मृषा मिथ्या मिथस ॥

नुभिर्योगे च न ॥ अचाक्षुषज्ञानमर्थो येषां ते अचाक्षुषज्ञानार्था अचाक्षुषज्ञानार्थाश्च ते धातवश्च अचाक्षुषज्ञा- नार्थधातवस्तैर्योगे नैते आदेशा भवंति यथा स भक्तः चेतसा चित्तसंवधिध्यानेन त्वां समीक्षते पश्यतीत्यर्थः परंपरासंबंधेऽपि निषेधः यथा भक्तस्तव रूपं ध्याय- ति विद्यमानपूर्वात्प्रथमांतात्परयोरन्वादेशेऽप्येते वा विद्यमानं पदं पूर्वं यस्य स विद्यमानपूर्वस्तस्मात् प्रथमांतात्परयोर्युष्मदस्मदोरन्वादेशेऽप्येते वा देशा भवं- ति अन्वादेशे नित्यमित्यस्य विशेषोऽयमनित्यत्वे प्राप्ते विकल्पार्थमिदं वचनं यथा त्वं भक्तोऽहमपि भक्तस्तेन हरिस्त्वां मां त्रायते पालयतीत्यर्थः अत्र तेनेति पूर्वं विद्यमानं प- दं तेनो हरिरिति प्रथमांतेन ततः परस्य युष्मच्छब्दस्यान्वादेशे उत्तरत्र त्रायत इति विद्यमानं परं ततः सइति प्रथमांतेन ततः परस्यास्मच्छब्दस्य मादेशो वोध्यः इति युष्मदस्म

पू॰ चं॰ सि॰ दी॰ हु॰ ५६

चश्चादिर्यस्य सचादिः निश्चयेनपतत्यनेकेष्वर्थेषु द्योतकत्वादितिनिपातः। पत्लृपतने। अस्माज्ज्वलादेर्णइतिणप्रत्ययः असत्ववाचिनामेवचादीनांनिपातसंज्ञाअ।
व्ययसंज्ञाचभवतिस्वरादीनांतुसत्ववाचिनामसत्ववाचिनांचाऽव्ययसंज्ञैवंनिपातसंज्ञास्वस्तिवाचयतिस्वः पश्यतिस्वः पततीत्यादौकर्मादिकारकयोगेनसत्त्ववा
चकत्वंस्वरादीनामस्त्येवं एकस्वराणांनिपातानांसंधिर्नभवतीतिनिपातसंज्ञाफलम् एकस्वराणांस्वरादीनांतुसंधिर्भवत्येवतेषांनिपातसंज्ञाभावात् चेतिसमु
च्चयान्वाचयेतरेतरयोगसमाहारेषु। वा स्याद्विकल्पोपमयोरिवार्थेपिसमुच्चये। हेतिप्रसिद्धौ अहेतिपूजायांए वेत्यवधारणेअनवक्लृप्तौच। एवमित्युक्तपरामर्शेनू
नमितिनिश्चयेवितर्केच। एथगितिभिन्नार्थेप्रश्वदितिनिपोनःपुन्येनित्येसहार्थेच। युगपदित्येककालेभूयसितिपुनरर्थेआधिक्येच नहेतिप्रत्यारंभेहंतेतिह।
र्षे विषादे अनुकंपायांवाक्यारंभेचं विनेतिवर्जनेनेत्यनेकविनार्थयोः। स्वस्तीतिमंगले। अस्तीतिसत्तार्थे दोषेतिरात्रौ। वृथेतिव्यर्थेमृषेतिवितथे नक्तमितिरा

अथ॰ अथो॰ अहो॰ ह्यस्॰ श्वस्॰ उच्चैस्॰ शनैस्॰ ऋधक्॰ ऋते। आरात्॰ दिवा॰ रात्रौ। ।सायम्॰ चिरम्॰ मनाक्॰ ईषत्॰ जोषम्॰ तूष्णीम्॰ वहिस्॰ अ
वस्॰ समया॰ निकषा॰ अह्वा॰ वत्॰ सामि॰ सना॰ सनत्॰ सनात्॰ तिरस्॰ अन्तरा। अन्तरेण॰ सहसा॰

।त्रौ मिथ्येतिवितथेमिथस्तिरहस्सहार्थयोः। अथेतिमं
गलाऽनंतराऽऽरंभप्रश्नकार्त्स्न्योऽधिकारप्रतिज्ञासमुच्चयेषु। अथोइत्यथवत् अहोइतिविकल्पेचेदर्थेपिह्यस्तिति अतीतेन्ह्निश्वस्तिति अनागतेदिने। उच्चैस्तितिम
हतिनीचैस्तितिअल्पेर्थे शनैस्तितिक्रियामांद्ये ऋधगितिसत्ये वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये ऋतेवर्जने आरादितिदूरसमीपयोः दिवेतिदिवसे रात्रा
वितिनिशि सायमितिनिशामुखे चिरमितिवहुकाले मनाकूईषत्इमावल्ये। जोषमितिसुखेमौनेच तूष्णीमितिमौने वहिस्॰ अवसइमौवाह्ये समयेतिस।
मीपेमध्येच निकषेतिसमीपे अह्वेतिस्फुटावधारणयोः। वत्वाऽतिशययोरित्यन्ये। इह्वेतिप्राकाश्ये वत् तुल्येइत्यादिनाविहितोयोवत्प्रत्ययःसइहगृह्यते प्रत्य
यमात्रस्यसंज्ञाप्रयोजनाऽभावात् प्रत्ययांतग्रहणेनव्ययथाब्राह्मणवत्क्षत्रियवत् उपधेतिभेदे सामीत्यर्द्धजुगुप्सितयोः ॥ ६ ॥ ६ ॥

राम ५६

सनासनत् सनात् एते त्रयो नित्ये। तिरस्मिति अंतर्द्धौ तिर्यगर्थे परिभवे च। अंतरेति मध्ये विनार्थे च अंतरेणेति वर्जने सहसेति आकस्मिकाविमर्शयोः॥ अलमिति
भूषणपर्याप्तिशक्तिवारणानिषेधेषु वषडिति हविर्दाने स्वमेति संगतौ विहायसेति वियदर्थे। मुधेति व्यर्थे पुरेति अविरते चिरातीते भविष्यदासन्ने च मिथो इति
रहस्सहार्थयोः प्रायसिति बाहुल्ये मुहुसिति पुनरर्थे साकं सार्द्धं मेतो सहार्थे नमसिति नतौ हिरुगिति वर्ज्जने धिगिति निंदाभर्त्सनयोः॥ मा माङ् एतौ निषेधाशंक
योः अमिति शैघ्र्ये स्वच्छ आमिति अंगीकारे नेदिति शंकायां प्रतिषेधविचारसमुच्चयेषु चेदिति यद्यर्थे क्वचिदिति ईषत्प्रश्ने च णिति चेदर्थे समुच्चयादौ त्वनन्वबधकः उ
त्रिति संतर्के संबोधनपूरणेषु यदीति प्रश्नांतरे सत्यमिति प्रश्नप्रतिषेधसत्येषु। ज्ञाविति कदाचिदर्थे। कमिति वारिमूर्द्धनिंदासुखेषु शमिति सुखे ज्योगिति कालभूय
स्त्वप्रश्नेशो घार्थे संप्रत्यर्थे च रहसीत्येकांते अभीक्ष्णमिति पौनःपुन्ये हा इति विस्मयविषादशोकजुगुप्साऽर्त्तिषु आ इति भयाश्चर्ययोः आदिति शंकायां त्वे विशेषवि

अलम्·वषट्·स्वमा·विहायसा·पुरा· मिथो·प्रायस्·मुहुस्·सार्द्धम्·साकम्·समम्· नमस्·हिरुक्·धिक्·मा·माङ्·स्वर्·अन्तर्·प्रातर्·पुनर्·
सनुतर्·यावत्·तावत्·स्वाहा·स्वधा·नद्याहि·खलु·किल·सुष्ठु·दुष्ठु·आदह॥

तर्कयोः हैविनर्के रैदाने अनादरे च रैकरोति रदातीत्यर्थः रै त्वं
किंवदसीति किमिति पृच्छाजुगुप्सेषदर्थानिशयेषु यदिति यत्कारणे तरिति हेतौ इतीति हेतुप्रकारप्रकर्षैवमर्थव्यवस्थास्वरूपविवक्षानियमसमाप्ति प्रकृतनवस्य
माणपरामर्शमतेषु एवेत्युपमायां हहोइति विचारे स्वरिति स्वर्गे परलोके च। अंतरिति मध्ये प्रातरिति प्रत्यूषे। पुनरित्यप्रथमे विशेषे च। सनुतरित्यंतर्द्धाने स्वरा
द्याः पंचस्वरांताः यावत्तावदेतौ साकल्यावधिमानावधारणेषु साकल्ये यावत्कार्यं तावत्कृतं अवधौ यावद्गंतव्यं तावत्तिष्ठामि मानेयावद्दत्तं तावद्भुक्तं
अवधारणे यावदमत्रं तावद्ब्राह्मणानामंत्रयस्वेति। स्वाहेति देवताभ्यो दाने तथा हीति निदर्शने। खल्विति निषेधवाक्यालंकारनिश्चयेषु· किलेति· वार्त्ता
यामलीके चानुवितर्के ननु इति प्रश्नावधारणानुज्ञेच्छामंत्रेषु। वाक्यारंभा दावपि सुष्ठु प्रशंसायां दुष्ठु निंदार्थे आदह इत्युपक्रमहिंसाकुत्सनेषु।

सि॰ कौ॰ टी॰ सु॰ ५७

उपसर्गप्रतिरूपको यथा अवदत्तमिति दोदत्तोतिरच्चादेशः इह अवस्यानुपसर्गत्वात्स्वरान्तोवेति तकारो न भवति स्वरप्रतिरूपको यथा अ आ इत्यादिविभक्तिप्रतिरूपको यथा अहंयुः अहमिति विभक्तिप्रतिरूपकमहं कारे वर्तते ऊर्णाहंशुभंभ्यो युरिति युः पदासच्छब्दान्निष्पन्नो यो हंशब्दस्तस्मात्प्रत्ययः क्रियेत तर्हि समासप्रत्यययोरिति लुकि सति अस्मद्युरिति स्थिते मदीयदत्यत्र इव मदादेशे मद्युरिति स्यादिति भावः हे नावितिः निमित्ते स्वपमित्यात्मनेनत्यर्थे उ नेति विकल्पे न क्रितिनिषेधे परार्थं विसयेषु नदन्यनद्विरुक्तं तद्ज्ञावेषु च स्वधे निपितृभ्योदाने स्मेयनीने पादपूरणे च। अस्मीत्यहमित्यर्थे वै पादपूरणे विशेषेपि शं च डिन्तः करणे। आमित्यव्ये चानोनिषेधे दिष्ट्या इत्यानंदे सद्भुनन दर्शन प्रातिलोम्येष्वित्यन्ये अ इति संबोधने ऽधिक्षेपे निषेधे च आ इति वाक्यस्मरणयोः इ इति संबोधनजुगुप्साविस्मयेषु ई भर्त्सने उ ऊ दुःखवितर्कयोः ऋ ॠ ऌ ॡ गानसमूहे ए संबोधने ए आश्चर्ये ऐ संबोधने ओ अंगीकारे। पशु सम्यगर्थे शुकं शीघ्रे यथा कथा चेत्यनादरे

उपसर्गाः स्वरविभक्तिप्रतिरूपकाश्च। अवदत्तम्। अहंयुः। हे नौ। अ आ इ ई उ ऊ ए ऐ ओ औ पशु शुकम् यथा कथा च पाट् प्याट् अङ्ग है हे भोः अये द्य विषु रे अरे एक पदे द्राक् पुं सुं पुनत् आतः श्रौषट् वौषट् इत्यादि तत्रादिविभक्त्यर्थे निपात्यते। तस्मिन्निति तत्र अस्मिन्निति अत्र यस्मिन्निति यत्र

पाट् प्याट् अंग गहे हे भोः अपि एते सप्तसंबोधने द्य इति हिंसाप्रातिलोम्यपादपूरणेषु विषु इति नानार्थे रे अरे एतौ नीचामंत्रणे एकपदे इत्यकस्मादित्यर्थे द्राक् मं सु एतौ शीघ्रे पुनत् इति कुत्सायां आतः इतीतोपीत्यर्थे श्रौषट् वौषट् एतौ हविर्दाने अन्ये पि संति तथा हि कामं स्वाच्छन्द्ये प्रकाममित्यतिशये साम्प्रतमिति। न्याय्ये परमिति किं त्वर्थे सा साक्षादिति प्रत्यक्षे साचीति तिर्यगर्थे संवदिति वर्षे अवश्यमिति निश्चये उषेति रात्रौ ओमिति अंगीकारे ब्रह्मणि च भूरिति पृथिव्यां भुवइत्यंतरिक्षे कुत्सिते घट् ययोः अंजसे नितत्वशीघ्रार्थयोः मिथु इति द्वावित्यर्थे अस्तमिति विनाशे स्थाने इति युक्तेवरमिति। ईषदुत्कर्षे सुदी तिशुक्ल पक्षे वदीति कृष्णपक्षे तुमिति तुंकारे। आहेति उवाचेत्यर्थे आसेति बभूवेत्यर्थे। आर्ये तिप्रतिबंधे असीतित्वमित्यर्थे वाक्यालंकारयोः ब्रूहीति प्रेषाऽनुज्ञावसरेषु वामितियुवामित्यर्थे चट् चाटु एतौ प्रियवाक्ये। एवमन्ये पूह्याः। तत्रादिविभक्त्यर्थे आदिशब्दः प्रकारे वर्तते गणाभावात् विभक्तीनामर्थे ऽभिधेयो पादा

राम ५७

नादिस्तस्मिन्नर्थे तत्रादिर्निपात्यते तत्र आदिर्यस्य स तत्रादिः शब्दसमूह इत्यर्थः तस्मिन्निति तत्र एतस्मिन्नित्यत्र यस्मिन्निति यत्र॥ ❀ ॥ कस्मिन्निति कुत्र क्व येन
प्रकारेण यथा सर्वेण प्रकारेणेति सर्वथा केन प्रकारेणेति कथम्। अनेन प्रकारेण एतेन प्रकारेण वेतीत्थं तस्मात् तस्माद्वेति ततः। यस्मात् यस्माद्वेति यतः। कस्मा
त् कस्माद्वेति कुतः। सर्वस्मात् सर्वस्माद्वेति सर्वतः बहोरिति बहुतः। पूर्वस्मिन् देशे पूर्वस्माद्देशात् पूर्वो वा देशः पुरः पुरस्तात्। अधः। अधस्तात् ऊर्द्ध्वं ऊर्द्ध्वात् ऊ
र्द्ध्वे वेति। उपरि उपरिष्टात् दक्षिणस्मिन् दक्षिणो वेति दक्षिणेन दक्षिणस्यां दिशि दूरे इति दक्षिणा दक्षिणाहि उत्तरस्मादुत्तरस्यां वेति उत्तरतः उत्तरस्यां दिशि
दूरे इति उत्तराहि। उत्तरासे भवानिति ततो भवान्। तत्र भवान्। तं भवन्तमिति ततो भवन्तं। तत्र भवन्तं तेन भवतेति ततो भवता तत्र भवता तस्मै भवते ति ततो भवते तत्र

कस्मिन्निति कुत्र। क्व। कुह। अनेन प्रकारेण तथा। सर्वथा। कथम्। इत्थम्। अस्मादिति इतः। एतस्मादित्येततः। यतः। सर्वतः। कुतः बहुतः सार्व
विभक्तिकस्तसिरित्येके। आदितः। मध्यतः। अन्ततः। पूर्वस्मिन्निति पुरः। पुरस्तात्। अधः। अधस्तात्। उपरि उपरिष्टात् परस्मिन्निति परेण
दक्षिणेन दक्षिणा॥ दक्षिणतः। उत्तरतः। दक्षिणस्यां दिशि दूरे दक्षिणा। दक्षिणाहि। राजाधीनं राजसात्। सर्वं भस्म भस्मसात्। उरी। ऊरी उररी॥
विस्ताराङ्गीकारयोः। सद्यादिः कालेसमानेऽह्नि 'सद्यः' 'अद्य' 'अधुना' इदानीम्। तस्मिन्काले तदा 'यदा' कदा 'सदा' 'सर्व्वदा' 'एकदा' 'अन्यदा'
'सपदि' 'साम्प्रतम्' 'झटिति' 'तूर्णम्'

भवतेतस्माद्भवत इति ततो भवतः तत्र भवतः तस्य भवत इति ततो भवतः तत्र भवतः तस्मिन्भवतीति ततो भवति तत्र भवति॥ सद्य आदिः
काले अव्याप्यादिशब्दः प्रकारे वर्तते पूर्वदेशकालादिविशिष्टो विभक्त्यर्थो गृहीतः इह तु कालविशिष्ट एव विभक्त्यर्थो गृह्यते समानेऽह्नीति समानस्य सादे
शः अद्यस प्रत्ययश्च तत्काले। सद्यः अस्मिन्नहनीति इदमो अशादेशो द्यः प्रत्ययश्च साम्प्रतं दिनेऽद्य अधुना इदानीमेते वर्तमानलक्षणार्थे। यस्मिन् काले यदा।
कस्मिन् काले कदा सर्वस्मिन्काले सर्वदा। एकस्मिन्काले एकदा अन्यस्मिन्काले अन्यदा सपदि सं प्रति एते त्रयो वर्तमानलक्षणार्थे झटिति तूर्णं ६॥

आस्पुशी घ्रमेते शैघ्र्ये पूर्वस्मिन्नहनीतिपूर्वेद्युः परस्मिन्नहनीतिपरेद्यवि अस्मिन् वर्षे इतिसेषमः पूर्वस्मिन् वर्षेपरुत् पूर्वतरे वर्षेपरारि। अन्यस्मिन्नहनीति अन्येद्युः अन्यतरस्मिन्नहनीति अन्यतरेद्युः। उभयस्मिन्नहनीतिउभयेद्युः तस्मिन् कालेतर्हि कस्मिन्काले कर्हि यस्मिन् कालेयर्हि एतस्मिन्कालेएतर्हिप्रादिरुपसर्गाः प्र आदिर्यस्यसप्रादिः तद्गुणसंविज्ञानोऽयंबहुव्रीहिः प्रकर्षइतिलिंगात्। उपसर्गीयेसृज्यतेउच्चार्यतेक्रियावाचकस्यशब्दस्येत्युपसर्गः। कर्मणि घञ् अन्वर्थसंज्ञाबलात्क्रियासंबद्धः इतिलभ्यते यदुक्तं यत् क्रियायुक्ताःप्राद यस्तंप्रत्येवोपसर्गसंज्ञेति उपसर्गोहि अर्थविशेषस्यद्योतकान्तु वाचकाः। आदिकर्मे रा दीर्घ प्र भृश संभव तृप्ति यु वियोग स्तु द्दिश की छा शांति पूजाग्र दर्शने १ आदिकर्मणि प्रारंभकर्मणि यथाप्रयातः दीर्घेयथाप्रबलामूषिकाऐशेयथाप्रभुः भृशार्थे यथाप्रवदंति संभवे यथा हिमवतोगंगाप्रभवति तृप्तौयथा प्रभुक्तमन्नंवियोगेयथा प्रोषितः शुद्धौयथाप्रसन्नमुदकं शांतौयथाप्रशांतः इच्छायांयथा प्रार्थयतेकं

आस्पुशीघ्रम पूर्वेद्युः परेद्युः परेद्यवि सेषमः परुत् परारि अन्येद्युः अन्यतरेद्युः उभयेद्युः तर्हि यर्हि कर्हि एतर्हि प्रादिरुपसर्गाः। प्र· परा· अप· सम· अनु· अव· निस· निर· दुस· दुर· अभि· वि· अधि· अति· सु· उद्· नि· प्रति· अपि· परि· उप· आङ्· श्रत्· अन्तर· आविर· प्राग्धातोः उपसर्गाधातोःप्रा
॥ क्प्रयोक्तव्याः

न्याशान्तौ यथाप्रशांतोग्निः पूजायांयथाप्रांजलिःस्थितः अग्रेयथाप्रवालं दर्शनेयथाप्रलोकयति १ वधेगतौदर्शनेचविक्रमाभिमुखे भृशे अधीन मोक्षणा प्रातिलोम्यकेषु परामतः २ वधेयथा पराहतः गतौयथापरागतः। दर्शने यथा। पराद्दष्टः। विक्रमेयथापराक्रांतः अभिमुखेयथापराह्न तः। भृशेयथापराजितः अधीनेयथापराधीनः। मोक्षणेयथा पराकृतस्त्यक्त इत्यर्थः। प्रातिलोम्ये यथा पराङ्मुखः २ अयोवियोगेनिकृतौविपरीतेनि दर्शने आनंदेवर्जनेचौरेचारेणसमुदाहृतः ३ वियोगेयथाअपयातिनिकृतौ यथाअपकृतवान् विपरीतेयथा अपशब्दः नि दर्शनेयथा अपदिशति आनंदेय याअपहसंतिवर्जनेयथा अपवनाद्दृष्टोदेवः चौर्येयथा अपहरति चारणेयथा अपसरति ३ संयोगेकोचप्रभवेसत्यप्रत्यसासिद्दिषु भूषाश्लेषस्वी

करणाक्रोधाभिमुखवाचिनाम् ४ संयोगे यथा संगतः पुत्रेण ऐक्ये यथा संवदंति सख्यः प्रभवे यथा काष्ठेभ्यः अग्निः संभवति सत्ये यथा गां संजानाति प्रत्यक्षे यथा संप्रय
स्यते स्निग्धे यथा संस्निग्धः भूषायां यथा संस्कृता कन्या आश्लेषे यथा संधत्ते स्वीकारे यथा संगृह्णाति क्रोधे यथा संक्रुद्धः अभिमुखे यथा संयाति ४ वेदाधिष्ठानसामी
प्यपश्चाद्भावानुबंधने साम्याभिमुख्यहीनेषु विसर्गे लक्षणेऽप्यनुः ५ वेदे यथाऽनुवाकमधीते अधिष्ठाने यथा अनुष्ठानं देशः सामीप्ये यथाऽनुमेघं वर्षति पश्चाद्य
था अनुरथं भावानुबंधने यथा अनुशयः साम्ये यथा अनुकृतिः अभिमुखे यथाऽनुवत्सो मातरं धावति हीने यथाऽन्वर्जुनं योद्धारः विसर्गे यथाऽनुज्ञातः लक्षणे
यथा अनुवनमसत्नागतिः ५ ज्ञानावलंबशुद्धीषदर्थव्याप्तिपराभवे अवो ज्ञेयो वियोगे च लोकयोगानुसारतः ६ ज्ञाने यथाऽवगतोऽर्थः अवलंबे यथा अवलं
ब्य यष्टिं गच्छति शुद्धौ यथा अवदातः ईषदर्थे यथा अवलंब्यते व्याप्तौ यथा अवकीर्णम् पराभवे यथाऽवधूनोति वियोगे यथा अवयानः ६ निर्वियोगात्ययादेशा
तिक्रमे लाभनिश्चिते दुरीषदर्थे कृच्छ्रेऽर्थे कुशासंपत्तिसंकटे ७ वियोगे यथा निःसंगो ब्रवीति अत्यये यथा निर्मेघं आदेशे यथा निर्दिष्टं अतिक्रमे यथा निष्क्रांतः ला
भे यथा निर्दिष्टः निश्चिते यथा निश्चितं दुरद् ईषदर्थे यथा दुर्गतिः कृच्छ्रार्थे यथा दुर्जीवः कुशे यथा दुर्बलः असंपत्तौ यथा दुर्गतः संकटे यथा दुर्दिनं ७ नानावि
योगातिशये भृशे मोहे शवाङ्मृधे पैशून्यास्मरणे भूषेषदर्थोनाभिमुख्यके ८ अनवस्थामुख्यशौर्यदर्शने विरुदाहृतः आङ् इच्छाभयवाक्येषदर्थाश्लेषादिकर्म
णि ९ नानावियोगे यथा वियुक्तः अतिशये यथा विकीर्णः भृशे यथा वितटानघोमहत्यरत्यर्थः मोहे यथा विमनस्कः ईशे यथा विभुः वाग्मृधे यथा विवदंते पैशु
न्ये यथा विगायति अस्मरणे यथा विस्मृतः भूषायां यथा विभूषितः ईषदर्थे यथा विलोपितः अनाभिमुख्यके यथा विमुखः ८ अनवस्थायां यथा विभ्रां
तः मुख्ये यथा विशिष्टः शौर्ये यथा विक्रांतः दर्शने यथा विलोकयति आङ् इच्छायां यथा आकांक्षति भये यथा आबिभेति वाक्ये यथा आजानाति ईषद
र्थे यथा आताम्रनखः आश्लेषे यथा आलिंगति आदिकर्मणि यथा आरभते ९ बंधनेऽभिविधौ शाठ्यकृच्छ्रसामीप्यसंश्रये अभिमंत्रनिवृत्याशादाना
नुभवविस्मये १० प्रतिष्ठादेशमर्यादास्पर्द्धामुख्योर्ध्वकर्मणि निराश्रयेऽधोऽभृशादेशे नित्यकौशलबंधने ११ बंधने यथा कवचमाबध्नंति अभिविधौ
॥ ॥ ॥

यथा।आकुमारं यशः'शाठ्ये यथा'आचरति'कपटेन हन्त्र्ये यथा'आहनः'सामीप्ये यथा'आसन्नावयं संश्रये यथा।आवसथः।अभिमंत्रे यथा'आमंत्रणं निहृतौ य
था'आधावति'आशायांयथा'आशास्ते'आद्राने यथा'आदत्ते'अनुभवे यथा'आशितं'विस्मये यथा·'आश्वंकिलनत् १० प्रतिष्ठायांयथा'आस्पदं'आदेशे यथा'आदिष्टः।म
र्यादायांयथा'आमुक्तेः'दुःखं स्पर्द्धायांयथा'आहूयते मल्लं मल्लः'मुख्ये यथा'आगच्छति'ऊर्द्धकर्मणि यथा'आरोहति'निपर्वनं'निराशो यथा'निकरोति मणीनां'अधोय।
था'निपतति'अभृशे यथा'निगृहीतः'आदेशे यथा'निदर्शितं'निम्ने यथा।निविशते।कौशले यथा'निपुणः'बंधने यथा'निबद्धः ११ अंतर्भावे समीपे निदर्शनोपरमा
श्रये'अधिरध्ययनैश्वर्यवशित्वस्मरणाधिके १२ अंतर्भावे यथा'निपीतमुदकं सिकताभिः'समीपे यथा'निकृष्टः'दर्शने यथा' 'निदर्शनं'उपरमे यथा
निवृत्तप्राणनः'आश्रये यथा'निलयः'अधि अध्ययने यथा'उपाध्यायादधीते'ऐश्वर्ये यथा'अधिपतिः'वशित्वे यथाऽधीनः'स्मरणे यथा'मातुरध्येति'अधिके यथाऽधिकृ
नम् १२ अपिः संभवगर्हाशीर्मृति भूषासमुच्चये विक्रमातिक्रमाऽवुद्ध भृशार्थातिशयेष्वति १३ संभवे यथाऽपि प्रयोजनमस्ति'गर्हायांयथाऽपि पापिनः।आशि
षि यथा'भद्रमपि'मृतौ यथा'मरणमपि'भूषायां यथापि नह्यति हारं'समुच्चये यथा'नरपि विक्रामति'अतिविक्रमे यथाऽतिरथः'अतिक्रमे यथा'अतिक्रामति।अवुद्धेय
थाऽतिगृह्णं'भृशार्थे यथा· अतितप्तं'अतिशये यथा।अतिमनुते १३ प्रशंसानुमते पूजाभृ शकृच्छ्रशुभेषु सुः।उत्प्राबल्पवियोगोर्द्धकर्मलाभप्रकाशने १४
प्रशंसायां यथा'सुरूपः।अनुमते यथा'सुकृतं'पूजायांयथा'सुसाधुः'भृशे यथा'सुतप्तः'कृच्छ्रे यथा'सुदुष्करं'शुभे यथा'सुगंधः'उत्प्राबल्ये यथा।उद्धुलः'वियोगे य
था'उद्गच्छति·।उर्द्धकर्म्मणि यथा'उत्तिष्ठति शयनात्'लाभे यथा'उत्पन्नं'प्रकाशने यथा'उच्चरति १४ आश्चर्ये मोक्षणेऽभावे चलप्राधान्यशक्तिषु'अभिपूजाभृशार्थे
च्छा व्याधि साम्याभिमुख्यके १५ आश्चर्ये यथा'उत्सुकः'मोक्षणे यथा'उद्गतो श्वः'अभावे यथा'उत्पथः'चले यथा'उत्कः'प्राधान्ये यथा'उद्दिष्टः'शक्तौ यथा'उत्साहः'अ
भिपूजायांयथा।अभिवंदते देवं।भृशे यथाभियुक्तः'इच्छायांयथाऽभिलिप्सते।व्याधौ यथा'अभिसंदेहो व्याधिः'साम्ये यथा।अभिजातः'आभिमुख्यके।यथा
भिमुखं १५ सारूप्यवचनाहारस्वाध्यायेषु निरूपितः'सादृश्यादानहिंसांगीकृतौ प्रतिनिधौ क्वचित् १६ सारूप्ये यथा'अभिरूपः'वचने यथाऽभिधानं॥०६०।
॥ ॥

आहारे यथा ऽभ्यवहरति। स्वाध्याये यथा अभ्यस्यति प्रतिसाहश्ये यथा देवदत्तस्य प्रति आदाने यथा प्रतिगृह्णाति हिंसायां यथा प्रतिहंति अंगीकृतौ यथा प्रतिज्ञा
नं प्रति निधौ यथा अभिमन्युरर्जुनतः प्रति १६ व्याध्याभिमुख्ययोर्व्याप्तौ वारणे प्रतिरुच्यते परिः समंततो भाव व्याप्ति दोषकथासु च १७ व्याधौ यथा प्रतिश्यायः आ
भिमुख्ये यथा प्रति सूर्यं गच्छति व्याप्तौ यथा प्रतिकीर्णपांशुभिः वारणे यथा प्रतिषिद्धः परि समंततो भावे यथा परिभ्रमति व्याप्तौ यथा परिगतो ग्निर्मार्गम्। दोषक
थासु यथा परिवादः १७ भूषाश्लेषे पूजने च वर्जने वसने शुभे उपः सामीप्य सामर्थ्य व्याप्ता वधिकृतौ मृतौ १८ भूषायां यथा परिकरोति कन्याः आश्लेषे यथा परिष्व
जते। पूजने यथा परिचरति गुरुम्। वर्जने यथा परिवनेभ्यो हृष्टो देवः वसने यथा परिधने वासः अशुभे यथा परिदेवनं उप सामीप्ये यथा उपकुंभम् सामर्थ्ये य
था उपकरोति मित्रेभ्यः व्याप्तौ यथा उपकीर्णः पांशुभि आचार्यकृतौ यथा उपदिशति शिष्येभ्यः मृतौ यथा उपरतः। १८ दोषदानक्रियावीप्सारंभाध्ययनपूजने

तदव्ययम्। चादि अव्ययसंज्ञम्भवति। ननु शब्दनिर्देशो क्वा यत् नस्वाक्त्वा काप् तुम् णमुल् धा च्वि शस् वत् कृत्वस् सु आम् इत्याद्यन्तमव्ययसंज्ञ
ञ्भवति॥

कस्मा चार्यैः कृता श्लोका उपसर्गार्थ संग्रहे। १९ दोषे यथा उपघातः। दाने यथा उपहरत्यर्थं देवदत्ताय क्रियायां यथा उपचारः वीप्सायां देवं देवमु
पचरति आरंभे यथा उपक्रमते भोक्तुम्। अध्ययने यथा उपाध्यायादधीते पूजने यथा उपचितः पिता पुत्रेण १९ निस् निश्चयादौ दुस् दुःखादौ अत् श्रद्धादौ। अंतर
मध्यादौ आविर् प्राकट्यादौ "प्राग्धातोः" वेदादौ विपरीत प्रयोग दर्शनात् व्याकरणे पि लोके ऽपि विपरीत प्रयोगो मा भूदिति नियमार्थमिदम्॥ ॥ तदव्ययं प्रादिं चादि त॥
आदि सद्य आदि परामर्शार्थं तद्ग्रहणम् अत्र नामत्व इत्यनुवृत्त्य प्रथमया विपरिणम्य विशेष्यमभ्युपेयम्। चादि स्वरादीनि तु विशेषणानि विशेषणे हि तदन्त
विधिस्तेन परमोच्चैः परमस्वरित्यादावव्ययसंज्ञा भवत्येव उच्चैरति क्रांतो ऽत्युच्चैः अत्युच्चैसौ अतिस्वः अतिस्वरौ अतिस्वर इत्यादि गौणे तु नाव्ययसंज्ञा मुख्यामुख्य
योरिति न्यायात्। क्त्वाद्यं तं च पूर्वकाले क्त्वेति क्त्वा समासे क्त्वा विकल्पं तुम तदर्थायां भविष्यतीति तुम् पौनःपुन्येण मृ पदं हि श्चेति णम् संख्यायाः प्रकारे धेति धाव

पू॰ वे॰
सि॰ सु॰
टी॰ ६०

वहऽल्पार्थोन्कारकाच्च सद्दनिशस नभूतनद्भावेनभवत्ति योगे नामनश्विरितिचिः वनुत्स्पेद्दनिवन्क्रियायान्नाहनोकृत्वसितिकृत्वसुहित्रिचतुर्भ्यः सुरितिसुःकि।
मोऽव्ययाद्दाख्यानाचनरतमपोराम वक्तव्यः अद्व्यप्रकर्षे इत्याम॥ ॥ अव्ययाद्दिभक्तेर्लुक् अव्ययाद्दिहितायाविभक्तेर्लुक्स्यान् विभजनंविभक्तिर्विभागः।
यद्दा विभज्यन्ते बोध्यन्ते कर्तृकर्माद्यर्थोऽनयेति विभक्तिः स्वादिस्त्यादी रेवेति योगरूढिः।सदृशंत्रिषुलिंगेषुसर्वासुचविभक्तिषु वचनेषुचसर्वेषुयन्नव्ये
तितदव्ययम्‌ १ आथर्वणप्रणवविद्यागतश्रुतिरियं यत्‌ शब्दरूपंनव्येतिनव्ययं प्राप्नोतितदव्ययं नव्ययात्तेयं कीदृशंतत्‌ त्रिषुलिंगेषुसदृशमेकप्रकारं पुनः
कीदृशं सर्वासुविभक्तिषुसदृशंचपुनः कीदृशं सर्वेषुवचनेषु सदृशं १ वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः आपंचैवहसांतानांयथावाचानिशादिशाभा

अव्ययाद्दिभक्तेर्लुक्‌। सदृशंत्रिषुलिङ्गेषुसर्वासुचविभक्तिषु वचनेषुचसर्वेषुयन्नव्येतितदव्ययम्‌ १ वष्टिभागुरिरल्लोपमवाप्योरुपसर्ग
योः आपंचैवहसान्तानांयथावाचानिशादिशा २ वगाहः पिधानम्‌ इत्यव्ययानि आवतः स्त्रियाम्‌ अकारान्तान्नाम्नः स्त्रियांवर्तमानाद
प्प्रत्ययो भवति सर्वामाया अजादेश्च एडका अजाश्च ॥

गुरिराचार्योऽवाप्योरुपसर्गयोरल्लोपंवष्टिवांच्छतीत्यर्थः चपुनःहसांतानांशब्दानामापंव
ष्टि। अल्लोपे यथावगाहः अवगाहः॥ पिधानं अपिधानं अपिनासाहचर्याद्दादिरेवाकारोलुप्यते नान्यइतिभावः॥ इत्यव्ययानि। आवतः स्त्रियाम्‌। अतइति
पसग्रहणेनाधिकृतस्यनाम्नोविशेषणात्तदंतविधिः स्त्रियामितिप्रकृत्यर्थविशेषणंस्त्रियांवर्तमानादकारान्तान्नाम्नआप्स्यात्‌ पित्वंस्वरार्थं स्त्र्यादिकं
लिंगत्रयंतुपारिभाषिकमेवलिंगानुशासनादिभ्योनिर्णेयं मायाशब्दनाऽविद्यावा॥ अजादेश्च अजशब्द आदिर्यस्येतिबहुव्रीहिः अजादेर्गणादाप्स्यात्‌।
तस्याधीनेदोल्ये अजा एडका अश्वा चटका मूषिका शूद्रा अमूला संफला भस्त्रफला अजिनफला शणफला प्रत्यक्फला पिंडफला सत्पुष्पा प्राक्पुष्पा कांडपुष्पा राम
प्रांतपुष्पा एकपुष्पा क्रुंचा उष्णिहा देवविशा इत्यादिषुजातेरयोपधादितीप्प्राप्नः बाला वत्सा होढा मन्दा विलाते त्यादिषुअनंत्यवयोवाचि ॥ ६ ॥ शू ६०

न ङीप् प्राप्तः। ज्येष्ठा कनिष्ठा मध्यमा कोकिलेत्यादिषु पुंयोगे चेन्ङीप् प्राप्तः त्रिफलात्यनीकेत्यादौ समाहारेऽतन्ते ङीब्विनी प् प्राप्तः सर्ईवजादेरित्यनेन बाध्यते अजादेः।
स्त्रीत्वाऽभावात्' पंचानामजानां समाहार इति पंचाजी अत्रा प्न अत्र हि समासार्थ समाहारनिष्ठं स्त्रीत्वं न त्वजादिनिष्ठं॥ ॥ चटकेत्यत्र काप्यत इतीकारो
नसिपकादीनां नेति निषेधात् मुषेर्दीर्घश्चेति किक प्रत्यये इकारमध्यो मूषिकशब्दः' होडेति भिक्षुस्त्री मंदेत्यप्रौढास्त्री 'विलातेति नवयौवना स्त्री सफलेत्यादयस्त्र
कपुष्पान्ता ओषधिविशेषाः भस्त्रेव फलानि यस्याः इति विग्रहः कुकुट्यादिषु पाठात् पुंवद्भावः' शूद्रेति जातावेवापमहत्पूर्वात् शूद्रशब्दात्तु ङीबेव महाशूद्री' आभी
रीतु महाशूद्री जातिपुंयोगयोः समेत्यमरः। पुंयोगेत्वी वेव शूद्री वैश्यात् शूद्रो सुराजन्यात् माहिष्योऽर्यौ सुनोस्मृताविप्यमरः' क्रुंचेत्यादिस्त्रयो मीहसांता इत्येके भाष्येतु

चटका' मूषिका' बाला' वत्सा' होडा' मन्दा' विलाता सम्फला' भस्त्रफला। अजिनफला' शणफला' पिण्डफला' सत्पुष्पा' प्राक्पुष्पा' प्रत्यक्पुष्पा।
काण्डपुष्पा' प्रान्तपुष्पा' एकपुष्पा शूद्रा' कुञ्चा' उष्णिहा' देवविशा' ज्येष्ठा' कनिष्ठा' मध्यमेति पुंयोगेऽपि। त्रिफला अमूला। कोकिला जातावा।
पि इत्यादि। पादो वाईप्' द्विपदी द्विपात्। आ ऋचि। ऋचि वाच्यायां सन्त्यां पादन्ताद्रापस्यात् द्विपदा' ऋक्॥
क्रुंचा नालभेत् उष्णिहककुभावि।
त्यादि प्रयोगमुदाहृत्यादन्ता अपि स्त्रीकृताः पचाद्यप्रत्ययेन नाम्युपधात्क इति कप्रत्ययेन च रूपसिद्धेः' उष्णिहेति छंदो जातिः' देवविशेति देवानां प्रजा पुंयोगे पिय
दाज्येष्ठादयः यमजाताः तैव तैतेन दाऽदंतत्वादेवाप्यदा ज्येष्ठस्य स्त्रीति पुंयोग विवक्षातदाप्याप् भवतीसूचयितुमपि शब्दः' कोकिलस्य स्त्री कोकिला जातिवाच।
कादप्य जादेरा बेव भवति' ननु जातेरिति ङीष्' ते न जातावपि कोकिलेत्येवं नञ्पूर्वा न्मूलशब्दाज्जातावप्यावृं अमूलेत्योषधिजातिः' अनञ्पूर्वात्तु शतमू
लीत्येवं पादो वा ईप् 'कृतसमासांतात्पादशब्दाद्वौ पूर्वा स्यात्' द्वौ पादौ यस्याः सा इति बहुव्रीहौ संख्यासुपाग्रादिपूर्वस्येति पादशब्दस्यांतलोपः' द्विपात् ईपि
तु शसादौ स्वरे तद्धित यस्वरयोरिति पद् द्विपदी छंदो जातिः ऋचि वाच्यायां तु द्विपदा एकपदा ऋग् इत्येव भवति॥ छ॥ १७॥ ॥ ६॥ ॥ छ॥ ६॥

पू॰ सि॰ चं॰ टी॰ सु॰ ६१

काप्यतः काऽपि इत् अत इति च्छेदः । ककारेण सहितः आप् काप् तस्मिन् प्रत्ययस्थैव ककारो गृह्यते । आपा सहचर्यात् । स्त्रियां वर्तमानस्य नाम्नोऽतः स्थाने इकारो भव
ति कापि परे । करोतेर्ण्वुल् णावि नित्ववुणौ णित्वाद्वृद्धिः । कारिका । एवं पचतेः पाचिका । अतः किं । नौका । नौशब्दात् स्वार्थे कः प्रत्ययः । ककाराभावे तु शक्नोतीति शका । पचाद्य
च् प्रत्ययः । तपरः किं । राका । मामकनरकयोरुपसंख्यानं । ककारस्य प्रत्ययस्थत्वाभावादप्राप्तौ वचनं । ममेयं मामिका । अणीनयोरिति ममकादेशः । णित्वाद्वृद्धिः । अजादित्वाट्टाप् । नरान् कायती
ति कै शब्दे अस्मात् आतोऽनुपसर्गे क इति कप्रत्ययः । आप् इत्वं च । नरिका । क्षिपकादीनां च । एषामत इकारो न कापि । क्षिपेर्ण्वुल् इगुपधात्क इति कः । ध्रुव स्थैर्ये इत्यस्मादपि कः । अथवा
ध्रुगतिस्थैर्ययोरस्मात् पचाद्यच् प्रत्ययः । कुटादित्वात् ङित्वेन गुणाभावे तु धातोरियङुवङाविति उवङ् । क्षिपा एव क्षिपका । शस्त्रविशेषः । ध्रुवा एव ध्रुवका । भाजनं । चट भेदने । अस्मात् पचा

काप्यतः । कापि परे पूर्वस्याकारस्येकारो भवति । कारिका । पाचिका । पाठिका । अतः किम् । नौका । तपरः किं । राका । क्षिपकादीनां च । क्षिपका । ।
ध्रुवका । कन्यका । चटका । यका । सका । उपत्यका । अधित्यका । तारका ज्योतिषि । अन्यत्र तारिका । वर्णका तान्तवे । वर्णिकान्या । वर्तका शकुनौ प्राचाम् । उ
दीचान्तु वर्तिका । अष्टका आष्टे । अष्टिकान्या । क्वचिन्न । सूतका सूतिका । पुत्रका पुत्रिका । वृन्दारका वृन्दारिका । आर्यका आर्यिका । चटका चट

यः । चटका । सर्वत्रापि अज्ञातादौ के पुनरपि च ह्रस्वो वेति ह्रस्वः । या एव यका । सा एव सका । आभ्यामाख्यानाव्ययसर्वादेरित्यकः । उपाधिभ्यामासन्नारूढयोरिति त्यकः । उपत्य
का । अधित्यका । उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यकेत्यमरः । तरतेर्ण्वुल् । अकादेशो वृद्धिश्च । ज्योतिर्नक्षत्रं नेत्रकनीनिका च तयोरर्थे तारका । अन्यत्र तु तारिका । तन्तूनां विका
रस्तान्तवं तस्मिन् वर्णका प्रावारविशेषः । वर्ण वर्णक्रियाविस्तारगुणवचनेष्विति चौरादिकाद्वुण् अन्यविशेषस्य व्याख्यात्री स्तोत्रकर्त्री वर्णिका । वर्तयतीति वर्तिका । वुण्
प्रत्ययः शकुनाविव वाच्योऽयं विकल्पः । अन्यस्मिन्नर्थे तु नित्यमित्वं । प्राचां पूर्वाचार्याणां मते इत्वाभावः उदीचामाधुनिकानां मते इत्वमित्यर्थः । अश्नन्ति ब्राह्मणा यस्यां साऽष्टका । राम
इष्यशिभ्यां तकन् इति तकन् । अष्टौ परिमाणमस्या इत्यष्टिका । क्वचिद्वा । वा अ इति च्छेदः । क्वचित् पूर्वस्याकारो वा भवति कापि परे । पुत्री एवेति ह्रस्वो वेति ह्रस्वे कृते पुत्रि । ६१

का। पक्षे पूर्वस्य ईपोऽकारः पुत्रकेति' सूतशब्दात्स्वार्थेकः सूता एव सूतिका सूतका। वृंदमस्यास्तीति शृंगवृन्दाभ्यामित्यारकः वृन्दारिका। वृंदारका देवता वाची वृ
न्दारक शब्दः पुल्लिंग एव अन्यत्र त्रिलिंगः तथा च त्रिषूत्तरे इत्युपक्रम्य वृन्दारकौ रूपमुख्याविति अमरः' आर्य्या एव आर्य्यका' पक्षे इत्वं आर्यिका' चटका एवे
ति चटकका' चटकिका॥ ःः॥ निष्क्रान्ता भस्त्राया इति निर्भस्त्रा पंचमीतत्पुरुषः' निर्भस्त्रा एवेति निर्भस्त्रका' निर्भस्त्रिका' एषा एव एषका' एषिका' अकः' अजा
एव अजका' अजिका' ज्ञा एव ज्ञका' ज्ञिका' द्वे एव द्वके' द्विके' आख्यानाम्यसर्वादेरित्यकः' निर्गता स्वात् यासा निःस्वा' निःस्वा एवेति निःस्वका' निःस्विका।
स्वार्थेकः' ह्रस्वो वा' कापि तरादौ प्रत्यये च परे स्त्रियां विहितस्य स्वरस्य ह्रस्वोऽत इश्च वा स्यात्। वाशब्दो व्यवस्थार्थस्तेन तरादौ विति लब्धं' गंगा एव गंगका' ह्रस्वाऽ

निर्भस्त्रका' निर्भस्त्रिका' एषका' एषिका। अजका' अजिका' ज्ञका' ज्ञिका' द्वके' द्विके' निस्स्वका' निस्स्विका। ह्रस्वो वा' कापि परे तरादौ च पूर्वस्य ह्रस्वो वा
।गङ्गाका' गङ्गका' गङ्गिका' नदिका' नदीका' श्रेयसितरा' श्रेयसीतरा' वाग्रहणाद्व्यवस्थया णात्व' गोका' नौका' त्रण ईप्' दण्डिनी। दन्तिनी" मघोनी'
शुनी' पौंस्नो' स्त्रैणी' चौरी' हन्त्री' कर्त्री' यस्य लोपः' इवर्णावर्णयोर्लोपो भवति न ह्रितस्य स्वरे यकारे ई पि च' औपगवी' ऐन्द्री' इष्यनोऽल्लोपः' राज्ञी' द्वि
दाम्नी।

भावे' गंगका' काप्यतर इतीत्वे गंगिका' ह्रस्वा नदीति नदीका' ह्रस्वार्थेकः। अतिशयेन श्रेयसीति श्रेयसितरा' श्रेयसीतरा' तरमेयस्त्विष्टाः प्रकर्षे इति तरप्रत्य
यः' स्त्रियां विहितस्येति किं' लक्ष्मीतरा' चमूतरा' त्रण ईप्' त्र च आ च अण् च एषां समाहारो त्रण्' तस्मात्त्रणः' अणिति प्रत्ययो नाम्नो विशेषणत्वा
त तदंतविधिः' नच प्रत्ययविधौ प्रतिषेधः शंक्यः' स्त्रीप्रत्ययेषु तदंतविधिस्वीकारात् नान्तात् ऋदन्तात् दण्डता च स्त्रियामीप्स्यात् दंडोऽस्ति यस्याः सा दण्डिनी मा
नोपधा ह्रस्विनाविति नः मघोनी शुनी' श्वादेरिति वस्योत्वं' कर्त्री' करोतेस्तृ बुणाविति तृप्रत्ययः' यस्य लोपः इश्च अश्च य्यं तस्य यस्य लोपः स्यात् न ह्रितस्य स्वरे यो
रीपि च' यथा गार्ग्यः काश्यपः मौनं' उपगोरपत्यं स्त्री' औपगवी' अपत्येऽणित्यण्' इन्द्रो देवताऽस्या इति ऐन्द्री दिक्' देवतेदमर्थे इत्यण् ॥ ६ ॥ ६ ॥

ईप्यनोऽल्लोपः अन्नंनस्योपधाऽकारस्यलोपः स्यादीपि राज्ञः स्त्रीराज्ञी हे दामनीयस्याः साह्हिदाम्नी॥ ॥ ष्ठितः' षवट्टचउष्ठआ चेतिष्ठुरः ष्ठुर इतो यस्य स ष्ठिन् तं न
स्मान् ष्ठितः हृत्ववरणेप्रत्ययान्तात्। स्त्रियामीप् स्यात् हृणोतेः षाको कण इति षाक प्रत्ययः घस्येत्यलोपः। वराकी कुरुचरी' कुरुषु चरतीति अधिकरणोपपदाच्च
रेष्टः इति टः' गोशब्दात् अस्त्यर्थे इति मतुः गावः सन्ति यस्याः सा गोमती' विदेर्वा वसुरिति वसुप्रत्ययः वसोर्व उ रित्युत्वं' विदुषी' पचेः शतृशानौ त्तिप् ते वदिति शतृप्रत्य
यः अपकर्नेरीत्यप्' पचन्ती' दिवेः शतृप्रत्यये दिवादेर्यं इति य प्रत्ययः दीव्यन्ती' अप्ययोरात्रित्यमिति नुम्' तुदेः शतृप्रत्यये तुदादेरइत्यप्रत्ययः तुदन्ती' वादीपोः
शतुरिति वा नुम मन्ननान्तेप मन्नंतान्नान्नईप् न भवति सीमा' दामा। राजवत्' अन्नंताहहुव्रीहेर्नंनान्नान्नाप्र ईप् सन भवति बहवोयज्वानोयस्यां सा बहुयज्वा न ग

ष्ठितः षकारटकारउकारऋकारानुबंधात्स्त्रियामी प्रत्ययोभवति। ष· वराकी· ट· कुरुचरी। ऊ रुद्धयसी। ऊरुदघ्नी' ऊरुमात्री। इत्वरी' उ· गोमती।
विदुषी। ऋ· पचन्ती। दीव्यन्ती। तुदती। तुदन्ती। प्राची। प्राञ्ची। प्रतीची। प्रत्यञ्ची। उदीची। उदञ्ची। तिरश्ची। तिर्यञ्ची। स्तनन्धयी' मन्ननान्तेप्। सीमा
। सीमानौ। दामा। दामानौ। अन्नन्ता द्दहुव्रीहेर्न्नो। बहुयज्वा। डाब्वा। सीमा। सीमे। सीमाः दामा। दामे। दामाः बहुयज्वा बहुयज्वे। उपधालोपिनो बहु
व्रीहेर्वेप्। बहुराज्ञी' बहुराजा। नदादेः स्त्रियामीप्। नदी। गौरी। सरसी। सखी। अशिश्वी। अनड्वाही। अनडुहीत्यादि॥ ३॥ ४॥ ५॥ ॥

री' डाबा' मन्ननान्नान्नाम्नोऽन्नेनाहहुव्रीहेश्चडाप् वा स्यात्। डित्वाट्टिलोपः' सीमा' दामा' बहुयज्वा' गंगावत्' सीमसीमे उभे स्त्रियामित्यमरः' नपुंसि दामेत्यमरः' उपधालोपि
नो बहुव्रीहेर्वेप्' अन्नन्ता द्दहुव्रीहेरुपधालोपिनो वेप् स्यात् बहवो राजानोयस्यां सा बहुराज्ञी। ईप्यन इत्यऽल्लोपः। ईवभावे डाप्। पक्षे डाबीपोरभावः। नदादेः न
द आदिर्यस्य नदादिस्तस्मान्नदादेर्गणात् स्त्रियामीप् स्यात्। अनुपसर्जनादेवायं गौणमुख्यन्यायात्। नदत्यऽव्यक्तं शब्दं करोतीति पचाद्यच्प्रत्ययः यस्येत्यलोपः। राम
नदी· गौणे तु नदमतिक्रान्ता स्त्री' अतिनदा' सुपर्णा शब्दादपत्येर्थे एयण प्रत्यय· आदिस्वरवृद्धिश्च सुपर्णायाः अपत्यं स्त्री। सौपर्णेयी। उरु· प्रमाणं ६॥ ७। ६२

यस्याः सा ऊरुद्वयसी' नद्री' यस्येत्यलोपः। प्रमाणे द्वयसज्दघ्नञ्मात्रच इति द्वयसज्दादिः अक्षैर्दीव्यतियेति ठक्प्रत्ययः। आक्षिकी। इण्नशजिसर्तिभ्यः क्वरप् इति क्वरप् एतिपरपुरुषं तच्छीला इत्वरी' असतीक्वरप् द्वयसज्डादेनोदाहरणं चतुष्टयं क्वचित्पुस्तके इत्यत्रव कुसुमचितं' क्वचित्तु नैव पाठस्तत्र न दोषः चुराशीलम स्या इति चौरी अजप्रत्ययातः स्त्रीपुंसाभ्यां नञ्स्नञौ स्त्रियां भवा' स्त्रैणी' पुंसि भवा' पौंस्नी' शक्तिः प्रहरणमस्या इति शाक्तीको शक्तियष्ट्योरीकण् इतीकण् गर्गस्यापत्यमिति गर्गादिभ्यो यञ् गार्ग्यः' स्त्र्यपत्ये तु न दादित्वाद्दूयस्येत्यलोपः हलस्तद्धितस्येति यलोपे 'गार्गी' पक्षे गार्ग्यायणीति' एयं नाडानार्ग्यशब्दात्स्त्रियां न दादित्वादाय नण् स्वार्थे' लोहितस्यापत्यं स्त्रीति लोहितादि गर्गाद्यन्तर्गणः एयं नाइ लौहित्यशब्दात्स्त्रियामायनण् कतस्यापत्यं स्त्रीति एयं नान् कात्यशब्दात्स्त्रियामायनण् उमा कात्यायनी गौरीत्यमरः' कुरोरपत्यं स्त्रीति एयं नान् कौरव्यशब्दात्स्त्रियामायनण् मंडूकस्यापत्यं स्त्रीति अण्णंतान्मांडूकशब्दात्स्त्रियामायानेण् असुरस्यापत्यं।

अनन्त्यवयोवाचिनोऽदन्तात् स्त्रियामीप्' कुमारी' किशोरी' वधूटी' चिरंटी' तरुणी तलुनी। अदन्तात् किम्। शिशुः। ऊधोन्तस्य बहुव्रीहेर्नङ् स्त्रियाम्। कुण्डोध्नी' द्यूध्नी' अत्यूध्नी' वयोवाचिनो हायनस्येप्॥

स्त्रीति अण्णंतादासुरशब्दात्स्त्रियामायनण्॥ ः॥ अनंत्यवयोवाचिनोऽदंतात्स्त्रियामीप् कालकृतशरीरावस्था वयः तानि च वयांसि चत्वारि त्रीणि च संति' यथा आद्ये वयसि नाधीतं द्वितीये नार्जितं धनं' तृतीयेन तपस्तप्तं चतुर्थे किं करिष्यतीति चत्वारि' पिता रक्षति कौमारे भर्ता रक्षति यौवने' पुत्रस्तु स्थाविरीभावेन स्त्री स्वातंत्र्यमर्हति १ त्रीणि उपचयापचयलक्षणे द्वे वयसी इत्यन्ये' वधूटचिरंटतलुनशब्दा यौवनवाचिनः कुमारस्तु प्रथमवयोवाची अल्पवयाः अभ्या' किशोरी ऊधोंतस्य बहुव्रीहेर्नङ्ऽ स्त्रियां ऊधोंतस्य बहुव्रीहेरीप नङादेशश्च स्त्रियां अकार उच्चारणार्थः बहुव्रीहिग्रहणेनैव तदंतलाभात् अंतग्रहणं स्पष्टप्रतिपत्त्यर्थं' त्वणई बिति प्राप्ते सेपो निषेधः अनेन प्रतिषिध्यते। यथा डाबुभाभ्यामिति वैकल्पिको डाप्। उपधालोपिनो बहुव्रीहेर्वेति वैकल्पिक ईप् अन्नंताद्बहुव्रीहेर्नेति निषेधश्च' कुंडमिवोधो यस्याः सा ईप्यनोऽल्लोप इत्यल्लोपे' कुंडोध्नी' द्वे ऊधसी यस्याः सा' द्व्यूध्नी' अतिशयि

स्त्रियामिति किं कुण्डोध्नो धेनुकं बहुव्रीहेरिति किं प्राप्तऊधः प्राप्तोध्नाः द्वितीयान्तस्तत्पुरुषः वयोवाचिनो हायनस्य पूसंख्यादेर्बहुव्रीहेर्वयोवाचिहायनान्तादीप्
स्यात् आपि प्राप्ते वचनं संख्यादेर्बहुव्रीहेर्दामान्ताच्च डाबीषोर्विकल्पेन प्राप्तयोर्वचनं द्विदाम्नी॥ ॥त्रिचतुर्भ्यां हायनस्य णत्वं आभ्यां परस्य वयोवाचकस्य हायन
स्य णत्वं वा च्यं त्रयो हायना यस्याः सा त्रिहायणी चत्वारो हायना यस्याः सा चतुर्हायणी बाला हायनोऽब्दः शरत्समा इत्यमरः॥ इन्द्रादेरानीप् इन्द्र आदिर्यस्य स इन्द्रादिस्त
स्मादिन्द्रादेर्गणात् स्त्रियामानीप् स्यात् पुंयोगे इत्यपकृष्यते। पितृकरणसामर्थ्याद्वुसेप इत्यत्रानीपोपि ग्रहणं भवति ननु हृस्वादिरेवाऽनीबस्तु किमनेन दीर्घोच्चा
रणेन अत्राहुः ब्रह्माणी इति सिद्ध्यर्थे दीर्घग्रहणम् ब्रह्मन् शब्दादीनीपि कृते नोवेति टिलोपे ब्रह्माणीति अन्ये त्वाहुः ब्रह्माणमानयति जीवयत्यऽनप्राणने।
अस्मान् हस्मस्मात् कार्य्येऽणिस्य णप्रत्यये त्र णइ विनीपि च कृते ब्रह्माणी सिद्धमेव। माधवस्तु इन्द्रं करोति इन्द्रयति इन्द्रेति नाम्नो त्रिडिन्कर णे इति ण्यन्तात् क्विपि इ

त्रिचतुर्भ्यां हायनस्य णत्वम् त्रिहायणी चतुर्हायणी इन्द्रादेरानीप् स्त्रियाम् पुंयोगे इन्द्राणी वरुणानी भवानी शर्वाणी रुद्राणी मृडानी आचा
र्य्योदणत्वम्। आचार्य्यानी हिमारण्ययोर्महत्त्वे महद्धिमं हिमानी महदरण्यमरण्यानी यवाद्दोषे दुष्टो यवो यवानी यवनाल्लिप्याम् यवनानी
लिपिः

न्द्रतस्य इन्द्रः स्त्री इन्द्राणीति दीर्घपाठ इदतित्तन्नं किं बंतस्य क्रियाशब्दत्वेन पुंशब्दत्वाभावात् किंच इन्द्रमिच्छतीति इन्द्रीयतिनाम्नो यइ चास्से
तिय प्रत्ययान्तात् क्विपि कृते इन्द्रीः इन्द्रियः स्त्री इन्द्राणी त्यति व्याप्तेश्च वस्तुतस्तु हृस्वादिपाठेपि हानिर्न इन्द्रस्य स्त्री इन्द्राणी वरुणस्य स्त्री वरुणानी भव शर्व मृड रु
द्राः पर्यायशब्दाः आचार्यादणत्वं आचार्यशब्दात्परस्यानीपो नस्य णत्वं न स्यात् आचार्यस्य स्त्री आचार्य्यानी पुंयोगाभावे आचार्य्या स्वयं व्याख्यात्री हिमारण्ययोर्मह
त्वे महत्त्वयोगे आभ्यामानीप् स्त्रीत्वं विधीयते महद्धिमं हिमानी हिमानी हिमसंहतिरित्यमरः॥ महदरण्यमरण्यानी महारण्यमरण्यानीत्यमरः यवाद्दोषेय
वाद्दानीप् स्त्रीत्वं च दोषे यो दुष्टो यवो यवानी यवत्वजात्यभावेन टाकारानुकृति दोषः यवाकारानुकृतिमज्ज्ञात्यन्तरमेवानेनाभिधीयते ६॥ ६॥ ॥६॥

यवनाल्लिप्यां' यवनशब्दादानीप् लिप्यर्थे' सा च स्त्रीलिंग एव' देवेनेदमर्थे इत्यणो बाधक आनीप् विधीयते' यवनानां लिपिर्यवनानी' लिखिताक्षरविन्यासो लिपिः
मातुलोपाध्याययोर्वा' आभ्यामानीप् वा स्यात् पक्षे पुंयोगे चेतीप्' मातुर्भ्राता मातुलस्तस्य स्त्री मातुलानी मातुली' उपाध्यायस्य स्त्री उपाध्यायानी' उपा-
ध्यायी अर्यक्षत्रियाभ्यां वा स्वार्थे' आभ्यां स्वार्थे आनीप् वा स्यात्' पक्षे आप्' अर्याणी' अर्या' स्वामिनी वैश्या वेत्यर्थः' अर्यः स्वामिवैश्ययोरित्यर्थ इत्येपि निपातनात् क्ष-
त्रियाणी क्षत्रिया' क्षत्रियजातीया स्त्रीत्यर्थः' पुंयोगे तु अर्यी क्षत्रियी' या तु स्वयमेवाध्यापिका तत्र वा ङीप् वाच्यः' पक्षे आप्' उपाध्यायी' उपाध्याया' उपेत्यास्या अधीय
ते इत्यपादाने स्त्रियां घञ्' तथा च अर्याणी स्वयमर्या स्यात् क्षत्रिया क्षत्रियाण्यपि उपाध्यायाप्युपाध्यायी स्यादाचार्यापि च स्वतः' आचार्यानी तु पुंयोगे स्यादर्यी क्ष-
त्रियी तथा उपाध्यायान्युपाध्यायीत्यमरः' पुंयोगे च इह पुमिति षष्ठ्यंतं सांकेतिकं पृथक् पदं तच्चावर्त्यते द्विरुच्चारणमावृत्तिः पुंसः पुंस इति योगे इति भावे नि

मातुलोपाध्याययोरानुक्' मातुलानी' मातुली' उपाध्यायानी' उपाध्यायी' अर्यक्षत्रियोपाध्यायेभ्यो वा स्वार्थे' अर्याणी' अर्या' क्षत्रियाणी' क्ष-
त्रिया' उपाध्यायानी' उपाध्याया' पुंयोगे च' अदन्तात् स्त्रियामीप्' शूद्री' गणकी' पालकान्तान्न' गोपालिका' अश्वपालिका' सूर्याद्देवतायामाप्' सू-
((र्यस्य स्त्री देवता सूर्या अन्या सूरी

मिजे वा सप्तमी अधिकारान्नामेति लभ्यते यत् पुंसो नाम पुंवाचकशब्दोऽदन्तः पुंसो योगे स्त्रियां वर्तते तदीप् स्यात् योगः संबंधः
स चेह दाम्पत्यरूप एवेति नाग्रहः किंतु जन्यजनकभावोपि गृह्यते तेन केकयस्य क्षत्रियस्य पुत्री कैकयीत्यादि सिद्धं तथा च भट्टिः प्राप्ते कैकयीतो भरतस्ततो भू-
दिति कन्यादित्वात् केकयदुहिता कैकेयीत्यपि तथा प्रागुक्तः कैकेयिका मा फलितास्त्वैति कालिदासः पुंयोगे किं देवता' अयं हि संज्ञाशब्दः स्वभावात्
स्त्रियां वर्तते न तु पुंवाचकशब्दयोगे' अतः किं भानोः स्त्री भानुः। पालकान्तान्न पुंयोगे ईप् न स्यात्' गोपालकस्य स्त्री गोपालिका' सूर्याद्देवतायामाप् सूर्यस्य
स्त्रान्तु पुंयोगे आप् स्यात् देवतार्थे ईपोपवादः देवतायां किं सूर्यस्य स्त्री मानुषी सूरी कुंतीत्यर्थः सूर्यागस्त्ययोरिति यलोपः॥ ६॥ श्री ६ ॥ ६ ॥ ६॥

जातेरयोपधात् जातिवाचकाद्य उपधा यस्य स योपधः न योपधः अयोपधस्तस्माद्‌योपधात् अदन्तात् स्त्रियामीप् स्यात् जातिलक्षणमाह' आकृतिग्रहणा
जातिर्लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह १ आकृतिग्रहणं यस्याः सा आकृतिग्रहणा जातिरुच्यते आकृतिः संस्थानं गृह्यतेऽ
नेनेति ग्रहणं करणे ल्युट् अवयवसंनिवेशविशेषव्यंग्येत्यर्थः' यथा नटी तटादेः सर्वलिंगत्वेप्याकृतिग्रहणत्वाज्जातित्वं भवति। अनेन लक्षणेन तु गोत्रत्वादि जाति।
सु न लक्षितानां ब्राह्मणक्षत्रियादीनां ह्यवयवसंस्थानस्य सदृशत्वाद् ब्राह्मणादिष्वव्याप्तिवारणाय लक्षणान्तरमाह च कारो भिन्नक्रमार्थः या सकृदाख्या
तनिर्ग्राह्या सा जातिरुच्यते सकृदेकवारमाख्याता उपदिष्टा सती निर्ग्राह्या निश्चेतुं शक्या सा जातिरित्यर्थः। कीदृशी सा लिंगानां न सर्वभाक् लिंगानामिति कर्म
णि षष्ठी सर्वाणि भजतीति सर्वभाक् या सर्वाणि लिंगानि न भजतीत्यर्थः॥ सर्वशब्दस्य लिंगापेक्षत्वेपि गमकत्वात् भजो विण् प्रत्ययः समासश्च असर्वलिंगत्वे सत्ये।

जातेरयोपधात्। जातिवाचिनोऽयकारोपधादकारान्तात् स्त्रियामीप्प्रत्ययो भवति' महिषी' हंसी' योपधात्तु' क्षत्रिया' वैश्या' क्वचिन्न' बलाका

कस्यां व्यक्तौ कथनाद्व्यक्त्यंतरे कथनं विनापि सुग्रहा जातिरिति लक्षणान्तरं' यथा वृषली' एकस्यां हि व्यक्तौ वृषलत्वे कथिते तद्ऽपत्यतत्सहोदरादौ कथनं विनापि
वृषलत्वस्य सुग्रहः' सकृदित्यादि किं' देवदत्ता' यस्यां हि व्यक्तौ देवदत्तत्वं कथ्यते। तत्समकालमन्या देवदत्तव्यक्तिरप्रसिद्धेति न देवदत्तत्वं जातिः' उक्तलक्षणद्वय
रहितत्वात्' तृतीयं लक्षणमाह' चरणैः सह गोत्रं जातिरुच्यते' चरणशब्देन शाखाध्येतार उच्यन्ते गोत्रशब्देनापत्यमुच्यते अपत्यप्रत्ययान्तः शाखाध्येतृवाचकश्च श।
ब्दो जातिवाचक इत्यर्थः' गोत्रस्याकृतिग्रहणत्वासर्वलिंगत्वाच्च पृथगुपादानं चरणशब्दस्याध्ययनक्रियासंबंधेन प्रवृत्तत्वात् क्रियाशब्दा एव जातिशब्दा इ
ति चरणग्रहणं कृतं। आकृतिग्रहणा यथा' महिषी' हंसी। असर्वलिंगा यथा' ब्राह्मणी' वृषली' गोत्रलक्षणा यथा। औपगवी' पैतृष्वस्रेयी अणन्तमीपं परत्वाद्‌यं बाध
ते इति भावः चरणलक्षणा यथा' कठेन प्रोक्तमधीयाना कठी' कारकादित्यण्प्रत्ययस्य लुक् च' अत इति किं' तित्तिरिः' गोः क्वचिन्न' अयः शब्दो जातिवाची अयोपधः स्त्रियां नि

यतश्चनतोनेपृभवतीत्यर्थः बलाकाविसकंटिकेत्यमरः॥ ❋ ॥ गवयहयमुकयमनुष्यमत्स्यानामनिषेधः योपधेभ्योप्येभ्यईपृस्यात् हसान्तद्धितयस्येपि लोपःहसात्परस्यतद्धितयकारस्यलोपःस्यादीपियस्येत्यलोपःमनुष्यईपियलोपःमत्स्यस्ययलोपः॥मत्स्यशब्दस्ययकारस्यलोपःस्यादीपियस्येत्यलोपःमत्सी सूर्य्यागस्त्ययोरीयेईपिच अनयोर्यकारस्यलोपःस्यात् ईयप्रत्ययेईपृप्रत्ययेचसूरीयःसूरीअगस्तीयःअगस्तीतिष्यपुष्ययोर्नक्षत्राणियलोपः अनयोर्यकार स्यलोपःस्यात् नक्षत्रसंबंधीयोऽणस्तनक्षत्राण् नक्षत्रेणयुक्तःकालइत्यण् नक्षत्रेभवइत्यणचतस्मिन्तिष्येणयुक्तःकालस्तैषःपुष्येणयुक्तःपौषःतथातिष्ये भवस्तैषःपुष्येभवःपौषःस्त्रियांत्वणईबितीप् यस्येत्यलोपः तैषीपौषीपाणिनिसूत्रंजानपदकुंडगोणस्थलभाजनागकालनीलकुशकामुककब

गवयहयमुकयमनुष्यमत्स्यानामनिषेधः'गवयीहयीमुकयी'हसान्तद्धितयस्येपिलोपः'मनुषीइपिमत्स्यस्ययलोपःमत्सीसूर्य्यागस्त्य। योरीयेईपिच'सूरी'अगस्ती'तिष्यपुष्ययोर्नक्षत्राणियलोपः'तैषी'पौषी'जानपदादिभ्योऽर्थविशेषेईप्'जानपदीवृत्तिश्चेत् अन्याजानपदा'कु ष ण्डी'अमत्रश्चेत्कुण्डान्या'गोणी आवपनेगोणाऽन्या'स्थली अकृत्रिमायाम्'स्थलान्या'भाजीश्राणाचेत् भाजाऽन्या'नागीस्थूलाचेत् नागान्या। (कालीवर्णश्चेत्

एतदत्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु'एभ्यएकादशभ्यएष्वर्थेष्वीपृस्यात् जनपदेदे शेभवाजानपदीभवार्थेऽणवर्तते अनयेतिवृत्तिर्जीविकाचेद्यदि अन्याप्येवंजानपदीवृत्त्यभावे आद्युदात्तइतिस्वरेभेदः अस्त्रीकमंडलुःकुंडीत्यमरःअम त्रंपात्रं (कुंडीस्त्रीविषयत्वोभावादप्राप्तईपृविधीयते अन्याकुंडाकुडिदाहे अस्माद्गुरोर्हसादित्यङ्प्रत्ययेरूपंयस्तुअमृतेजारजःकुंडइतिमनुष्यजा तिकुंडशब्दस्ततोजातिलक्षणईबभवत्येवंऊ॑प्यतेनिक्षिप्यतेधान्यंयस्मिन् तदावपनंगोणी'आङ्पूर्वाद्वपेरधिकरणेल्युट् अन्यागोणेतियथेच्छंनाम।अकृ त्रिमाऽपुरुषेणसंस्कृताभूमिःस्थली'पुरुषकृतातुस्थला'श्राणापक्काचेद्भाजी'अपक्काभाजा'स्थूलापुष्टाचेत्'नागी'अन्यानागा'वर्णयुक्ताचेत्काली अन्या

पू॰ सि॰ चै॰ टी॰ सु॰ ६५

कालीअनाच्छादनं चेन्नीली औषधिविशेषः प्राणिनि तु नि ली गौः आच्छादने तु नीला शाटी। अय सो लोहस्य विकार अयो विकारः फाल इति प्रसिद्धः। नत्र कुशी अन्या कुशा वेदे औदुम्बरं शंकुं कुशा इति व्यवहरन्ति वल्गाऽपि यदुक्तं वल्गा वस्पणी कुशेति हेमकोशे मैथुने च्छायां सुरतवां च्छायां कामुकी वनादिकं कामयितुं शीलं यस्याः सा कामुका षा को कामइत्युकण् केशविन्यासे केशरचनायां कवरी अन्या कवरा चित्रेत्यर्थः॥ शोणाद्वा॥ शोणशब्दाद्वा ङीप्स्यात् शोणः कोकनदच्छवि रित्यमरः॥ बहुव्रीहेर्जातिपूर्वपदात् क्तान्तात् जातिवाचिपूर्वदात् क्तान्ताद्दन्ताद्बहुव्रीहेः स्त्रियामीप् भिन्नावूरू यस्याः इति बहुव्रीहौ विशेषण सप्तम्यन्त क्तान्तानामिति पूर्वनिपाते प्राप्ते क्वचिन्नेति परनिपातनाभावः जातांना न्ना जातशब्दान्ताद्धहेर्जातिवाचिपूर्वपदात्पूर्वं दंता जातायस्याः सा दंतजाता अस्वांग पूर्वपदाद्वा अस्वांग जातिवा

कालान्यानीली औषधि प्राणिनोः नीलान्या सन्ज्ञायां वा नीली नीला कुशी अयोविकारे कुशान्या कामुकी मैथुने च्छायाम् कामुकान्या कवरी केशविन्यासे कवराऽन्या शोणाद्वा शोणी शोणा बहुव्रीहेर्जातिपूर्वपदात् क्तान्तात् ऊरुभिन्नी जातान्तान्नदन्त जाता अस्वाङ्गपूर्वपदाद्वा सुरापीती सुरापीता पाणिगृहीतीभार्य्यायाम् अन्या पाणिगृहीता क्रीतान्तात् करणादेः वस्त्रक्रीती क्वचिन्न धनक्रीता क्तान्तादल्पत्वे अभ्रलिप्ती द्योः

चिपूर्वपदात् क्तान्ताददन्ताद्बहुव्रीहेः स्त्रियां वेप्स्यात् पीता सुरा यया सा सुरापीती सुरापीता क्वचिन्नेति क्तान्तस्य परनिपाताभावः बहुव्रीहेर्जातिपूर्वपदादित्यनेन नित्ये प्राप्ते विकल्पार्थमेनत् पाणिगृहीतीभार्यायां यस्याः पाणिरग्निसाक्षिकं गृह्यते तस्यां वाच्यायां पाणिगृहीतशब्दाद्दीप्स्यात् अन्येति कौतुकादिना पाणिर्गृहीतो यस्याः सा पाणिगृहीता क्रीतान्तात् करणादेः आदिशब्दो ह्यवयववचनः करणमादिरवयवो यस्य तस्मात् करणादेरेकपदादित्यर्थः। क्रीतान्तादन्तात् करणादेः स्त्रियामीप्स्यात्। वस्त्रेण क्रीतेति वस्त्रक्रीती करणादेरिति किं गवा क्रीता अश्वेन क्रीता क्तादल्पत्वे करणादेः क्तान्तादन्तान्त्स्त्रियामीप्स्यादल्पत्वे द्योत्ये अल्पेरभ्रैर्लि एम

६५

अल्पत्वे किं चन्दनलिप्ता इङ्गनाः स्वांगाद्वा स्वांगवाचकाददकारांतादसंयोगोपधाज्ञौणाद्वास्त्रियामीप् स्यात् यथा सुष्ठु मुखं यस्याः सा सुमुखी सुष्ठु केशा यस्याः सा सु
केशी पक्षे आवंतद्व्याप् असंयोगोपधात्किं सुष्ठु गुल्फौ यस्याः सा सुगुल्फा उपसर्जनात्किम् शोभना शिखेति सुशिखा शीडो ह्रस्वश्चेति खप्रत्ययः आवंतद्व्या
प् किंच यद्यत्रस्वमंगं स्वांगं गत्स्येनतदा सुमुखा शालेत्यत्रापीप् स्यात् मुखस्य शालांगत्वात् सुकेशी रथ्येत्यत्र चेप् न स्यात् केशानां रथ्यांगत्वाभावात् अतो अव्याप्त्य
तिव्याप्तिपरिहारार्थमाह तत्स्वांगं त्रिधा ॥ तथा च ॥ अद्रवं मूर्तिमत्स्वांगं प्राणिस्थमविकारजं। अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथायुतं १ तत्स्वांगमुच्यते। कीदृशं अद्र
वं द्रवनीति द्रवं न द्रवमद्रवं सुष्ठु स्वेदो यस्याः सा सुस्वेदा द्रवत्वादत्र स्वांगं न पुनः की० मूर्तिमत् स्पर्शवद्द्रव्यपरिमाणं मूर्तिः मूर्तिर्यस्यास्तित्तन्मूर्तिमत् सुष्ठु ज्ञानं य
स्याः सा सुज्ञाना अमूर्तत्वात्। अत्र स्वांगं न पुनः की० प्राणिस्थं मुखनासिकांतः संचारी वायुः प्राणः प्राणो यस्यास्तीति प्राणी प्राणिनि तिष्ठतीति तत्प्राणिस्थं सुष्ठु मु

अस्वांगे किम्। चन्दनलिप्तान्या मूर्तिः। स्वाङ्गाद्वा स्वाङ्गवाचिनो ऽदन्तादसंयोगोपधादुपसर्ज्जनाद्वास्त्रियामीप्। सुमुखी सुमुखा सुकेशी सु
केशा। संयोगोपधात्तु सुगुल्फा नासिकोदरौष्ठजंघादन्तकर्णशृङ्गाद्वा तुङ्गनासिकी तुङ्गनासिका मन्दोदरी मन्दोदरा बिम्बोष्ठी बिम्बोष्ठा एवम् सुजंघी सुदन्ती। सुकर्णी सुशृङ्गी

खं यस्याः सा सुमुखा शाला अप्राणिस्थत्वादत्र स्वांगं न पुनः की० अविकारजं वातपित्तकफानां विकृतिर्विकारः।
विकाराज्जातं विकारजं न विकारजमविकारजं सुष्ठु शोफो यस्याः सा सुशोफा शोफस्तु श्वयथुः शोथः पुमानित्यमरः। विकारजत्वादत्र स्वांगं न यदि प्राणिस्थं स्वांगं त
र्हि रथ्यादिगतानां केशादीनां स्वांगत्वं न स्यात् सुकेशी रथ्या इति न सिद्ध्यत्यतो द्वितीयलक्षणमाह च पुनः अतत्स्थं तत्र दृष्टं स्वांगमुच्यते। कदाचित्तत्र प्राणि
नि दृष्टं न प्रतिनस्मिन् प्राणिनि तिष्ठतीति तत्स्थं न तत्स्थं अतत्स्थमप्राणिस्थमित्यर्थः। अप्राणिस्थस्यापि केशादेः पूर्वं प्राणिनि दृष्टत्वात्स्वांगमेव भवत्येवेत्यर्थः एवम
पि प्रतिमादिगतस्तनमुखादीनां स्वांगत्वं न प्राप्नोति अप्राणिन्यदृष्टत्वात् सुस्तनी प्रतिमेति न सिद्ध्यत्यतस्तृतीयं लक्षणमाह अतत्स्थमित्यनुषज्यते एतादृशं त

कीदृशंचेद्यादिनेन प्राण्यंगेन मुखादिना सहनतया युतं प्राणिवद्युतं सहितं यथा प्राणियुतं तद्वत्प्राणिनियुतमपि भवतीत्यर्थः। सुष्ठु स्तनौ यस्याः सा सुस्तनी प्र
तिमा प्राणिसदृशे प्रतिमादौ प्राणि नि द्रवेति प्राणिवत्। स्तनादेः स्थितत्वात् स्वाङ्गमस्ति। नासिकोदरौष्ठजंघादंतकर्णशृंगाच्च। एभ्यो वेप् स्यात्। नासिकोदरयो
र्नेक्रोडादिबहुस्वरादिति ङीषो प्राप्तौ दीनां पंचानां तु संयोगोपधा च्च निषेधे प्राप्ते वचनं तुंगनासिका यस्याः सा तुंगनासिकी। मंदउदरो यस्याः सा मंदोदरी। बिंबव
दोष्ठौ यस्याः सा बिम्बोष्ठी। स्वंगी। सुष्ठु गात्रं यस्याः सा सुगात्री। सुष्ठु कंठो यस्याः सा सुकंठी। सुष्ठु पुच्छं यस्याः सा सुपुच्छी। पक्षे आप्। कबरमणिविषशरेभ्यः परात् पु
च्छान्नित्यं ईप् स्यात्। कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छी। मयूरी। मणिः पुच्छे यस्याः सा मणिपुच्छी। शरः पुच्छे यस्याः सा शरपुच्छी। विषं पुच्छे यस्याः

स्वाङ्ग गात्रकण्ठ पुच्छाच्च। स्वङ्गी। सुगात्री। सुकण्ठी। सुपुच्छी। पक्षे स्वङ्गे। त्यादिं कबरमणिविषशरेभ्यः परात्पुच्छान्नित्यम्। कबरपु
च्छी। मणिपुच्छी। विषपुच्छी। शरपुच्छी। उपमानात्पक्षपुच्छाभ्याम्। श्येनपक्षी। श्येनपुच्छी। नक्रोडादिबहुस्वरात्। कल्याणक्रोडां। सु
जघना। सहनञ्विद्यमानपूर्वान्न। सकेशा। अकेशा। विद्यमाननासिका॥

॥ सा विषपुच्छी। उपमानात्पक्षपुच्छाभ्यां। उपमानात्परा
भ्यां पक्षपुच्छाभ्यां नित्यमीप्। श्येनवत्पक्षौ यस्याः सा श्येनपक्षी। श्येनइव पुच्छं यस्याः सा श्येनपुच्छी। नक्रोडादिबहुस्वरात्। क्रोडादेर्बहुस्वराच्च स्वा
गान्नेप् स्यात्। अश्वानामुरः क्रोडा। स्त्रीलिंगोयमिति हरदत्तः। तत्रान्यार्थे इति हृस्वत्वे अदंतत्वादीपः प्राप्तिरनेन बाध्यते। ननाक्रोडोभुजांतरमित्यर्थः। कल्या
णं क्रोडायां यस्याः सा कल्याणक्रोडा। सुष्ठु जघनं यस्याः सा सुजघना। सहनञ्विद्यमानपूर्वान्न। सहेत्यादित्रिकपूर्वात्स्वांगान्नेप् स्यात्। सह केशैः वर्तते या सा स
केशा। सहादेरिति सहस्य सः। अविद्यमानाः केशा यस्याः सा अकेशा। नञ्‌ इति नञोऽकारादेशः। विद्यमाना नासिका यस्याः सा विद्यमाननासिका। स्वांगादित्यस्य नासिकोद राम ६६

नखमुखात् संज्ञायां आभ्यामीप् स्यात् संज्ञार्थे शूर्पणखा रावणस्वसुर्नाम। यदा शूर्पवन्नखानियस्याः सा इति गोत्रमात्रं विवक्ष्यते तेन तु संज्ञा न तदा ईप् स्यादे
वनन्ताभावश्च गौरमुखेति कस्याश्चित् सञ्ज्ञा असंज्ञायां तु ताम्रवन्मुखं यस्याः सा ताम्रमुखी वोर्गुणात् वा ऊ रिति छेदः गुणशब्दोत्र गुणवत्परो न तु गुणमात्रवा
चिपरः गुणमात्रवाचकानां स्त्रीलिंगाऽभावात् गुणेषु शुक्लादयः पुंसि स्युक्तत्वात्। उदन्तादिति किं शुचिः गुणात्किं आखुः महाभाष्ये गुणलक्षणं सत्वे निविशतेऽपैति पृथक् जा
तिषु दृश्यते आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृतिर्गुणः १ स गुण उच्यते यः सत्वे द्रव्ये निविशते द्रव्यमुपैतीत्यर्थः ननु द्रव्ये द्रव्यत्वं तत्राऽतिव्याप्तिरत आह यो पृथ
क् द्रव्यादपैति अपगच्छति द्रव्यं जहातीत्यर्थः यथा पीतता यां जातायां नीलता फलादपैति। नैवं द्रव्यत्वं द्रव्यादपैति ननु गोत्वं गोत्वतद् ऋष्वादेश्चापैतीति तत्रातिव्या
प्तिरत आह यः पृथक् जातिषु दृश्यते। द्रव्यान्तरेष्ववऽलोक्यते। यथा। अम्रे दृष्टा नीलता तृणादिष्वपि दृश्यते तेन न तथा गोत्वं पृथक् जातिषु दृश्यते एवं न हि द्र

नखमुखात्सञ्ज्ञायाम्। शूर्पणखा। गौरमुखा संज्ञायां किम्। ताम्रमुखी कन्या। वोर्गुणात्। उदन्ताद्गुणवाचिनो वा स्त्रियामीप्। पट्वी पटुः बह्वी
। बहुः। खरुसंयोगोपधान्न। खरुः। पाण्डुः। कृदिकारादक्तिः पर्यायात्। रात्री। रात्रिः। शकटी शकटिः अक्तिः पर्यायात्किम्। भूतिः। अजननिः॥ ॥ ॥

व्ये क्रियावर्त्तने सा द्रव्यादपैति पृथक् जातिषु दृश्यते चेति तत्रातिव्याप्तिरत आह य आधेय उत्पाद्यः च पुनः योक्रियाजोऽनुत्पाद्य इत्यर्थः उत्पाद्यो यथा घटादेः पाक
जो रूपादिः अनुत्पाद्यो यथा आकाशादेर्महत्त्वादिः क्रियातु सर्वाप्युत्पाद्यैव नानुत्पाद्या क्रियायाद्दे विध्याऽभावाद्गुणत्वाभावः एवं न हि द्रव्यस्य गुणत्वं प्राप्नोतीति।
या हि अवयवि द्रव्यं ह्यवयवद्रव्येषु निविशते संयोगविनाशेऽवयवद्रव्यादपैति पृथग्जातिषु हस्तपादादिषु दृश्यते द्रव्यमुत्पाद्याऽनुत्पाद्यभेदेन हि विधं तत्र निर
वयवस्यात्मपरमाण्वादेरनुत्पाद्यत्वं नित्यत्वात् अवयवि द्रव्यस्य घटादेस्तूत्पाद्यत्वमस्त्यनित्यत्वादत आह योऽसत्वप्रकृतिरद्रव्यस्वभावो द्रव्याद्भिन्न इत्यर्थः १ खरु
रुसंयोगोपधान्न। खरुशब्दात् संयोगोपधगुणवाचिनः शब्दाच्च नेप् स्यात् खरुः पतिंवरा कन्या पाणिग्रहणोत्कंठावतीत्यर्थः कृदिकारादक्तिः पर्यायात् त्यादिभिन्नात्कृत्

संबंधिन इकारान्त। स्त्रियांवेपुंस्यान् आजीसंग्रामः धूलीरजः अत्यर्थानकिम्'भूतिः। क्तिरितिस्त्रियांभावेऽर्थेक्तिः' आक्रोशेनञ्यनिरितिजनेरनिप्रत्ययः। नजायनेइत्य
ऽजननिः॥६॥ पद्धत्यादिभ्योवा'स्त्रियामेभ्योवेपुंस्यान् पद्भ्यांहन्यनेइतिपद्धति मार्गः' क्तिप्रत्ययांतत्वादप्राप्तेविध्यर्थम् पद्धतिशब्दोगणेपठ्यते'पद्धतिय
ष्टिविकटविशालकल्याणपुराणचंडकृपाणअहन्नित्यादयः'ऐचमन्वादेः। मनुएदिरस्यसमन्वादिस्तस्मान्मन्वादेः आदिशब्दः प्रकारे स्त्रियांम न्वादेरी
पुंस्यान् पुंयोगेएषामंतस्यैकारादेशश्च'पूतः क्रतुर्यस्ययेनवापूतक्रतुः। पूतक्रतोःस्त्रीपूतक्रतायी'पुंयोगेकिंपूतक्रतुःस्त्री'ययानुक्रतवःपूताःपूतक्रतु
रेवसेत्यर्थः' अग्नेःस्त्रीअग्नायीरस्वाहाचहुतभुक्प्रियेत्यमरः'वर्षतिकामानितिवृषःनाम्युपधात्कइतिकः स्त्राकंपयतिपापानीत्याकपिः अत्रानर्भावित
णिप्रत्ययार्थोस्तिइखखिइतिइप्रत्ययः॥इदितइतिनतुम्आगमजमनित्यमित्युक्तत्वान् वृषश्चासोआकपिश्चवृषाकपिर्वृषाकपेःस्त्रीवृषाकपायीहरवि

पद्धत्यादिभ्योवा॰ पद्धती। पद्धतिः। ऐचमन्वादेः'मनुपूतक्रतुवृषाकप्यग्निकुसितकुसिदानामेआदेशईप्च स्त्रियांपुंयोगे'पूतक्रतायी'कु
सितायी'कुसिदायी'वृषाकपायी'अग्नायी'मनोरैऔवा'मनावी'मनायी'मनुः'पत्न्यादयोनिपात्याः'पत्नी'सपत्नी'एकपत्नी। वीरपत्नी॥ ६ ॥

श्रू वृषाकपीत्यमरः'वृषाकपायीश्रीगौर्योरितिचामरः मनोरैऔवामनुशब्दस्यैकारादेशः ऐकारादेशश्चवाईपि'मनोःस्त्री'मनावी'मनायी'ईबभावः'पत्न्याद
योनिपात्याः'पत्नीआदिर्येषांतेपत्न्यादयः। आदिशब्दः प्रकारेपतिशब्दांतस्यनांतत्वंनिपात्यते'न्रणईविनीपू पत्नी'समानःपतिर्यस्याःसासपत्नी'सहादेरि
तिसभावः एकःपतिर्यस्याःसाएकपत्नी'वीरःपतिर्यस्याःसावीरपत्नी' सखिशब्दशिशुशब्दाभ्यामीपूनिपात्यते'सखीन विद्यतेशिशुर्यस्याःसाअशिश्वी'अ
शिश्वीतु शिशुंविनेत्यमरः'अनडुहः स्त्रियामीपूनिपात्यतेअनडुहश्चेतिवाम् अनड्वाही'अनडुही प्रागादिशब्दादीक् निपात्यते॥ नोप्राची'पूर्वादिक्'नोलोपइ
तिलोपः पूजायांतु'प्राची'पूजार्थाञ्चतेर्नेतिनलोपाभावः। गतोअचेरदीर्घश्चेत्यकारलोप॥ एम ६७

पूर्वदीर्घौ प्रतीची पश्चिमा दिक् पूजायां प्रत्यंची' उदीची उत्तरा दिक् तिरश्चादयइत्युदीचा देशः' अवाची दक्षिणा दिक् प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः। उत्तरादिगुदीचीस्यादित्यमरः॥ॐ॥ कचि द्रा। क्वचिद्वानिपातनंभवति' दृढः पतिर्यस्याः सा दृढपत्नी दृढपतिः' वृषलः शूद्रः पतिर्यस्याः सा वृषलपत्नी' वृषलपतिः। एतच्छब्दात् स्त्रियामीबुत्तकारस्य नकारादेशश्चवा निपात्यते। एनी एता' कर्बुरे त्यर्थः। चित्रंकिर्मीरकल्माषशबलैताश्च कर्बुरे इत्यमरः' हरिणी हरिद्वर्णेत्यर्थः। रोहिणी रोहिता' रक्तेत्यर्थः' श्येनी' श्येता' श्वेतेत्यर्थः' असितपलितयोरीप्तकारस्य क्नादेशश्चवा निपात्यते' असिता असिक्नी कृष्णेत्यर्थः' पलिता पलिक्नी' वृद्धेत्यर्थः इतोमनुष्यजातेरीप्' मनुष्यजातिवाचिन इकारांतात् स्त्रियामीप्स्यात्' दक्षस्यापत्यं दाक्षिः' अतइञितीञ् अत्रगोत्रलक्षणा जातिः' अवंते

कचि द्रा' दृढपत्नी' दृढपतिः' वृषलपत्नी' वृषलपतिः। एता' एनी' हरिता' हरिणी' रोहिता' रोहिणी' श्येता' श्येनी' असिता' असिक्नी' पलिता' पलिक्नी' इत्यादि' इतोमनुष्यजातेरीप्। दाक्षी। अवन्ती' कुन्ती' उतऊः। उदन्तादयोपधान्मनुष्यजाति वाचिनस्त्रियामूप्प्रत्ययः। कुरूः। अयोपधात्किम्। अध्वर्युः। स्त्री' पङ्गोश्च। पङ्गूः। श्वशुरस्योकाराकारलोपऊश्च' श्वश्रूः। उपमानवाचिपूर्वपदाद्रूरूत्तरपदादूः' करभोरूः'

रपत्यं स्त्री' कुन्तेरपत्यं स्त्री' स्त्रियामवंति कुंतीत्यपत्यप्रत्ययस्य लुक् अत्रापि गोत्रलक्षणा जातिः' उतऊः' कुरोरपत्यं स्त्री कुरूः' स्त्रियामवंति कुंति कुर्वित्यऽपत्यप्रत्ययलुक्' अत्रापि गोत्रलक्षणा जातिः अयोपधात्किं अध्वर्युर्ब्राह्मणी शाखाध्येत्री' शाखाऽध्यायिवंशोद्भवा वेत्यर्थः अत्रचरणलक्षणा जातिः' अध्वरं पातीति विग्रहे मृगय्वादयश्चेत्यौणादिकेन सूत्रेणया धातोः कुप्रत्ययोऽध्वरशब्दस्यांत्यलोपश्च' पङ्गोश्च' पङ्गुशब्दो गुणवाची न स्यात् स्त्रियामूः स्यात्। श्वशुरस्योकाराऽकारलोपऊश्च' श्वशुरशब्दात् स्त्रियामूः स्यात् उकाराकारयोर्लोपश्च' संनिहितत्वादंतस्यैवातो लोपो नत्वादेः' पुंयोगे चेतीबू निवारणार्थमिदं' उपमानवाचिपूर्वपदादूरूत्तरपदादूः' उपमीयतेऽनेन तदुपमानं अधिकगुणविशिष्टमित्यर्थः' करभवदूरू यस्याः सा करभोरूः। मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः

संहितशफलक्षणवामसहितसहादेरनौपम्येपि संहितादिपूर्वपदाद्रूरूत्तरपदान्नाम्नः स्त्रियामूः स्यात्। उपमीयतेऽनयेत्युपमानंतस्याभाव औपम्यं न औपम्यमनौपम्यं
तस्मिन्। संहितौ मिलितौ ऊरू यस्याः सा संहितोरूः। शफाविव ऊरू यस्याः सा शफोरूः। शफं क्लीबे खुरः पुमानित्यमरेण क्लीबत्वमुक्तं तथापि कोशान्तरे पुंस्त्वं शफः खु
रे गवादीनां मूले विटपिनामपीति हेमचन्द्रः। लक्षण मस्त्यस्मिन् स लक्षणः। अस्त्यर्थेऽप्रत्ययः लक्षणौ ऊरू यस्याः सा लक्षणोरूः। वामौ सुन्दरौ ऊरू यस्याः सा वामोरूः
हितेन सह हेति सहितः सहितौ ऊरू यस्याः सा सहितोरूः। सह हेते इति सहौ सहौ ऊरू यस्याः सा सहोरूः। नृनरयोर्वृद्धिश्च। नृशब्दान्नरशब्दाच्च ङीप् स्यात् नरशब्दाज्जाति
लक्षणे ङीपि प्राप्ते वृद्ध्यर्थं वचनं नृनरस्य वा स्त्री नारी। यूनस्तिः त्वणङीपृङ् मस्याऽपवादः। नास्तोन इति सूत्रे केचित् स्यादेरसेरित्यनुवर्त्तयन्ति तन्मते युवन्शब्दात्तिप्रत्यये

संहितशफलक्षणवामसहितसहादेरनौपम्येऽपि। संहितोरूः। शफोरूः। लक्षणोरूः। वामोरूः। सहितोरूः। सहोरूः। नृनरयोर्वृद्धिश्च। नारी।
यूनस्तिः। युवन्शब्दात्स्त्रियान्तिः। युवतिः॥ ॐ॥ इति स्त्रीप्रत्ययाः॥ ॐ॥ लिङ्गार्थे प्रथमा। नामार्थमात्रे लिङ्गमात्राधिक्ये च प्रथमा विभक्तिः। १ ॥

नलोपः कथं स्यात्। स्यादीनां रसम्भवत्वाभावादुच्यते नृ इः इति च्छेदः कर्त्तव्यः। युवन्शब्दात्स्त्रियामिप्प्रत्ययो यूनोऽन्त्यस्य ना देशश्चेति कथं तर्हि युवती करनिर्मथि
तमित्यत्र मथितमिति प्रयोगः। यौति मिश्रीकरोति पत्या सह इति यौतेः शतृप्रत्यये ङीप् इतीपि ह्रतेवोध्यः। अत्राप्यनुपसर्ज्जनादिति वक्तव्यं गौणे तु बहवो युवानो यस्यां सा
बहुयुवा पूः स्त्रीप्रत्ययान्तेभ्यः शब्देभ्यः प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति परिभाषया स्याद्युत्पत्तिर्वोध्या। इति स्त्रीप्रत्ययाः॥ ॐ॥ स्यादयः प्रत्यया
नाम्नो विहितास्तेषामर्थविशेषे व्यवस्थां दर्शयितुमारभते। लिंगार्थे प्रथमा लिंगञ्चाऽर्थश्चानयोः समाहारो लिंगार्थं तस्मिन् लिंगार्थे अर्थे प्रथमा इत्युक्ते कस्यार्थे
इत्याकांक्षायां यस्मान्नाम्नः स्यादिर्विभक्तिर्विहिता तस्य नाम्नोऽर्थे एवं तिनामार्थमात्रे मात्रं कार्त्स्न्येऽवधारणे इत्यमरः तत्र प्रथमा विभक्तिर्भवतीत्युक्तो नामार्थः॥ एम. ६८

नियतोपस्थितिको नियतोपस्थितिर्यस्य स नियतोपस्थितिकः। यस्मिन् नाम्नि उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स नियतोपस्थितिको नामार्थ एवं शक्य इत्युच्यते अ
नियतलिंगग्रहणार्थं लिंगमिति लिंगे लिंगमात्राधिकेऽपि प्रथमा। यद्यपि लिंगमात्रे इत्येवास्त्वर्थस्तथापि नामार्थं विना लिंगादिप्रतीतेरसंभवाद् आधिक्ये इत्युक्तं। प्र
थमाद्वयः सप्तम्यन्ताः प्राचां संज्ञास्ताभिरिहापि व्यवहारः। ननु सिंहो माणवक इत्यादौ प्रथमा न स्यादुच्यते शक्यार्थमादाय प्रथमाविभक्तेरुत्पत्तौ सत्यां पश्चादन्यदीत
रसमाहारो लक्ष्यार्थबोधोऽस्तीति। ननु वीरः पुरुषः इत्यादौ प्रथमा न स्यात्। वीराऽभिन्नः पुरुष इत्यभेदसंसर्गस्याधिकस्याभावात् उच्यते। अत्र पदसंस्कार
पक्षाभ्युपगमोऽस्ति। ततोऽन्तरंगत्वात् प्रथमं प्रवृत्तपदसंस्कारेण प्रथमारूपे कृते पश्चाद् बहिरंगत्वात् अभेदसंसर्गो वाक्यार्थः कर्तव्य इति। नास्ति लिंगं येषां ते अलिं
गाः नियतं निश्चितं लिंगं येषां ते नियतलिंगा इत्युभयेषां नामार्थमात्रे उदाहरणं यथा उच्चैरित्यपरत्वाद्विसर्गसिद्धिः। किंचास्य प्रथमान्तत्वात् संग्राम उच्चैस्त इ

नियतोपस्थितिको नामार्थः। उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानम्। द्रोणः। खारी। आढकम्। एकः। द्वौ। बहवः। अलिङ्गा नियतलिङ्गाश्च नामार्थमात्र इ
त्यस्योदाहरणम्॥ अनियतलिङ्गास्तु लिङ्गमात्राधिका इत्यस्य। तटः। तटी। तटम्॥

यद्यप्य
(तिविद्यमानपूर्वादिति सूत्रेण नेमे आदेशयोर्विकल्पसिद्धि
रपि फलं कृष्णः अयं नीलद्रव्येऽनियतलिंगस्तथापि वासुदेवेऽपि नियतलिंग एवेति भावः। ज्ञायते तत् ज्ञानं भावे ल्युट्। खारी द्रोण आढकमित्यत्रापि नामार्थ एव प्रथ
मा परिमाणार्थस्यानियतत्वाभावात् द्रोणो व्रीहिरित्यत्र तु द्रोणपरिच्छिन्नोऽभिन्नो व्रीहिरित्यभेदान्वयः। नामार्थयोरभेदान्वयस्य व्युत्पन्नत्वात्। ननु एको द्वौ बहव इ
त्यत्र नाम्नैव संख्याया अभिधानात् प्रथमा न स्यादुच्यते न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्यय इति नियमात् प्रथमोत्पत्तिर्बोध्या। अनियतं लिंगं येषां ते अनिय
तलिंगास्तेषामनियतलिंगमेवेति लिंगमात्रं। अधिकस्य भाव आधिक्यं लिंगमात्रस्य आधिक्यं लिंगमात्राधिक्यं तस्मिन्नुदाहरणं बोध्यम्। किंच भाष्यकारमते पंचक
म्प्रातिपदिकार्थः। स्वार्थो द्रव्यं लिंगं संख्या कारकाऽन्यक इति। यथा दधिमध्वित्यादौ विनापि विभक्तिं प्रातिपदिकादेव तावतामर्थानां प्रतीतेः। कैयटमते आदितस्त्रयः अनुष्क

सि॰ चं॰ टी॰ सु॰

इतिकारमते आदिनस्त्रिकं प्रातिपदिकार्थः।संख्याकर्मादयस्तु विभक्त्यर्था इति। आदितो द्विकं प्रातिपदिकार्थः इत्यन्ये' लिंगमात्रादिवाच्यमित्युक्तत्वात्। तत्र
स्वार्थो विशेषणतां द्रव्यं विशेष्यं' द्रव्यगुण क्रियासन्निधाने द्रव्यवाचकस्यैव प्राधान्यमित्युक्तत्वात् लिंगस्त्रीत्वादिसंख्या एकत्वादिः कारकं कर्मादि॥ ॥आमंत्रणे
च संबोधनाधिकोऽप्राप्तो वचनं' आमंत्र्यते प्रसन्नः क्रियते अनेनेति करणे ल्युट् अनभिमुखस्याऽभिमुखः क्रियतेऽनेनेत्यभिमुखीकरणमनुकूलकरणं तत्र प्रथ
मा भवति' देवमां पाहीति वाक्ये देवसंबोधनविषयो मत्कर्मक रक्षणक्रियेति बोधः सम्बोधनपदस्य च तत्तत्क्रियायां विशेषणमित्युक्तत्वात् हसंबोधने प्रहृत्य
र्थे प्रति विशेष्यं क्रियां प्रति विशेषणमिति' भोस् भगोस् अघोस् भगवन् भगवदघवतावा निपात्याधौ' धि विषये एषां स्थाने एतेनि पात्यन्ते वा हे भोः हे भवन् हे पू

आमन्त्रणे च। आभिमुखीकरणे प्रथमा' हे देव' हे देवौ' हे देवाः' भोस् भगोस् अघोस् भवद्भगवदघवतावा निपात्याधौ' भो हरे। भगो नमस्ते
अघो याहि' शेषाः कार्य्यकर्तृसाधनयोर्हानपात्रे विश्लेषावधौ सम्बंधाधारभावयोः' द्वितीयाद्या विभक्तय एष्वर्थेषु भवन्ति। कार्य्ये कर्म
कारके द्वितीया' कटङ्करोति कारुको रूपम्पश्यति चाक्षुषः॥ राज्यम्प्राप्नोति धर्म्मिष्ठस्सोमं सुनोति सोमपाः॥

ज्येत्यर्थः' हे भगोः हे भगवन्'
हे त्वाति निन्दितत्यर्थः। हे अघो: हेऽघवन् हे पापिष्ठेत्यर्थः' तुम्सहितानामेव निपातनं कृतं भोस् इत्यनेन विसर्गलोपः भो हरे। इति प्रथमा। शेषाः कार्य्यकर्तृसा
धनयोर्दानपात्रविश्लेषावधौ संबंध आधोरभावयोः। शिष्यंते इति शेषाः कर्मणि घञ् प्रत्ययः प्रथमायाः शेषाः अन्याः षड्विभक्तयस्ताः। कार्य्यादिषु षट्सु यथा
क्रमं प्रवर्तंते इत्यर्थः। कार्य्ये द्वितीया क्रियते कर्त्रा स्वक्रियया निष्पाद्यते यत्तत्कार्यं धातूपात्तफलाश्रय इत्यर्थः तस्मिन्ननुक्ते कार्य्ये कर्मणि द्वितीया स्यात्। उक्तक राम
र्मणि तु प्रथमैव' उक्तत्वाख्यातकृत्तद्धितसमासनिपातैर्भवति आख्यातोक्ते' हरिः सेव्यते' कृदुक्ते लक्ष्म्या सेवितो हरिः' तद्धितोक्ते शतेन क्रीतः शत्यः। कारका त्क्रि ६९
यायुक्ते इति एयः समासोक्ते प्राप्त आनंदो यं स प्राप्तानन्दः' निपातोक्ते विषवृक्षोपि संवर्द्ध्य स्वयं छेत्तुमसांप्रतमिति। कटं करोति कारुको रूपं पश्यति चाक्षुषः।

ज्यं प्राप्नोति धर्मिष्ठः सोमं सुनोति सोमपाः १ अत्र सर्वत्राख्यातेनानुक्ते कर्मणि द्वितीया' कारूकः पुमान् कटं करोति कटनिष्ठोत्पत्त्यनुकूला एककर्तृका वर्तमा
नाकरोतिक्रियेति शाब्दबोधः' चक्षुषा पश्यतीति चाक्षुषः पुमान् कारकादित्यण् रूपं पश्यति' रूपनिष्ठसाक्षात्कारोत्पत्त्यनुकूला एककर्तृका वर्तमाना दृशिक्रिया
धर्मोऽस्त्यस्येति धर्मी' अस्त्यर्थे इन् अतिशयेन धर्मीति इष्ठप्रत्ययः धर्मिष्ठः पुमान् राज्ञः कर्मेति राज्यं प्राप्नोति राज्यनिष्ठोत्पत्त्यनुकूला एककर्तृका वर्तमाना प्राप्नोती।
तिक्रिया' सोमं पिबतीति सोमपाः। पुरुषः सोमममृतवल्लीं सुनोति खंडयतीत्यर्थः। सोमनिष्ठखंडनोत्पत्त्यनुकूला एककर्तृका वर्तमाना सुनोतिक्रियेति' क्रि
याप्रधानमाख्यातमिति सिद्धांतात्। क्रियाविशेष्यकः शाब्दबोधः कर्तव्यः' यास्कोप्याह' भावप्रधानमाख्यातं सत्वप्रधानानि नामानीति' पश्य मृगो धावतीत्या
दौ तु मृगकर्तृकगमनं दृशिक्रियायां कर्म' प्रधानं तु दृशिक्रियैव उक्तञ्च सुबंतं हि यथाऽनेकं तिङंतस्य विशेषणं' तथा तिङंतमप्याहुस्तिङंतस्य विशेषणमि
ति १ ननु उक्ते कर्मणि प्रथमेत्युक्तं तेन पक्वमोदनं भुंक्ते इत्यत्र द्वितीया न स्यात् क्तप्रत्ययेन कर्मण उक्तत्वात् उच्यते' इह हि यच्चि भुजिनिरूपिते द्वे कर्मत्वश
क्ती तत्राप्रधानीभूतभुजिक्रियानिरूपितामनुक्तां शक्तिमादाय द्वितीयोत्पत्तिर्भवतीति' उक्तं च हरिणा' प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्' शक्तिर्गुणाश्रया तत्र प्र
धानमनुरुध्यते १ प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते' यदा गुणे तदा तद्वदनुक्तापि प्रतीयते २ अत एव पक्वौदनो भुज्यते देवदत्तेनेत्यत्र भुजि प्रत्य
येन उक्ते कर्मणि प्रथमैव भवति पचेरप्राधान्यात्। अथ प्रसंगान्यपि निसूत्राणि लिख्यंते। अकथितं च' अपादानादिविशेषैरनुक्तं कारकं कर्मसंज्ञं स्यात् दुह्याच्
पच्दंड्रुधिप्रच्छिचिब्रूशासुजिमंथ्मुषाम्' कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहां १ दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते त
देवाकथितं कर्मेत्ययम्। कर्मणा युज्यते इति कर्मयुक् क्विबंतम् मुख्यकर्मणा सह क्रियया संबध्यमानमपादानादिविशेषैरकथितं यत्कारकं तत्कर्मसंज्ञकं भवती
त्यर्थः। एतेन दुहादीनां द्विकर्मकत्वमुक्तम् दुह प्रपूरणे' गां दोग्धि पयः स इत्यत्र पयः कर्मक गोसंबंधि दोहनमर्थः। पयोऽत्र मुख्यं कर्म धातूपात्तफलाश्रयत्वात् गोस्तु पय
सो निमित्तमात्रेणोपात्ता न त्वऽवधिभावेनेत्यपादानसंज्ञाया अप्रवृत्तेरनेन कर्मसंज्ञा' विवक्षायां त्वपादानादिसंज्ञा भवत्येव विवक्षातः कारकवि ॥ ६ ॥ ६॥
॥ ॥

भक्तयो नानाभवंतीति शाब्दिका इत्युक्तत्वात्। गोदोग्धि पयः स इति दुपाचृयाञ्चायाम् बलिं याचते वसुधां हरिः। अत्र प्रार्थनार्थस्य याचतेर्वसुधां मुख्यं कर्म तेन क
र्मणा युक्तो बलिः। न त्वपादानत्वाविवक्षायामनेन कर्मसंज्ञा। अपादानविवक्षायां तु बलेर्याचते वसुधामिति। अविनीतं विनयं याचते सः। अविनीतं विनयायाऽनुन
यतीत्यर्थः। अविनीतमिति मुख्यं कर्म विनयस्य तादर्थ्याविवक्षायामनेन कर्मसंज्ञा। विवक्षायां तु अविनीताय विनयं याचते। डुपचष् पाके। तंडुलानोदनं पचति सः।
ओदनं निर्वर्तयतीत्यर्थः। ओदनमिति मुख्यं कर्म करणत्वाविवक्षायां तंडुलानित्यत्रानेन कर्मसंज्ञा। विवक्षायां तु तंडुलैरोदनं पचतीति। दंड ग्रहणे चुरादिः। गर्गान् शतं दं
डयति सः। शतमिति मुख्यं कर्म गर्गानित्यत्र त्वपादानत्वाविवक्षायामनेन कर्मसंज्ञा। विवक्षायां तु गर्गेभ्यः शतं दंडयतीति। रुधिर् आवरणे। व्रजमवरुणद्धि गां
सः। गामिति मुख्यं कर्म व्रजमित्यत्र त्वधिकरणत्वाविवक्षायामनेन कर्मसंज्ञा। विवक्षायां तु व्रजेऽवरुणद्धि गामिति। प्रच्छ ज्ञीप्सायां माणवकं पंथानं पृच्छति
सः। पंथानमिति मुख्यं कर्म तादर्थ्याविवक्षायां तु माणवकमित्यत्रानेन कर्मसंज्ञा। विवक्षायां तु माणवकाय पंथानं पृच्छति। चिञ् चयने। वृक्षमवचिनोति फला
नि सः। फलानीति मुख्यं कर्म वृक्षमित्यत्रापादानत्वाविवक्षायामनेन कर्मसंज्ञा। विवक्षायां तु वृक्षादवचिनोति फलानीति। ब्रूञ् व्यक्तायां वाचि। शासु अनुशिष्टौ। मा
णवकं धर्मं ब्रूते सः। धर्ममिति मुख्यं कर्म माणवकमित्यत्र तु तादर्थ्याविवक्षायामनेन कर्मसंज्ञा। विवक्षायां तु माणवकाय धर्मं ब्रूते शास्तीति वा। जिजि अभिभवे। शत
म् जयति देवदत्तं सः। शतमिति मुख्यं कर्म देवदत्तमित्यत्र त्वपादानत्वाऽविवक्षायामनेन कर्मसंज्ञा। विवक्षायां तु शतं जयति देवदत्तात् सः। मंथ विलोडने। सु
धां क्षीरनिधिं मथ्नाति हरिः। सुधामिति मुख्यं कर्म क्षीरनिधिमित्यत्राधिकरणत्वाविवक्षायामनेन कर्मसंज्ञा। विवक्षायां तु सुधां क्षीरनिधौ मथ्नाति। मुष स्तेये।
देवदत्तं शतं मुष्णाति। शतमिति मुख्यं कर्म देवदत्तमित्यत्रापादानत्वाविवक्षायामनेन कर्मसंज्ञा। विवक्षायां तु देवदत्ताच्छतं मुष्णाति सः। णीञ् प्रापणे। हृञ् हरणे। कृ
ष विलेखने। वह प्रापणे। ग्राममजां नयति सः। एवं हरतीत्यादि। अजामिति मुख्यं कर्म ग्राममित्यत्र त्वधिकरणत्वाविवक्षायामनेन कर्मसंज्ञा। विवक्षायां तु ग्रामेऽजां
नयति हरति कर्षति वहति वेति। एतदर्थका धातवोऽन्येपि संज्ञेयाः। माणवकं धर्मं भाषते। अभिधत्ते वक्तीत्यादि। अकर्मकधातुभिर्योगे देशः कालो भावो गंत

॥ ॥

व्योऽध्वा च कर्मसंज्ञक इति वाच्यं 'कुरून् स्वपिति' मासमास्ते 'गोदोहमास्ते'। क्रोशमास्ते' गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ गत्याद्यर्थी
नां शब्दकर्मकाणामकर्मकाणां च धातूनामणौ यः कर्त्ता स णौ कर्म स्यात् प्रत्यवसानं भक्षणं शब्दः कर्मकारकं येषां ते शब्दकर्मकाः। अनुत्पन्ने णिप्रत्यये
शुद्धधातुवाच्यां क्रियां प्रति यः कर्त्ता सञ्जि प्रत्ययान्तधातुवाच्यां क्रियां प्रति कर्मसंज्ञः स्यादित्यर्थः 'यथा शत्रूनगमयत्स्वर्गं वेदार्थं स्वान् वेदयत्। आशयच्चामृतं दे
वान् वेदमध्यापयद्विधिं १ आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः' गत्यर्थो यथा शत्रवः स्वर्गमगच्छन् तान् शत्रून् श्रीहरिः स्वर्गमगमयदिति गमेरणि प्र
त्ययानावस्थायां शत्रवः कर्त्तारस्ते ण्यन्तावस्थायां कर्माऽभवन् स्वर्गकर्मकं शत्रुनिष्ठं यद्गमनम् तदनुकूलो हरिकर्तृकश्चिरानीतो व्यापारः बुद्ध्यर्थो यथा 'स्वे स्व।
कीयाः वेदार्थमविदुस्तान् स्वान् श्रीहरिर्वेदार्थमवेदयत् विदेरण्यन्तावस्थायां स्वे कर्त्तारस्ते ण्यन्तावस्थायां कर्माऽभवन् देवा अमृतमश्नन् तान् देवान् श्रीहरि

कर्त्तरि करणे च तृतीया 'भिन्नश्शरेण रामेण रावणो लोकरावणः। कराग्रेण विदीर्णोऽपि वानरैस्स युध्यते पुनः॥

((रमृतमाशयत् अश्नेरण्यं
तावस्थायां देवाः कर्त्तारस्ते ण्यन्तावस्थायां कर्माऽभवन्। विधिर्वेदमध्येत तं ब्रह्माणं श्रीहरिर्वेदमध्यापयत् पाठयदित्यर्थः एतेरण्यन्तावस्थायां विधिः कर्त्ता स
ण्यन्तावस्थायां कर्माऽभवत् सलिले जले पृथ्वी आस्त तां पृथ्वीं श्रीहरिः सलिले आसयत् स्थापयति स्म आसेरण्यन्तावस्थायां पृथ्वी कर्त्री सा ण्यन्तावस्थायां कर्माभ
वत्। स श्रीहरिर्मम गतिः स्यादित्यन्वयः। इति द्वितीया ॥ कर्त्तरि करणे च तृतीया 'क्रियां करोति स कर्त्ता' धातूपात्तव्यापाराश्रय इत्यर्थः उक्तं च 'धातुनोक्त।
क्रिये नित्यं कारके कर्तृतेष्यते' इति 'व्यापाराश्रयः कर्त्ते' त्युक्तं व्यापारो धातुवाच्य आश्रयस्तृतीयावाच्योऽनन्यलभ्यत्वात् स त्रिविधः स्वतन्त्रः प्रयोजकः।
कर्मकर्त्ता चेति क्रियासाध्यतेऽनेनेति साधनं क्रियासिद्ध्युपकारकमित्यर्थः 'तदेव करणं' अत्र तृतीयाया व्यापार आश्रयश्च पृथक् २ वाच्यौ तत्र सर्वत्र प्रकृत्यर्थः
आश्रये अभेदेन संसर्गेण विशेषणं व्यापारस्तु भावनायां विशेषणं भवति' उक्तं च। क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरं। विवक्ष्यते यदा यत्र तत्तत्करणं

पू॰
सि॰ चं॰
टी॰ सु॰
७१

स्मृतं १ तत्रानुक्ते कर्त्तरि करणे च तृतीया विभक्तिर्भवति' रामेण कर्त्रा शरेण करणेन रावणो भिन्नः' कीदृशः लोकान् रावयतीति लोकरावणः' भिदेः कर्मणि क्तः' यद्यपि क्रियाप्रतिकारकाणां विशेषणत्वेन तथापि हृदुक्तानां कारकाणां विशेष्यत्वेनैव तेषां सत्वप्रधानानि नामानीत्युक्तत्वात्। रामनिष्ठो यो व्यापारो धनुराकर्षणादिस्तत् प्रेरितो यो बाणस्तद्भिन्नाश्रयको यो व्यापारः शरीरभेदनादिस्तत्साध्यः प्राणवियोगाश्रयो रावण इत्यर्थः' रावणं हन्ति रावणो हन्यते इत्यत्र तु क्रियाविशेष्यकः शाब्दबोधो भावप्रधानमाख्यातमित्युक्तत्वात्। रावणनिष्ठो यः प्राणवियोगः शराभिन्नाश्रयशरीरभेदनादिव्यापारसाध्यसाधनानुकूलो रामनिष्ठधनुराकर्षणादि। व्यापार इत्यर्थः अनुक्ते कर्त्तरि किं हरिः करोति' पाचकः कर्तरि ण्वुल् तद्धितोक्ते शाब्दिकः इकः प्रत्ययः समासोक्ते कृतं विश्वं येन स कृतविश्वः अनुक्ते करणे किम् जीवन्त्यनेनेति जीवनः करणे ल्युट् प्रत्ययः॥ इति तृतीया॥ दानपात्रे चतुर्थी' दीयते इति दानं कर्मणि ल्युट् दानस्य पात्रं दानपात्रं दानयोग्यमित्यर्थः' योग्य

दानपात्रे चतुर्थी। वेदविदे गां ददाति' क्रियया यमाप्नोति तत्रापि चतुर्थी। पत्ये शेते' विश्लेषो विभागस्तस्यावधौ पञ्चमी॥ हिमवतो ऽवतरति गङ्गा। धावतोऽश्वात् पतति। सम्बन्धे षष्ठी। राज्ञः पुरुषः॥

१ भाजनयोः पात्रमित्यमरः। अस्य संप्रदानसंज्ञा सम्यक् प्रदीयते ऽस्मै तत्संप्रदानं' अपुनर्ग्रहणाय स्वत्वनिवृत्तिपूर्वकं यत् परस्वत्वोपपादनं तद्दानं' अत एव रजकस्य वस्त्रं ददातीत्यादौ न चतुर्थी रजकस्येति संबंधे षष्ठी नतु श्रोत्रियाय कन्यां ददातीत्यादौ चतुर्थी न स्यात्। स्वत्वत्यागाभावादुच्यते स्वस्य भावः स्वत्वं आत्मत्वं आत्मीयत्वं ज्ञातित्वं धनत्वं च आत्मत्वात्मीयत्वयोस्त्यागो नास्तीति ज्ञातित्वस्य त्यागोऽस्ति परगोत्रप्रवेशाद्धनत्वस्य च त्यागः अतोऽत्र परस्वत्वस्योपपादनरूपं मुख्यं दानं तत्र दानपात्रे अनुक्ते संप्रदाने कारके चतुर्थी स्यात्' वेदं वेत्तीति वेदवित् तस्मै वेदविदे चैत्रो गां ददाति अत्र चतुर्थ्या उद्देश्यार्थः वेदविदुद्देश्यकगोनिष्ठस्वत्वत्यागानुकूलः एककर्तृको वर्तमानो व्यापारः' अनुक्ते किं दानीयो विप्रः दीयते ऽस्मायिति दानीयो बाहुलकात् संप्रदाने अनीयप्रत्ययः क्रियया यमाप्नोति तत्रापि चतुर्थी क्रियया कर्ता यमाप्नोति संबध्नात्यभिप्रैति तत्र चतुर्थी स्यात्' पत्ये शेते शयनक्रियया पतिमभिप्रैति

राम
७१

मुखेनददातीत्यर्थः॥ ॥ इतिचतुर्थी॥ विश्लेषावधौपंचमी' श्लेषणंश्लेषः संयोगः विगतो विरुद्धो वा श्लेषो विश्लेषो विश्लेषो विभागः। अवधीयते एकरूपतया ज्ञायते
सोऽवधिः। विश्लेषस्यावधिर्विश्लेषावधिस्तस्मिन् विश्लेषावधौ' अस्याऽपादानसंज्ञा' उक्तंचहरिणा' अपायेयदुदासीनंचलंवायदिवाचलं' ध्रुवमेवातदावेशात्तदपा
दानमुच्यते १ अपायेविश्लेषेसाध्येसतिध्रुवमवधिभूतंकारकमतदावेशात् विश्लेषजनकक्रियाऽनावेशादपादानमुच्यते' कीदृश' चलमचलमुदासीनंवेत्यर्थः
तत्रानुक्ते अपादानकारके पंचमीस्यात्' अत्रप्रकृत्यर्थः पंचम्यर्थेऽवधावभेदेन संसर्गेणविशेषणं' प्रत्ययार्थोऽवधिस्तुक्रि यायांविशेषणंभवति' कारकाणांक्रि
ययैवसंबंधात्। हिमवतः पर्वताद्गंगाऽवतरति' अत्रावतरणविशिष्टायागंगाया विश्लेषावधिभूतो हिमवान् हिमवदभिन्नावधिकनिःसरणानुकूलोगंगाभि
न्नाश्रयकोवर्तमानोव्यापारः। धावतोऽश्वाच्चैत्रः पततिपतनक्रियाविशिष्टस्यचैत्रस्यविश्लेषावधिरश्वः शीघ्रगत्यनुकूलव्यापाराश्रयोऽश्वस्तदभिन्ना
वधिकंचैत्रनिष्ठंपतनमित्यर्थः' अनुक्तेकिं' उपाध्यायोविप्रः' उपसमीपेधीयतेऽस्मादित्यपादानेघञ्' इतिपंचमी संबंधेषष्ठी विशेषेणाश्लिष्टः संबंधः
आहुचएतौसंबद्धौ इतिप्रतीतिजनकः संबंधः समानार्थेन' नियतज्ञानाऽभावात् ससंबंधोद्विविधः क्रियाकारकसंबंधो द्रव्यगुणसंबंधश्चेति क्रियाकारकसं
बंधोपि द्विविधः विशेषसामान्यंचेति तत्रविशेषेकर्मत्वादिरूपेसंबंधेविहिताऽपवादभूताद्वितीयादयोविभक्तयः' सामान्यसंबंधेतुषष्ठी' उक्तंचसंबंधः कारके
भ्योन्यः क्रियाकारकपूर्वकः' श्रुतायामश्रुतायांचक्रियायांसोभिधीयते १ नट स्यशृणोतिमाषाणामश्नाति नटसंबंधिश्रवणानुकूलएककर्तृकोव्यापारः' माष
संबंधिभोजनानुकूलएककर्तृकोव्यापारः। विशेषविवक्षायांतुनटेनगीतंशृणोति माषानश्नाति द्रव्यगुणसंबंधोयथा' राज्ञः पुरुषः' अत्रसेव्यसेवकरूपः' राज्ञः
पुत्रः अत्रपितापुत्ररूपः' तंतूनांपटः। अवयवावयविरूपः पटस्यरूपंगुणगुणिरूपः' माषाणांराशिः' समूहसमूहिरूपः' कुरूणांराजा' पाल्यपालकरूपः। चै
त्रस्यवाहंवाह्यवाहकरूपः' शब्दस्यार्थः अत्रवाच्यवाचकरूपः' चक्षुषोविषयोरूपं अत्रबोध्यबोधकरूपः' अग्नेर्धूमः' अत्रव्याप्यव्यापकरूपः' पटस्याभावः अत्र
प्रतियोग्यनुयोगिरूपः' उपगोरपत्यं अत्रापत्यापत्यवद्रूपः' कुशूलस्यान्नमत्राधाराधेयरूपइत्यादि' ननुसंबंधस्योभयनिष्ठत्वात् कस्मात्षष्ठी उच्यते विशेषणा
त्षष्ठीभवति उक्तंच' भेद्यभेदकयोः श्लिष्टः संबं ॥ ६ ॥

पू॰ सिं॰ चं॰ टी॰ सु॰ ७२

धोन्योऽन्यमिष्यते द्विष्ठो यद्यपि संबंधः षष्ठ्युत्पत्तिस्तु भेदकात् १ भेद्यभेदकयोः स्वरूपं यथा परार्थे स्वार्थे निक्षेपाद् प्रधानं विशेषणं विशेष्यं तु प्रधानं स्यात् स्वार्थे सैव प्रकाशनात् १ ननु शुक्लः पट इत्यत्रापि विशेषणे षष्ठी स्यात् मैवं एवं च विशेषणस्याभेदविवक्षातो न षष्ठी विशेषणस्य भेदविवक्षायां तु षष्ठी भवत्येव उक्तं च नान्तरो द्विधैव संबंधः सर्ववाक्येष्ववस्थितः सामानाधिकरण्येन षष्ठ्या वापि च चिह्नवेत् १ अत्र प्रकृत्यर्थः प्रत्ययार्थे संबंधे विशेषणं प्रत्ययार्थः संबंधस्तु पुरुषे विशेषणं भवति राज्ञः पुरुषः राजनिरूपितसेवकत्वसंबंधवान् पुरुषः इति षष्ठी॥ आधारे सप्तमी आध्रियंते क्रिया अस्मिन्नित्याधारः संज्ञायामकर्तरि चेत्यधिकरणे घञ् अधिकरणमित्यर्थः स आधारः षड्विधा अस्येति षोढा अन्यत्र सिद्धयोराधाराधेययोः प्रादेशिकः संबंध उपश्लेषः उपरिश्लेषः उपश्लेषोऽस्याऽस्तीति उपश्लेषे भव इति वा औपश्लेषिकः अध्यात्मादित्वाट्ठञ् इति वा अइकौ च मत्वर्थे इतीकः णिनो वेति णित्वाद्वृद्धिः भवार्थे इको वा सामीप्यं सांनिध्यं सामीप्ये भवः सामीप्यमस्यास्तीति वा सा

आधारे सप्तमी औपश्लेषिकः सामीपिको ऽभिव्यापको वैषयिको नैमित्तिक औपचारिकश्चेति षोढा सः कटे शेते कुमारोऽसौ वटे गावस्सुशेरते तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परमं युद्धे सन्नह्यते धीरो ऽङ्गुल्यग्रे करिणां शतम्॥

मीपिकः केनेयेका इतीकः अइकौ चेति वा इकः अपृथग्भिन्नप्रदेशवर्जितयोः देशयोराधाराधेययोः सर्वावयवसंबंधिकः अभिव्यापकः अभितः सर्वतो व्याप्यते आधेयेनेत्यभिव्यापकः कर्मणि घञ् ततः स्वार्थे कः अन्यत्र भावो विषयः विषये भवो वैषयिकः केनेयेका इतीकः निमित्तं हेतुः निमित्ते भवो नैमित्तिकः केनेयेका इतीकः निमित्तफलं तदस्यास्तीति वा अइकौ चेतीकः अन्यत्र विद्यमानस्य संबंधस्यान्यत्रारोपः उपचारः उपचारे भवः औपचारिकः केनेयेका इतीकः उपचारोऽस्याऽस्तीति वा अइकौ चेतीकः तत्राधिकरणे कारके सप्तमी स्यात् अत्र सप्तम्या आश्रयोऽर्थः प्रकृत्यर्थस्त्वभेदेन संसर्गेणाश्रये विशेषणमाश्रयस्तु क्रियायां विशेषणं भवति कारकाणां क्रिययैवान्वयात्। उक्तं च आश्रयोऽवधिरुद्देश्यः संबंधः शक्तिरेव वा यथायथं विभक्त्यर्थाः सुपां कर्मेति वाक्यतः १ कर्म द्वितीया कर्तृसाधनं तृतीया आधारः सप्तमी नामाश्रयो यो निरूप्य भेद्या

राम ७२

श्चतुर्थ्यर्थः संबंधः षष्ठ्यर्थः शक्तिः प्रथमार्थः यथासंख्यं बण्णामुदाहरणान्याह असौकुमारः कटेशेते गावो वटेसुशेरते स्वपंति तैलंति लेषु विद्यते हृदि अमृतं सुखरूपं परमुत्तमं निरुपाधिकंब्रह्मावर्तते। हृदयब्रह्मणोः प्रकाश्य प्रकाशकरूपः संबंधः धीरः संनह्यते युद्धे कवचबंधनस्य युद्ध फलकत्वात् न्निमित्तकरिणाघ्नतमंगुल्यग्रे वर्तते करिभूम्योराधाराधेयरूपः संबंधः अंगुल्यग्रेऽऽरोप्यते॥ ःः॥ क्रियालक्षणंभावस्तत्रापिसप्तमी। भवनंभावः क्रियासाप्रसिद्धै वग्राह्या व्याख्यानात् भावोस्तियस्मिन्स भावः मत्वर्थीयोऽप्रत्ययोऽप्रत्ययः प्रसिद्धक्रियावानित्यर्थः॥ प्रसिद्धक्रियावांस्तु सापेक्षत्वादप्रसिद्धक्रियावंतं संलक्षयेवम भवति अत आह क्रियालक्षणंक्रियायांप्रसिद्धं॥ क्रियायालक्षणंचिन्हंनिराश्रयायाः क्रियायाऽसंभवादाश्रयस्याक्षिप्यते अप्रसिद्धक्रियावतो लक्षणमित्यर्थः

क्रियालक्षणम्भावस्तत्रापिसप्तमी 'वर्षतिदेवेचौरश्चायातः' विनासहनमस्कृते निर्द्धारणेस्वाम्यादिभिश्च 'एनेय्योगेद्वितीयाद्याविभक्तयः। विनादियोगेद्वितीयां 'विनापापंसर्वम्फलति' 'अन्तरेणाक्षिणीकिञ्जीवितेन अन्तरात्वाम्मांहरिः 'जपमनुप्रावर्षत अनुहरिंसुराः' भक्तो हरिमभि 'उपहरिंसुराः' नदीमन्ववसितासेना' अतिदेवान्कृष्णः॥

लक्षणरूपाप्रसिद्धालक्षणयावाप्रसिद्धैवसंभवतिप्रसिद्धया अप्रसिद्धायाः साधनैचित्यात् लक्ष्यलक्षणभावसंबंधेषष्ठ्यांप्राप्तायांसप्तमीविधीयते' अप्रसिद्धक्रियावल्लक्षणेप्रसिद्धक्रियावतिकर्त्तरिकर्मणिचसप्तमीस्यादित्यर्थः कर्तर्युदाहरणमाह 'देवेमेघेवर्षतिसतिचौरआयातः अत्रदेवनिष्ठाप्रसिद्धाक्रियासाचौरनिष्ठामप्रसिद्धांक्रियांलक्षयतिवर्षतीत्यत्रलक्षणहेत्वोः क्रियाइतिसूत्रेणकर्तरिशतृप्रत्ययः कर्त्ताचदेवस्तयोः सामानाधिकरण्यात्सप्तमी' कर्मण्युदाहरणमाह· गोषुदुह्यमानासुसतीषुसचौरोगतः दुह्यमानास्वित्यत्रकर्म्मणियक्इतिसप्तमी' अथोपपदविभक्तीराह। विनासहनमस्कृतेनिर्द्धारणेस्वाम्यादिभिश्चविनाचसहश्चनमश्चकृतेचनिर्द्धारणंचस्वामीचतेविनासहनमस्कृतेनिर्द्धारणस्वामिनः तेआदयोयेषांतेविनासहनमस्कृतेनिर्द्धारणस्वाम्यादयस्तैर्विनासहनमस्कृतेनिर्द्धारणस्वाम्यादिभिः द्वंद्वांतेश्रूयमाणः शब्दः प्रत्येकंसंबध्यतेइत्यादिशब्द

द्वितीया। विनापापंसर्वं फलति। पापस्याऽभावे सर्वं कर्मफलप्रदं भवतीत्यर्थः॥ अक्षिणीत्रंतरेण नेत्रयोरभावे च सुधीर्विना इत्यर्थः अंतरेणेति निपातो मध्यार्थ
कोपि यथा मृणालसूत्रामलमंतरेण स्थितश्चलच्चामरयोर्द्युयंस इत्यत्र चलच्चामरयोर्द्युयसमध्ये स्थित इत्यर्थः अंतरात्वांमांतवममचमध्ये इत्यर्थः यो
गे इति किं त्रंतरात्वांमां हरेर्मूर्तिः अत्र हरिशब्दान्न द्वितीयान्त्रंतराशब्देनान्ययोगाभावात् हेतु सहहीनार्थकानुयोगे द्वितीया यथा जपमनु मेघः प्रावर्षत्
हेतुभूतजपोपलक्षितं तं वर्षणमित्यर्थः' हेतौ तृतीयाबाधिका द्वितीयात्र' नदीमन्वनद्यासह सेना अवसिता संबद्धेत्यर्थः षिञ् बंधने अस्मात्क्तः षष्ठीबाधिका
द्वितीयात्र' अनु हरिं सुराः हरेर्हीना इत्यर्थः। उत्कृष्टादेव द्वितीयानापकृष्टात् शक्तिस्वभावात्। हीनार्थकोपयोगे द्वितीया यथा' उप हरिं सुराः हरेर्हीना इत्य

अभितो ग्रामम्' सर्वतो नगरम्' धिग्जाल्मम्' उपर्युपरि पर्वतम्। अध्यधि लोकम्। अध्यधि सुखम्। अधोऽधो ग्रामम्। उभयतः कृष्णम्
एवम्परितस्समयानिकषा हा प्रतिपरियोगेऽपि' कालाध्वनोर्नैरन्तर्ये मासमधीते' क्रोशम्पर्वतः' मासङ्कुडधानाः' मासं कल्याणी। क्रोशं कु
टिला नदी। नैरन्तर्ये किम्' मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः ॥

र्थः अत्राप्युत्कृष्टादेव द्वितीयानापकृष्टात् अतिक्रमणपूजार्थकातियो
गे द्वितीया यथा' अति देवान् कृष्णः' देवानतिक्रान्तो देवानां पूज्यश्चेत्यर्थः॥ ॐ॥ अभितो ग्रामं ग्रामस्य पार्श्वद्वये इत्यर्थः
सर्वतो ग्रामं ग्रामस्य समंतादित्यर्थः जाल्मं मूर्खं धिक् तस्य निंद्यतेत्यर्थः उपर्युपरि पर्वतं पर्वतस्योर्द्ध्वमित्यर्थः अध्यधिसुखं सुखस्योपरिष्टात्समीपकालेदुः
खमित्यर्थः अधोऽधो ग्रामं ग्रामस्याधस्तात् समीपप्रदेश इत्यर्थः' उभयतः कृष्णं कृष्णस्य पार्श्वद्वये इत्यर्थः' परितः सर्वत इत्यर्थः समया निकषा निपातौ समीपा
र्थकौ विलंघ्य लंकां निकषा हनिष्यतीति माघः' हा मूर्खं तस्य शोच्यत इत्यर्थः बुभुक्षितं न प्रतिभाति किंचित् बुभुक्षितस्य पुरुषस्य किंचिन्न प्रतिभातीत्यर्थः का
लाध्वनोर्नैरंतर्ये काल अध्वा च कालाध्वानौ तयोः कालाध्वनोः निर्गतमंतरं यस्मात्तत् निरंतरं निरंतरस्य भावो नैरंतर्यं तस्मिन्नैरंतर्ये क्रियागुणद्रव्यैः सहकाला

चकाद्द्वितीया स्यात् मासमधीते निरंतरं मासस्याध्ययनक्रियेत्यर्थः। क्रोशं पर्वतः। निरंतरः क्रोशस्य पर्वत इत्यर्थः। मासं गुडधानाः निरंतरं मासस्य गुडेन मि श्रा धानाः। धाना भृष्टयवे स्त्रियामित्यमरः। मासं कल्याणी निरंतरं मासस्य शोभनगुणवती। क्रोशमधीते। निरंतरं क्रोशस्याध्ययनक्रिया। क्रोशं कुटिला नदी। निरंतरं क्रोशस्य वक्रा नदीत्यर्थः। लक्षणेत्थंभूताख्यानभागवीप्सार्थकानां प्रतिपर्यनूनां योगे द्वितीया। यथा लक्षणे वृक्षं प्रति पर्यनु वा विद्योतते विद्युत् लस्य लक्षणभावसंबंधं प्रत्यादयो द्योतयंत्यत्र। इत्थंभूताख्याने। भक्तो विष्णुं प्रति पर्यनु वा विष्णोर्भक्तेः स्वविषयविषयिभावसंबंधं प्रत्यादयो द्योतयंत्यत्र। भक्तः कृष्णस्य कंचित्प्रकारं भक्तत्वं प्राप्त इत्यर्थः। भागे लक्ष्मीः कृष्णं प्रति पर्यनु वा लक्ष्मीरूपस्य भागस्य कृष्णेन सह स्वस्वामिसंबंधः तं प्रत्यादयो द्योतयंत्यत्र कृष्णस्य भाग इत्यर्थः। वीप्सायां वृक्षं प्रति पर्यनु वा वृक्षमित्यर्थः॥ लक्षणेत्थंभूताख्यानवीप्सार्थकस्याभियोगे द्वितीया। यथा लक्षणे। हरिमभिवर्तते सुकिः

अधिपूर्वाणां शीङ्स्थासामाधारः कर्म। अभिनिपूर्वस्य विशः। उपान्वध्याङ्पूर्वस्य वसः। अधिशेते। अधितिष्ठति। अध्यास्ते वा वैकुण्ठं हरिः। अभिनिविशते सन्मार्गम्। उपविशति। अनुवसति। अधिवसति। आवसति वा वैकुण्ठं हरिः। नाभुक्त्यर्थस्य। वने उपवसति। इत्यादि॥

हरिं लक्षयित्वेत्यर्थः। लक्ष्यलक्षणभावसंबंधोऽत्र। इत्थंभूताख्याने भक्तो हरिमभि विषयविषयिभावसंबंधोऽत्र हरेः कंचित्प्रकारं भक्तत्वं प्राप्त इत्यर्थः। वीप्सायां देवं देवमभिनमति देवं देवमित्यर्थः। पृथक्नाना दक्षिणेन उत्तरेण इत्यादियोगेऽपि द्वितीया॥ ❀॥ अधिपूर्वाणां शीङ्स्थासामाधारः कर्म। शीङ् स्वप्ने। ष्ठा गतिनिवृत्तौ। आस उपवेशने। अधिपूर्वकाणामेषामाधारः कर्मसंज्ञकः स्यादनुक्ते कर्मणि द्वितीयेत्यर्थः। अभिनिपूर्वस्य विशः। द्वंद्वेऽल्पस्वरप्रधानेति नेः पूर्वनिपाते कर्तव्ये विपरीतोच्चारणमीदृशसंघातविवक्षार्थं अभिनीत्येतत्संघातपूर्वस्य विशः प्रवेशने इत्यस्याधारः कर्मसंज्ञकः स्यात्। उपान्वध्याङ्पूर्वस्य वसः। उपादिपूर्वस्य वसेराधारः कर्मसंज्ञकः स्यात् लुग्विकरणाऽलुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति न्यायात्। वस निवासे इति भौवादिक एव ह्येतेन न तु वस आच्छादने इत्यादादिकः। नाभुक्त्यर्थस्य। भोजननिवृत्तिवाचकस्य वसेराधारः कर्मसंज्ञो न। उपवसति। उपवासं करोतीत्यर्थः। इति द्वितीया

पू॰
सि॰ चं॰
टी॰ सु॰
७४

सहादियोगे तृतीया सहार्थकशब्दस्य योगे तृतीया विभक्तिर्भवति। गुरुः शिष्येण सहागतः गुरोरागमनक्रियया शब्दः संबंधः शिष्यस्य त्वार्थः संबंधः अत एव शिष्यस्याऽप्राधान्यं षष्ठ्या बाधिके यं न तु संबंधे तृतीयेयं संबंधस्योभयनिष्ठत्वेन उभाभ्यां तृतीया स्यात् मेवं वक्ष्यसम षष्ठीप्राप्तावनसा देव तृतीयापि षष्ठी चाप्रधानाद्विहिता न तस्तृतीयाप्यप्रधानादेव भवति। उत्सर्गसमानदेशा अपवादा भवंतीत्युक्तत्वात् सहार्थविव क्षायां विनापि सहार्थयोगे तृतीया भवति। वमहं सिनेत्यादिनिर्देशात्। एवं साकं सार्द्धं समं अमा पृथक् विनानाना इत्यादियोगेपि तृतीया। येनांगविकारः। अंगमस्यास्तीति सोंगः अस्त्यर्थेऽप्रत्ययः अंगीत्यर्थः अंगस्यांगिनो विकारः अंगविकारः अक्ष्णा काणः अक्ष्णः काणत्वविशिष्ट इत्यर्थः। कंचित्प्रकारं प्राप्तस्य लक्षणे सामान्यस्य भेदको विशेषः प्रकारः

सहादियोगे तृतीया। सह शिष्येणागतो गुरुः। एवं साकं सार्द्धं समं योगेऽपि। येनाङ्गविकारः। येनांगेन विकृतेनांगिनो विकारो लक्ष्यते ततस्तृतीया। अक्ष्णा काणः। अङ्गविकार इति किं। अक्षि काणमस्य। कश्चित्प्रकारम्प्राप्तस्य लक्षणे जटाभिस्तापसः। प्रकृत्यादिभ्यश्च। प्रकृत्या चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। समेनेति। विषमेणैति। द्विद्रोणेन धान्यं क्रीणाति। सुखेन दुःखेन याति। दिवः कर्मणि करणे कर्मसंज्ञं वा स्यात्। अक्षैरक्षान्वा दीव्यति। तुल्यार्थैर्योगे। कृष्णेन तुल्यः। रामेण सदृशः॥

लक्ष्यतेऽनेनेति लक्षणं चिन्हं कंचित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात् जटाभिस्तापसः जटाज्ञाप्यतापसत्वविशिष्टः जटाभिर्ज्ञाप्यं यत्तापसत्वं तद्विशिष्ट इत्यर्थः। इह जटानां लक्षणत्वं तेन लक्ष्यलक्षणभावः संबंधोऽत्र प्रकृत्या स्वभावेन चारुरभिरूपः। नत्वलंकारादिना अत्र क्रियाया अश्रवणे कर्तृकरणत्वाभावात्षष्ठी प्राप्ता न द्बाधिका तृतीया। प्रायेण बहुधा यज्ञं करोतीति याज्ञिकः। गोत्रेण गार्ग्यः गार्ग्यस्यापत्यं गार्ग्यः गर्गगोत्रमस्येत्यर्थः प्रातिपदिकार्थे प्रथमा प्राप्ता तद्बाधिका तृतीयात्र। समेन मार्गेण विषमेण मार्गेण सह गच्छतीत्यर्थः। समविषमाभ्यां कर्माभ्यां द्वितीया प्राप्ता तद्बाधिका तृतीयात्र द्वयोर्द्रोणयोः समाहारो द्विद्रोणं क्वचिन्नेति स्त्रीत्वाऽभावः। द्विद्रोणपरिमितधान्यमूल्यवाचको द्विद्रोणशब्दः द्रोणद्वयस्य द्रव्यस्य धान्यं क्रीणातीत्यर्थः सुखेन दुःखेन याति सुखं दुःखं यातीत्यर्थः दिवः करणस्य कर्मसंज्ञा वा स्यात् दिवुक्री ॥ ६ ॥ ॥६॥ ६ ॥ राम ७४

इद्दो अस्मकरणंवा कर्म भवति' असैः अस्मानुवादी व्यति' किंच सकर्म्मकत्वादक्षैर्देवयते देवदत्तो मैत्रेणेत्यत्र गतिबुद्धीत्यनेनन्नावपि कर्तुः कर्म्मत्वंन तुल्या
र्थयोगे' नोलनंतुला तुलया संमितस्तुल्यः एय प्रत्ययः णिनोवेति हृद्य भावः तुल्यार्थवाचकशब्दयोगे तृतीया वा स्यात् पक्षे संबंधे षष्ठी' तुलोपमाशब्दो वि
ना' उपमा तुल्ला वा हरेर्नास्तीति' तुल्यः सदृशः समः कृष्णेन कृष्णस्य वा ॥ फलप्राप्तौ कालाध्वनोरत्यंतसंयोगे तृतीया' अत्यंतं विराममति क्रांतो ऽत्यंतः अत्यंत।
श्चासौ संयोगश्चात्यंतसंयोगस्तस्मिन् अत्यंतसंयोगे' निरंतरसंनिकर्षे कालाध्ववाचकाभ्यां तृतीया स्यात् फलप्राप्तौ सत्यां' देवदत्तेनानुवाको ग्रंथविशेषो ऽह्ना
दिने यावन्निरंतरं क्रोशेन एक क्रोशं यावन्निरंतरं वाऽधीतः' कालाध्वनोरिति द्वितीया बाधिकेयं तृतीया निषिद्धाचारे प्रतिपाद्ये दाणः प्रयोगे चतुर्थ्यर्थे तृती

फलप्राप्तौ कालाध्वनोरत्यन्तयोगे तृतीया अह्ना क्रोशेन वाऽनुवाकोऽधीतः' फलप्राप्तौ किम्। मासमधीतो नायातः' अशिष्टव्यवहारे दाणप्र
योगे चतुर्थ्यर्थे तृतीया' दास्या संयच्छते कामुकः' धर्म्मेतु भार्य्यायै संयच्छति' नमआदियोगे चतुर्थी' नमो नारायणाय' एवं स्वस्तिस्वाहास्व
धा अलंवषट्योगे च। उपपदविभक्तेः कारकविभक्तिर्बलीयसी' नमस्करोति देवान्' प्रभ्वादियोगे षष्ठ्यपि' भोजनाय भोजनस्य वा प्र
भुस्समर्थः शक्तः' कृष्णाय कृष्णस्य वा' मद्रम्भद्रं कुशलम् सुखमायुष्यमर्थः प्रयोजनम्वा भूयात्॥

यास्यात्' दास्या संयच्छते कामी' धर्मेतु
भार्य्यायै संयच्छते' इति तृतीया ॥ ❀ ॥ नमआदियोगे चतुर्थी' संबंधसामान्ये षष्ठ्यां प्राप्तायां तद्बाधिका चतुर्थी' नारायणाय हरये नमोऽस्तु' प्रजाभ्यः स्वस्ति कल्याणं' अ
ग्नये स्वाहा' पितृभ्यः स्वधा' अलमिति समर्थार्थस्य ग्रहणं' हरिर्दैत्येभ्यो अलं समर्थ इत्यर्थः' इन्द्राय वषट्। ननु नमस्करोति देवानित्यत्र चतुर्थी स्यात्' नमः संबंधा
सत्वादुच्यते। उपपदविभक्तेः कारकविभक्तिर्बलीयसीति। उपपदं निमित्तं यस्याः सा उपपदनिमित्ता सा चासौ विभक्तिश्च उपपदविभक्तिः शाकपार्थिवादित्वा
न्मध्यपदलोपः' क्रियान्वयित्वं कारकत्वं कारकनिमित्ता विभक्तिर्बलीयसी बलिष्ठेत्यर्थः। क्रियान्वयित्वाद्देवानित्यत्र द्वितीया' प्रभ्वादियोगेष ६ ॥ ॥

स्पृहि प्रभु आयुष्य भद्र कुशल सुखार्थ हितार्थकाः प्रभ्वादयः। एषां योगे षष्ठी चतुर्थ्यौ भवतः। तत्रायुष्यादियोगे आशीर्वादेऽर्थे एव। आशीर्वादे किं देवदत्तस्यायुष्यमस्ति॥ ॥ रुच्यर्थधातुयोगे प्रीयमाणे रुचिर्दीप्तावपि दीप्तिस्तत्र न विवक्षिता इष्यत इत्युच्यते अन्यकर्तृकोऽभिलाषो रुचिः। रुचिरर्थो येषां ते रुच्यर्थाः रुच्यर्थाश्च ते धातवश्च रुच्यर्थधातवस्तेषां योगः रुच्यर्थधातुयोगस्तस्मिन् प्रीयते इति प्रीयमाणः प्रीञ् तर्पणे अस्मात्कर्मणि शानप्रत्ययः तस्मिन् प्रीयमाणे चतुर्थी भवति। हरिं प्रीणयतीत्यर्थे कर्मणि द्वितीयाप्राप्तौ चतुर्थी। हरिनिष्ठप्रीतेर्भक्तिः कर्त्री भक्तिरात्मविषयमभिलाषं हरेरुत्पादयतीत्यर्थः। प्रीयमाणे किं देवदत्ताय रोचते मोदकः पथि। श्लाघह्नुङ्स्थाशपां प्रयोगे बोधयितुमिष्टे श्लाघृ कत्थने ह्नुङ् अपनयने ष्ठा गतिनिवृत्तौ शप उपालम्भे एषां प्रयोगे बोधयितुं ज्ञाप

रुच्यर्थधातुभिर्योगे प्रीयमाणे हरये रोचते भक्तिः। श्लाघह्नुङ्स्थाशपां प्रयोगे बोधयितुमीप्सितः। गोपी स्मरात् कृष्णाय श्लाघते ह्नुते अवतिष्ठते शपते वा। धारेरुत्तमर्णे भक्ताय धारयति मोक्षं हरिः। स्पृहयतेरीप्सितः। पुष्पेभ्यः स्पृहयति

यितुमिष्टे वांछिते चतुर्थी स्यात्। गोपी स्मरात्कंदर्प्पात् कृष्णाय श्लाघते कृष्णं स्तौतीत्यर्थः। सर्वत्र कर्मणि द्वितीयाप्राप्तौ चतुर्थी। कृष्णाय ह्नुते सपत्नीभ्यो ह्नुतमर्थं कृष्णं बोधयतीत्यर्थः। कृष्णाय तिष्ठते स्थित्या स्वाभिप्रायं कृष्णं बोधयतीत्यर्थः। स्वाभिप्रायाविष्करणे नित्यं त्राख्यायामिति तिष्ठतेरात्मनेपदं। कृष्णाय शपते उपालम्भेन स्वाभिप्रायं कृष्णं बोधयतीत्यर्थः।। धारेरुत्तमर्णे धृङ् अवस्थाने ण्यन्तः धारयतेः प्रयोगे उत्तमर्णे चतुर्थी स्यात्। उत्तमर्णो धनस्वामी। अत्रोत्तमर्णो भक्तः हरिस्त्वधमर्णः अधमर्णस्तु ग्राहक इति भक्तेन पूर्वं भक्तिर्दत्ता तदर्थं हरिर्मोक्षं धारयति धृङोऽकर्मकत्वाद् गतिबुद्धीति सूत्रेणाऽण्यन्तावस्थाकर्तुर्ण्यन्तावस्थायां कर्मत्वं। अत्र च षष्ठीप्राप्तौ चतुर्थी विधीयते उत्तमर्णे किं देवदत्ताय शतं धारयति ग्रामे। स्पृहयतेरीप्सितः। स्पृहयतेः प्रयोगे ईप्सिते वांछिते चतुर्थी स्यात्। स्पृह ईप्सायां चुरादावदन्तः। कर्मणि द्वितीयाबाधिकेयं। मैत्रः पुष्पेभ्यः स्पृहयति। पुष्पाणि स्पृहय

क्रुधद्रुहेर्ष्याऽसूयार्थानां प्रयोगे यं प्रति कोपादयस्तत्र क्रुधक्रोधे द्रुह जिघांसायां ईर्ष्य ईर्ष्यायां असूयेति कंड्वादियगंतो धातुः एषामर्थ इवार्थो येषां धातूनां तेषां प्रयोगे यं प्रति यस्मिन्कोपादयः क्रियंते तत्र चतुर्थी स्यात् क्रोधोऽमर्षः जिघांसाऽपकारः ईर्ष्या परसंपत्त्यसहनं असूया गुणेषु दोषाविष्करणं क्रुधद्रुहोरकर्मकत्वात् योगे षष्ठी प्राप्ता चतुर्थी ईर्ष्याऽसूययोस्तु सकर्मकत्वाद्द्वितीयाप्राप्तौ चतुर्थी यं प्रति कोपादयः किम् भार्यामीर्ष्यति मैनामन्योऽद्राक्षीदिति हेतोः चतुर्थी बलिहितसुखरक्षितैः एभिर्योगे चतुर्थी स्यात् बलिः पूजोपहारकः ब्राह्मणाय बलिः हितं सुखं रक्षितं वा चशब्दादन्येष्वप्यनुक्तप्रयोगा ज्ञेयाः ॥ इति चतुर्थी ॥ ऋते आदियोगे पञ्चमी ज्ञानादृते विना मुक्तिर्न ऋते योगे द्वितीयापि ऋते द्वितीया चेति चान्द्रसूत्रोक्तत्वात् गृहादन्यो विहारः वनवनादृते अराद्दूरसमीपयोरित्यमरः दूरांतिक

क्रुधद्रुहेर्ष्यासूयार्थानां यम्प्रति कोपार्थादयस्तत्रं हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति इत्यादि। ऋतेन्यादियोगे पञ्चमी ऋते ज्ञानान्न मुक्तिः अन्यो गृहाद्विहारः आराद्वनात् इतरो ग्रामात् भिन्नः कृष्णात् पूर्वो ग्रामात् प्राग्ग्रामात् दक्षिणा ग्रामात् विना कृष्णात् पृथक् नाना वा उपाध्यायादधीते विद्यास्वीकारे पञ्चमी जनिकर्तुः प्रकृतिः जायमानस्य कार्यस्योपादानमपादानसंज्ञं स्यात् ब्रह्मणः प्रजाः प्रजायन्ते। यतश्चाध्वकालयोर्निर्माणं तत्र पञ्चमी पञ्चमीयुक्तादध्वनः प्रथमासप्तम्यौ कालात्सप्तमी॥

॥योगेषष्ठ्यपीति प्राप्ते

पंचमी ग्रामादितरः इतरस्त्वन्यनीचयोरित्यमरः। नीचार्थस्येतरस्य ग्रहणं न कृष्णाद्भिन्नोऽन्य इत्यर्थः एवं पूर्वदक्षिणादियोगे अंचूत्तरपदयोगे च पंचमी विना पृथक् नाना भियोगे द्वितीयाऽतृतीयापंचम्यो भवंति हिरुक् नाना च वर्ज्जने इत्यमरः विद्यास्वीकारे वक्तुः पंचमी भवति यथा उपेत्यास्मादधीयत इत्यपादाने घञ् उपाध्यायस्तस्मादुपाध्यायादधीते शिष्यः निःसरंतं शब्दं ततो गृह्णातीत्यर्थः। उत्पद्यमानस्य कार्यस्य हेतोः पंचमी यथा ब्रह्मणो धातुः प्रजाः प्रजायंते उत्पद्यंत इत्यर्थः ततउपक्रामंतीति निर्गच्छंतीत्यर्थो वा ब्रह्मा हिरण्यगर्भः स च हेतुरेव न पुनरुपादानं प्रजास्या संततौ जने इत्यमरः। यतश्चाध्वकालयोः परिच्छेदः क्रियते तस्मात्पंचमी भवति अध्व

सू॰ वि॰ टी॰ सु॰ ७९

प्रथमासप्तम्यौ कालवाचकात् सप्तम्येव वनात् ग्रामो योजनं योजने वा अग्रे हायनं यस्याः सा अग्रहायणी स्वार्थेऽण् कार्तिक्याः पूर्णमास्या आग्रहायणी मासे इति व
र्जनार्थयोरपपर्योर्योगे पंचमी यथा अप हरेः परि हरेः संसारः हरिं वर्जयित्वेत्यर्थः मर्यादार्थकाङ्योगे पंचमी यथा आमुक्तेः संसारः मुक्तिं मर्यादीकृत्येत्यर्थः ए
वमभिविध्यर्थकाङ्योगेपि पंचमी यथा आबालेभ्यो हरिभक्तिः बालानभिव्याप्येत्यर्थः प्रतिः प्रतिनिधिप्रतिदानयोः एतयोरर्थयोर्यः प्रतिस्तस्य योगे पंचमी स्यात् मुख्य
स्याऽभावेनान्य ईदृशो यउपादीयते स प्रतिनिधिः दत्तस्य प्रतिनिर्यातनं प्रतिदानं षष्ठीबाधिका पंचमीयं कृष्णात् प्रति कृष्णस्य सदृश इत्यर्थः तिलेभ्यः प्रतितिलानामा

वनाद्ग्रामो योजनं योजने वा कार्त्तिक्या आग्रहायणी मासे वर्ज्जनेऽपपरिभ्याम्पञ्चमी अपहरेस्संसारः परि हरेस्संसारः आमुक्तेस्सं
सारः । यतः प्रतिनिधिप्रतिदाने तत्र प्रतियोगे पञ्चमी प्रद्युम्नः कृष्णात्प्रति तिलेभ्यः प्रति यच्छति माषान् हेतौ तृतीयापञ्चम्यौ ।
जाड्याज्जाड्येन वा बद्धः स्तोकात्स्तोकेन वा मुक्तः दूरान्तिकयोर्योगे षष्ठ्यपि ग्रामस्य दूरादन्तिकाद्वा इत्यादि निर्द्धारणे षष्ठीसप्तम्यौ
क्रियागुणजातिसंज्ञाभिस्समुदायात्पृथक्करणं निर्द्धारणं यतस्ततः षष्ठीसप्तम्यौ क्रियापराणां क्रियापरेषु वा भगवदाराधकश्श्रे
ष्ठः गवां गोषु वा कृष्णा सम्पन्नक्षीरा नृणां नृषु वा ब्राह्मणश्श्रेष्ठः छात्राणां छात्रेषु वा मैत्रः पटुः स्वाम्यादियोगे षष्ठीसप्तम्यौ गवां गोषु वा स्वा
मी अधिपतिः ईश्वरः दायादः प्रसूतः प्रतिभूर्वा ॥

ददाति न मैत्रो माषान् यच्छति ददातीत्यर्थः भयहेतौ पंचमी भयार्थानां त्राणार्थानां च प्रयोगे भयहे
तोः पंचमी स्यात् षष्ठीबाधिकेयं मैत्रश्चौराद्बिभेति चौरात् त्रायते हेतौ तृतीयापंचम्यौ गुणे वर्तमानात् हेतुवाचकशब्दादस्त्रीलिंगात् तृतीयापंचम्यौ स्तः जडस्य भावो
जाड्यं तेन तस्माद्वा बद्धः स्तोकेन स्तोकाद्वा अनायासेन मुक्त इत्यर्थः गुणवाचकात् किं धनेन कुलं अस्त्रीलिंगात् किं बुद्ध्या मुक्तः तृतीयाप्राप्तौ पक्षे पंचमी विधीयते दूरा
न्तिकयोगे षष्ठ्यपि अनयोर्योगे षष्ठी भवति अपिशब्दात् दूरान्तिकार्थकेभ्यो नामार्थमात्रे द्वितीया तृतीया पंचमी सप्तम्यो भवन्तीत्यर्थः ग्रामस्य दूरं दूरेण दूरात् दूरे वा अ
न्तिकं अन्तिकेन अन्तिकात् अन्तिके वा इति पंच मी ॥ ॥ निर्द्धारणादियोगे षष्ठीसप्तम्यौ जातिगुणक्रियासंज्ञाभिः ॥ ६ ॥ ॥ ६ ॥ ६ ॥ ७९

समुदायादेकदेशस्य पृथक्करणं निर्द्धारणं नरस्तिसाध्यत्वेनास्येति स निर्द्धारणः। अङ्काविन्यऽप्रत्ययः। श्रेष्ठत्वादिः हेतुरित्यर्थः तस्याश्च निर्द्धारणादियोगे निर्द्धा
रणाश्रयात् नाम्नः षष्ठीसप्तम्यौ स्तः। यतो निर्धार्यते तेन न एवेत्यर्थः। इति षष्ठी। स्वाम्यादियोगे षष्ठीसप्तम्यौ। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैर्योगे षष्ठी
सप्तम्यौ स्तः। षष्ठीप्राप्तौ पाक्षिकसप्तम्यर्थं वचनं। दायादो सुतबान्धवावित्यमरः। गोषु प्रसूतः गा एवानुभवितुं जात इत्यर्थः। प्रतिभूः साक्षी॥ ॥ अनादराधि
के क्रियालक्षणे षष्ठीसप्तम्यौ। केवलभावलक्षणे सप्तम्येव। अनादराधिके तु षष्ठीसप्तम्यौ स्तः। रुदतो वा मैत्रः प्राव्राजीत्। रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानि
त्यर्थः। आयुक्तकुशलाभ्यां योगे षष्ठीसप्तम्यौ तात्पर्ये। तत्परस्य भावः तात्पर्यं तस्मिन् तात्पर्येऽर्थे। आभ्यां योगे षष्ठीसप्तम्यौ स्तः। हरिपूजने हरिपूजनस्य वा आ

अनादराधिके क्रियालक्षणे षष्ठीसप्तम्यौ। रुदति रुदतो वा प्राऽव्राजीत्। आयुक्तकुशलाभ्यां योगे षष्ठीसप्तम्यौ तात्पर्ये। आयुक्तः कुशलो
वा हरिपूजनस्य हरिपूजने वा। साधुनिपुणाभ्यां पूजायां सप्तमी। मातरि साधुर्निपुणो वा। प्रसितोत्सुकाभ्यां योगे तृतीयासप्तम्यौ। प्रसित
उत्सुको वा हरिणा हरौ वा। साध्वसाधुप्रयोगे सप्तमी। साधुः कृष्णो मातरि। असाधुर्मातुले। निमित्तात्कर्मयोगे सप्तमी। चर्म्मणि द्वीपिनं हन्ति
दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥१॥ ॥ युक्तो व्यापारित इत्यर्थः। तात्पर्ये किं आयुक्तो गौः शकटे ईषद्युक्त इत्यर्थः। साधु

निपुणाभ्यां पूजायां सप्तमी। निपुणेष्वभेकर्म्मणि। असमानाम्सुपधादिति कः। निपुणः साधुशब्दप्रयोगे तु पूजां विना साध्वसाधुप्रयोगे इति सप्तमी भवत्येव। पू
जायामाभ्यां योगे सप्तमी स्यात्। पूजायां किं निपुणो राज्ञो भृत्यः इह तत्त्वकथनेन तात्पर्यं प्रतिपर्यनुयोगे न सप्तमी। साधुर्निपुणो वा मातरं प्रतिपर्यनु वा। प्रसितोत्सुकाभ्यां
योगे तृतीयासप्तम्यौ। तत्परे प्रसितासक्तौ वित्यमरः। उत्सुकसाहचर्यात् प्रसितस्तत्परार्थक एव गृह्यते तेन प्रकर्षेण सितः प्रसितः शुक्ल इत्यर्थे न साध्वसाधुप्रयोगे सप्तमी। य
त्र पूजा न विवक्षिता किं तु तत्त्वकथनं तत्रापि सप्तमी भवति। एतदर्थं साधुग्रहणं। साधुनिपुणाभ्यामिति सूत्रे साधुग्रहणं तु पूजायां विवक्षितायां प्रत्यादियोगे सप्त
मी निवृत्त्यर्थमिति। निमित्तात्कर्मयोगे सप्तमी। कर्मणो योगः संबंधः कर्मयोगस्तस्मिन्कर्मयोगे। निमित्तात्मलात्सप्त ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ६ ॥

पू॰ सि॰ चं॰ टी॰ सु॰ ७७

मौ स्यात्' निमित्तशब्देन कारणग्रहणे तु जाड्येन बद्ध इत्यादावप्यतिप्रसंगः स्यादित्यर्थः अत्र हेतुतृतीयातादर्थ्ये चतुर्थी च प्राप्ता तन्निवारणार्थमिदं' मैत्रो द्वीपि
नं चित्रकं हन्ति' चर्मणि चर्मफलार्थं चर्मद्वीपिनोः समवायः संबंधः कुंजरं हंति दंतयोर्दंतफलार्थं दंतकुंजरयोः समवायः संबंधः' चमरीं गां हन्ति केशेषु केशफला
र्थं केशचमर्योः समवायः संबंधः' मैत्रेण पुष्कलको गंधमृगो हतः सीम्नि अंडकोशफलार्थं अर्थं वा पुष्कलकः शंकुर्हतो निहितो निखात इत्यर्थः सीम्नि सी मत्तापनार्थं सीमपुष्क
लयोः संयोगसंबंधः। अथ पुष्कलको गंधमृगे स्यात् पणकीलयोरिति मेदिनी' सीमा घारस्थितिक्षेत्रेष्वंडकोशेषु च स्त्रियामिति मेदिनी॥ ॥क्तस्येन्विषयस्य कर्मणि' इन्न
न्तस्य क्तस्य कर्मणि सप्तमी स्यात्' द्वितीयाबाधिका सप्तमी' अधीतमनेनेत्यधीती व्याकरणे भावे क्तप्रत्ययस्ततः इष्टादिभ्यश्च इति कर्तरीन्' प्रत्यये कृते पश्चाद्गुणभूतक्रियाया
संबंध्यमानं व्याकरणमनुक्तं कर्म ॐ इति सप्तमी॥ पुनश्चतुर्थीमाह' तादर्थ्ये चतुर्थी तस्मै कार्याय इदं तदर्थं तदर्थस्य भावस्तादर्थ्यं भावे तत्वयण इति यण्' कृत्तद्धितस

क्तस्येन्विषयस्य कर्मणि' अधीती व्याकरणे' तादर्थ्ये चतुर्थी' संयमाय श्रुतं धत्ते नरो धर्माय संयमम्। धर्मं मोक्षाय मेधावी धनं दानाय भुक्तये॥१॥
तुमोऽप्रयुक्तस्य कर्मणि' फलेभ्यो याति। क्यब्लोपे कर्मण्याधारे च पञ्चमी' हर्म्यात्प्रेक्षते आसनात्प्रेक्षते'

((मासेभ्यः संबंधाभिधानं भावप्रत्ययेनेति सिद्धं
तस्तनो यण् प्रत्ययेन संबंध उच्यते स च संबंधोऽनेकधा' न तु कार्यकारणभाव एव' तेन ब्राह्मणाय दधीत्यादौ चतुर्थी सिद्धेति मैत्रः श्रुतं शास्त्रं धत्ते कस्मै संयमाय' संय
मं धत्ते कस्मै धर्माय' मेधास्ति यस्य स मेधावी बुद्धिमान् धर्मं धत्ते कस्मै मोक्षाय' धनं धत्ते कस्मै दानाय त्यागाय भुक्तये भोगाय चेति' तुमोऽप्रयुक्तस्य कर्मणि' क्रियावाचक
प्रकृतिकमुपपदं यस्य तस्याप्रयुज्यमानस्य तुमंतस्य कर्मणि चतुर्थी भवति' द्वितीयाबाधिकेयम्' फलेभ्यो याति फलान्याहर्तुं यातीत्यर्थः' एवं स्वयंभुवे नमस्कृ
त्य स्वयंभुवमनुकूलयितुमित्यर्थः' पुनः पंचमीमाह। क्यब्लोपे कर्मण्याधारे पंचमी' क्यबंतस्य गम्यमानार्थत्वादप्रयोगे कर्मणि आधारे च पंचमी स्यात्' क्यबग्रहणमि
ह क्यबर्थपरं' तेन ल्यबपि गृह्यते प्रासादात्प्रेक्षते प्रासादमारुह्य प्रेक्षत इत्यर्थः आसनात्प्रेक्षते आसने उपविश्य प्रेक्षत इत्यर्थः आसने स्थित्वा वा' पुनः षष्ठीमाह ॥ ॥ ए॰ म॰ ७७

कर्तृकार्ययोरक्तादौ कृति षष्ठी हृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् 'क्तादीन् विना कृत्स्नेन क्रियन्ते इति कृत्स्नस्य कृतिः क्तिरिति स्त्रियां भावेऽर्थे ऽक्तिः । जगतः करोतीति जगतः कर्ता कृत्स्नः तृवुणाविति कर्तरि तृ प्रत्ययः 'कर्तृकार्ययोः किं 'शस्त्रेण भेत्ताऽकरणे मा भूत् 'कृतीति किं 'कृतपूर्वी कटमत्र न हि तेमा भूत् 'कृतं पूर्वमनेनेति कारकादिति कर्तरीनिः गुणकर्मणि वा 'अमुष्य कर्मणि वा षष्ठी स्यात् अक्तादौ कृति नेता ऽश्वस्य ग्रामं ग्रामस्य वा 'कर्तरि तृ प्रत्ययः 'ग्राममिति गौणकर्म उभयप्राप्तौ कृति कर्तरि षष्ठी न 'उभयोः कर्तृकर्मणोः प्राप्तिर्यस्मिन् स उभयप्राप्तिस्तस्मिन्नुभयप्राप्तौ कृत् प्रत्यये कर्तरि षष्ठी न स्यात् 'कर्तृषष्ठीनिषेधकमिदं 'कर्मणि षष्ठी तु कर्तृकार्ययोरनेनैव 'आगोपेन गावो दुह्यन्ते दोहः इति भावे घञ् 'स्त्रीप्रत्यययोरकाकारयोर्योगे नोक्तं स्त्रियां क्तिरित्यधिकारे कृत्तयोरकाकारयोर्योगे कर्तरि षष्ठी

कर्तृकार्ययोरक्तादौ कृति षष्ठी कर्तरि कार्ये च षष्ठी क्तादिवर्जिते कृति प्रयुज्यमाने 'कृत्स्नस्य कृतिः जगतः कर्ता कृत्स्नः 'गुणकर्मणि वा 'नेता ऽश्वस्य ग्रामं ग्रामस्य वा 'उभयप्राप्तौ कृति कर्तरि षष्ठी न 'आश्चर्यो गवां दोहोऽगोपेन 'स्त्रीप्रत्यययोरकाकारयोर्योगे नोक्तम् 'भेदिका विभित्सा वा रुद्रस्य जगतः 'शेषे कृति वा 'शब्दानामनुशासनमाचार्येण आचार्यस्य वा । वर्तमानाधारार्थक्तस्य योगे षष्ठी 'राज्ञां मतः 'बुद्धः पूजितो वा इदमेषामाशयितम् 'क्तादौ तु कुर्वन् कुर्वाणः ॥ ६ ॥

रेनेति 'पूर्वोक्तं न प्रवर्तत इत्यर्थः । भेदनं भेदिका धात्वर्थनिर्देशे वुण् वक्तव्य इति वुण् 'युवोरनाकावित्यकादेशः 'स्त्रियामावत इत्याप् 'प्रत्ययस्थात् इतीत्वं 'भेत्तुमिच्छा विभित्सा भिदेः सन् प्रत्यये नानिटि सेट् इति न गुणः प्रत्ययान्तात् स्त्रियामङ् 'इत्यङ् ततः आप् 'रुद्रेण जगत् भिद्यते इति भेदिका रुद्रस्य जगतः 'भावे वुण् 'रुद्रेण जगत् विभित्स्यते इति विभित्सा रुद्रस्य जगतः भावेऽङ् 'शेषे कृति वा शेषेऽकाऽकारभिन्ने कृन्मात्रप्रत्यये उभयप्राप्तौ कर्तरि षष्ठी वा स्यात् 'आचार्येण शब्दा अनुशिष्यन्तेऽनेनेति शब्दानामनुशासनमाचार्येणाचार्यस्य वा साधनाधारयोरिति करणे ल्युट् 'वर्तमानाधारार्थक्तस्य योगे षष्ठी 'वर्तमानार्थस्याधिकरणवाचिनश्च क्तस्य योगे कर्तरि षष्ठी स्यात् 'अक्तादाविति निषेधस्यापवादोऽयं विधिः 'राज्ञां मतः 'ञीता मितिमतिबुद्धिपूजार्थेभ्यो ॥

पू॰
सि॰ चं॰
टी॰ उ॰
७८

वर्त्तमाने कर्म्मणि क्तः पूजितो यः सुरासुरैरित्यादौ तु भूते क्तो बोध्यः। इदमेषां शयितमासितं भुक्तं वा स्थैर्यगतिभक्षणार्थेभ्य इत्यधिकरणे क्तः क्तादय उच्यन्ते कर्तृक
र्मणोः षष्ठीबाधकाः हरिः सुखं कुर्वन् कुर्वाणः शतृशानौ नेति पूतेवदिति शतृशानौ॥ ❁ ॥ चकृवान् चक्राणः क्वसुकानौ णवेवदिति क्वसुकानौ चक्रिः आदृतः किरि
भूते इति किः मैत्रो हरिं दिदृक्षुः सोनान्नाश्नन्निति सिन्ध्र उरिसुः अलंकरिष्णुः इष्णुसुक्नु इति शीले इष्णुः हरिर्दैत्यान् घातुकः घाको कण इत्युकण् कृत्कर्त्तरीति क
र्त्तरि प्रत्ययाः एते जगत् सृष्ट्वा पूर्वकाले क्त्वेति क्त्वा सुखं कर्तुं तुमुन्नदर्शायां भविष्यतीति तुमुं विष्णुना दैत्या हता हरिर्दैत्यान् हतवान् क्तक्तवतू इति क्तक्तवतु प्रत्ययौ।
हरिणा प्रपंच ईषत्करः ईषदुःसुषु खल् प्रु इति खल् मैत्रः सोमं पवमानः आत्मानं मंडयमानः मडि भूषायां ताच्छील्यवयोवचनशक्तिषु चानश् इत्यानश् मैत्रो वेदम

चकृवान् चक्राणः चक्रिर्वा सुखं हरिः हरिं दिदृक्षुः अलंकरिष्णुर्वा दैत्यान् घातुको हरिः जगत्स्रष्टा सुखं कर्तुम् विष्णुना हता दैत्याः दैत्या
न् हतवान् हरिः ईषत्करः प्रपंचो हरिणा सोमं पवमानः आत्मानं मण्डयमानः वेदमधीयन् कर्ता लोकान् द्विषश्शत्रुर्वा मुरस्य मुरं वा द्विषन्
भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थस्येनश्च योगे षष्ठी न सतः पालकोऽवतरति व्रजं गामी शतं दायी
॥ धीयन् इङ्धार्योः शत्रकृच्छ्रिणि कर्तरि शतृ इति

शतृप्रत्ययः हरिर्लोकान् कर्ता शीले तृन्निति तृन् द्विषः शत्रुर्वा द्विष अप्रीतौ इत्यस्मात् द्विषः शत्रौ वेति सूत्रेण विहितो यः शतृप्रत्ययस्तस्य योगे कर्म्मणि वा षष्ठी
स्यात् क्तादिष्वनित्यं निषेधे प्राप्ते विकल्पार्थमिदं अक्तादावित्यपि निषेधस्तु कारकषष्ठ्या एवानेनरस्य विधिर्वा प्रतिषेधो वेत्याग्यान् संबंधे षष्ठी तु स्यादेव ब्रा।
ह्मणस्य कुर्वत्कारकस्य जिष्णुरित्यादि एवं च आश्रयोगवांदोहो अगोपेनेत्यत्र संबंधविवक्षायां कर्तर्यपि षष्ठी भवतीति बोध्यं भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थ
स्येनश्च योगे षष्ठी न तुमर्थे ण्वुल् इति भविष्यत्यर्थेपि ण्वुल् प्रत्ययो भवति युवोरनाकावित्यकादेशः तस्य भविष्यदर्थकस्याकस्य योगे कर्मणि षष्ठी न स्यात् यस्तु कालसा एम
मान्ये तृण्वुलाविति ण्वुल् तत्र न निषेधः यथा ओदनस्य पाचकः देशानां दर्शकः आवश्यकाधमर्ण्ययोर्णिनिरित्यादिना इनिप्रत्ययो भविष्यत्यर्थे आधमर्ण्यार्थे च हृ॰। ७८

भवतिनस्ययोगेचकर्म्मणिषष्ठीनसतइतिशतृप्रत्ययांतं'सज्जनान्पालयिष्यतीतिपालकः'भविष्यत्यर्थेवुण्'गमिष्यतीतिगमीभविष्यत्यर्थेणिनिः'ददातीति।
दायीअधमर्णोग्राहकः अधमर्णस्यभावआधमर्ण्यंतस्मिन्नाधमर्ण्येणिनिः'कृत्यानांकर्त्तरिवा'कृत्यसंज्ञकप्रत्ययानांयोगेकर्त्तरिषष्ठीवास्यात्।कर्तृकार्ययोरितिनि
त्येप्राप्तेविकल्पार्थमिदं'हरिर्मयाममवासेव्यः'षेङ्सेवायामस्मात्ऋहलोर्ण्यदितिकर्म्मणिण्यत्'कर्त्तरिकिं'माणवकःसाम्नांवेदानांगेयः'खराद्यइतिकर्त्तैवि
प्रत्ययविधानात्तव्यत्कर्मतव्याऽनीयण्यत्यक्यप्एतेपंचकृत्यप्रत्ययाः॥॥उभयप्राप्तौकृत्येषष्ठीन'कर्त्तरिकर्मणिचप्राप्तौसत्यांकृत्यप्रत्यययोगेउभयत्रषष्ठी
नस्यात्उभयप्राप्तौकृतीतिसूत्रेणकर्त्तरिषष्ठीनिषेधेसिद्धेकर्मणिषष्ठीनिषेधार्थमिदं'गुणकर्म्मणिवेतिसूत्रंउभयप्राप्तिरहितस्थलेनेताग्रामंग्रामस्यवाश्वस्ये

कृत्यानांकर्त्तरिवाषष्ठी।मयाममवासेव्योहरिः॥॥उभयप्राप्तौकृत्येषष्ठीन।नेतव्याव्रजंगावःकृष्णेन।दूरान्तिकार्थयोगेषष्ठीपंचम्यौ।दूरंनि
कटंवाग्रामस्यग्रामाद्वा।दूरान्तिकार्थेभ्योद्वितीयातृतीयापञ्चमीसप्तमी।ग्रामाद्दूरंदूरेणदूरात्दूरेनिकटस्वा'द्यूतार्थस्यक्रयविक्रयरूपव्य
वहारार्थस्यचदिवःकर्म्मणिषष्ठी।शतस्यदीव्यति'वोपसर्गस्य।शतस्यशतंवाप्रतिदीव्यति।षष्ठीहेतुप्रयोगे'अन्नस्यहेतोर्वसति।सर्व्व
देर्हेतुप्रयोगेहेतौघोत्येचतृतीयाषष्ठ्यौ।केनहेतुनावसतिकस्यहेतोः॥

त्यादौचरितार्थबोध्यं'दूरान्तिकार्थयोगेषष्ठीपंचम्यौषष्ठ्यांप्राप्तायांप
क्षेपंचम्यर्थंवचनं'द्यूतार्थस्यक्रयविक्रयरूपव्यवहारार्थस्यचदिवःकर्मणिषष्ठी'द्यूतमर्थोयस्यसद्यूतार्थस्तस्यद्यूतार्थस्यक्रयश्चविक्रयश्चक्रयविक्रयौक्रयवि
क्रयौरूपंयस्यसःक्रयविक्रयरूपःक्रयविक्रयरूपश्चासौव्यवहारश्चक्रयविक्रयरूपव्यवहारःक्रयविक्रयरूपव्यवहारोऽर्थोयस्यसःक्रयविक्रयरूपव्यवहारा
र्थस्तस्यक्रयविक्रयरूपव्यवहारार्थस्यचदिव्धातोःकर्मणिषष्ठीस्यात्'द्यूतार्थेत्यादिकिं'ब्राह्मणंदीव्यतिस्तौतीत्यर्थः'वोपसर्गे'उपसर्गपूर्वकस्यदिवःकर्म्मणिवाष
ष्ठीस्यात्पूर्वसूत्रापवादः'षष्ठीहेतुप्रयोगे'हेतुशब्दप्रयोगेषष्ठीस्यात्'हेतुशब्देच'हेतौतृतीयायांप्राप्तायामनेनषष्ठीसर्वादेर्हेतुप्रयोगेहेतौघोत्येतृतीयाषष्ठ्यौसर्वादि

निमित्तपर्यायप्रयोगे सर्वासां विभक्तयोऽस र्वादेस्तृतीयादयः सर्वादेर्निमित्तपर्यायप्रयोगेसर्वाविभक्तयः स्युः। असर्वादेस्तु प्रथमाद्वितीयेन स्तोऽन्याः स्युः षष्ठीहेतुप्रयोगे
सर्वादेर्हेतुप्रयोगे इति च सूत्रद्वयं गतार्थं बोध्यं अन्योक्ते प्रथमा कार्ये द्वितीया स्यात् अन्योक्ते कार्ये तु प्रथमा कर्तरि तृतीया अन्योक्ते कर्तरि प्रथमा करणे तृतीया अन्योक्ते क
रणे प्रथमा संप्रदाने चतुर्थी अन्योक्ते संप्रदाने प्रथमा अपादाने पंचमी अन्योक्ते अपादाने प्रथमा संबंधे षष्ठी अन्योक्ते संबंधे प्रथमा अधिकरणे सप्तमी अन्योक्ते अ
धिकरणे प्रथमा आख्यातोक्ते यथा घटः क्रियते मैत्रेण आख्यातिक कर्मणा यानं यक् चतुर्ष्विति यक् हरिः सुखं करोतीति कर्तरि पंचेति कर्तरि परस्मैपदं तनादेरु वितु पकृदु
क्ते यथा कृष्णः कं संहतवान् क्तक्तवतू इति कर्तरि क्तवतुः कृष्णेन कंसो हतः कर्मणि क्तः पच्यतेऽनेनेति पचनोऽग्निः साधनाधारयोर्युडिति करणे युट् दीयतेऽस्मायिति दानीयः

निमित्तपर्यायप्रयोगे सर्वादेस्सर्वविभक्तयोऽसर्वादेस्तृतीयादयः। को हेतुः किं प्रयोजनम्। कं हेतुम्। केन हेतुना। ज्ञानेन निमित्तेन हरि
स्सेव्यः। ज्ञानाय निमित्ताय। अन्योक्ते प्रथमा आख्यात कृत्समास तद्धित निपातोक्ते कारके सम्बन्धे च प्रथमा स्यात्। घटः क्रियते। हरिः करोति। कृष्णः
कंसं हतवान्। कृष्णेन कंसो हतः। पचनोऽग्निः दानीयो विप्रः। उपाध्यायः। पचनी स्थाली। प्राप्तानन्दः। ऊढरथः। उपहृतपशुः। उद्धृतौदना। पीता
म्बरः। वीरपुरुषः। कौङ्कुमम्। माथुरः। धनवान्। दृषद्वती। विषवृक्षोऽपि सम्बर्ध्य स्वयं छेत्तुमसाम्प्रतम् इति। श्रीमारस्वतादरद्व्यबोधिसः॥ ॥ इति
((त्रिविभक्त्यर्थाः

तव्यानीयाविति संप्रदानेऽनीयः उपसमीपे गत्वाधीयतेऽस्मादित्युपाध्यायः संज्ञायामकर्तरि चेत्यपादाने घञ् पच्यतेऽस्यामिति पचनी साधनाधा
रयोरित्यधिकरणे युट् स्थाली हंडिका समासोक्ते यथा प्राप्त आनंदो यं स प्राप्तानंदः उढो रथो येन स ऊढरथोऽनड्वान् वृषभः उपहृतः पशुर्यस्मै स उपहृतप
शुः रुद्रः उद्धृतमन्नं यस्मात्स उद्धृतान्नः कटाहः पीतमंबरं यस्य स पीतांबरो हरिः वीराः पुरुषा यस्मिन् स वीरपुरुषो ग्रामः तद्धितोक्ते यथा कुंकुमेन रक्तं वस्त्रं कौङ्कु
मं तद्धितेनोक्तं कर्म अण् प्रत्ययः मथुराया आगतः माथुरः अण् धनमस्यास्तीति धनवान् मांतोपधाद्वित्विनो इति वतुः दृषद उपलाः संत्यस्यामिति दृषद्वती भूम्निः
निपातोक्ते यथा विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतमित्यत्र संवर्ध्येति भावे क्यप् क्यबंतस्य क्रियापदस्य विषवृक्षमिति द्वितीयांतं कर्म तत्रासाम्प्रतमित्यनेन निपा

तेनोक्तत्वात् प्रथमा स्वयमात्मना छेत्तुमसांप्रतं नयुज्यते इत्यर्थः' कुमारः सुनारद इत्यबोधि सः' अबोधीत्यत्र दीपजनबुधेति कर्त्तरीण्' तस्य नारदमिति द्वितीयांतं
कर्मेतत्र इतिनिपातयोगात्प्रथमा' उक्तं च' यस्मिन्नर्थे विधीयंते लकारास्तद्धिताः कृतः' समासोवा भवेद्यत्र स उक्तः प्रथमानतः ॥ ॥ इति कारक प्रक्रिया ॥ ॥ समास
स्यान्वयेनाम्नां' नाम्नो च नामानि च नामानि तेषां नाम्नां' यद्यप्यविभक्तिनामेति संकेतितं तथाप्यत्र नाम्नामिति विभक्त्यंतानामेव ग्रहणं समासप्रत्यययोरलुक् क्वचिदि
त्यादिज्ञापकात्' अत्र विधिरिति शेषः प्रथमाद्यंतानां पदानां परयोर्वाऽन्वये सति यो विधिः स समाससंज्ञो भवति चकारस्त्वनुक्तसमुच्चयार्थस्तेन पदानामन्वये सत्ये वकृ
त्तद्धितधातुसंज्ञाप्रयोजक प्रत्यया अपि भवंति समानि एकभूतानि पदानि अर्थावाऽऽसते यस्मिन्स समासः आस उपवेशने अस्माद्धाधारे घञ्' १ सममेकमर्थमास
यंति दीपयंत्यस्मिन्समुदाये इति वा समासः' असदीप्तौ' न्यंतात् स्मात्स्वरादइत्याधारे प्रत्ययः २ संश्लिष्टानि एकीभूतानि पदानि अस्यंते उच्चार्यंते ऽस्मिन्निति वा समा

समासस्यान्वयेनाम्नाम्' नाम्नामन्वये सति समासो भवति ॥ चकारात्कृत्तद्धित धातुसञ्ज्ञाप्रयोजक प्रत्यया अपि ॥ ॥ सः आधारे घञ् ३

समानां संश्लिष्टानां पदानामेकतामापन्नानामसनमुच्चारणमिति वा समासः' भावे घञ् ४ समसनं समासो वा संपूर्वात् असते भावे घञ् अनेकपदस्य एकपदीभव
नमित्यर्थः ५ समस्यते इति वा समासः संज्ञायामकर्त्तरि चेति कर्मणि घञ् ६ अनुस्यंते मध्येयंति पदार्था यस्मिन्नर्थे इत्यन्वयः इण् गतौ वस्मात् स्वरादइत्यऽप्र
त्ययः अनु अंतः पदार्थानामयनं गमनमिति वाऽन्वयः' अनुसहायत्वेनयंति संबन्धं लभंते पदानि यस्मिन्निति वान्वयः स्वरादइत्याऽऽधारेऽप्रत्ययः अनुसहायत्वे
न ईयंते संबध्यंते पदान्यस्मिन्निति वान्वयः व्यपेक्षालक्षण इति सोन्वयो द्विधा व्यपेक्षालक्षणः एकार्थीभावलक्षणश्चेति' तत्र व्यपेक्षालक्षणे विग्रह
वाक्यमेव एकार्थीभावलक्षणे तु वृत्तिरेव' तत्र स्वार्थपर्यवसायिनां पदानामाकांक्षासंनिधियोग्यत्वेषु सत्सु यः परस्परसंबंधः स व्यपेक्षालक्षणः विशिष्टकार्ये
रूपः एकार्थीभावलक्षणः विशेषेण गृह्यते ज्ञायते ऽर्थोऽनेनेति विग्रहः' विग्रहस्य वाक्यं विग्रहवाक्यम् विग्रहवाक्यमपि द्विधा लौकिकमलौकिकं चेति

प्रयोगार्हं परिनिष्ठितं साधु लौकिकं यथा राज्ञः पुरुष इति व्यपेक्षालक्षणः संबंधो ह्यत्रैव अपरिनिष्ठितं प्रयोगानर्हमसाधु अलौकिकं यथा राजन् ङस् पुरुष सु इति समाससंज्ञादिकं चास्मिन्नेव प्रवर्त्तते इति परार्थाभिधानं वृत्तिः परः स्वार्थाद् अन्यो योऽर्थः स परार्थः अथवा सस्मात् परस्य शब्दस्य योऽर्थः स परार्थः तस्याभिधानं प्रतिपादनं परार्थाभिधानं सा वृत्तिः कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपा इति पंच वृत्तयः वृत्तिरपि द्विधा जहत्स्वार्थाऽजहत्स्वार्था चेति जहति स्वार्थं पदानि यस्यां सा जहत्स्वार्था उक्तं च वृत्तौ वर्त्तिपदानामानर्थक्यं पदे वर्णवदिति यथा वृषभ इत्यत्र वृषशब्दः सुकृतादेर्वाचकः भशब्दस्तु नक्षत्राणां वाचकः वृषभपदं तु बलीवर्दे शक्तं शक्ता वयवानामानर्थक्यं एवं कंबलशब्दे को वाय्वादेर्वाचकः बो वरुणवाचकः लः पृथिवीवाचकः कंबलपदं ग्रासे शक्तं शक्तौ तेषामानर्थक्यं तथा राजपुरुषशब्दयोः पृथक् शक्तयोरपि राजसंबंधिनि पुरुषे शक्तिस्तत्र राजपुरुषशब्दयोरानर्थक्यं नतदन्याजहत्स्वार्था॥ ॥ पूर्वेऽव्ययेऽव्ययीभावः अव्ययपूर्वपदे

पूर्वेऽव्ययेऽव्ययीभावः अव्ययपूर्वपदे सति योऽन्वयस्सोऽव्ययीभावसञ्ज्ञकस्समासो भवति समासप्रत्यययोः समासे वर्त्तमानाया विभक्तेः प्रत्यये च परे लुग्भवति। नामत्वात्स्यादिः। स नपुंसकम् अव्ययीभावो नपुंसकलिङ्गो भवति। नपुंसकस्येति ह्रस्वः॥ ६॥ ६॥

सति पदयोर्योऽन्वयः एकार्थीभावलक्षणः सोऽव्ययीभावसंज्ञकः समासोऽस्तिपूर्वग्रहणादेवाव्ययस्य पूर्वनिपातो व्ययीभावे अन्यथाऽव्यये इत्येव सिद्धे किं तेन समासप्रत्यययोः प्रतीयते कर्तृकर्मादयर्थोऽनेनेति प्रत्ययः इण् गतावस्मात् स्वरादच् इत्यप्रत्ययः अथवा अय गतावस्मात् पचाद्यच् प्रत्यये प्रत्ययेते प्रत्याययत्यर्थमिति प्रत्ययः अन्तर्भावितण्यर्थे समासश्च प्रत्ययश्च समासप्रत्ययौ तयोः भावे सप्तमी यं समासे सति प्रत्यये च सति वर्त्तमानायाः स्यादि रूपाया विभक्तेर्लुग् स्यात् ततः कृत्तद्धितसमासाश्चेति नामसंज्ञायां स्याद्युत्पत्तिर्भवतीत्यर्थः सनपुंसकं तच्छब्देन संनिहितोऽव्ययीभावः परामृश्यते स्त्रीच पुमांश्च स्त्रीपुंसौ न स्त्रीपुंसाविति नपुंसकं स्त्रीपुंसशब्दस्य नपुंसकभावः सहादित्वात् निपात्यते नपुंसकत्वान्नपुंसकस्येति ह्रस्वविधानं ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ६ ॥ ६ ॥ एम॰ ८०

अव्ययीभावात् ननु अनव्ययमव्ययं भवतीत्यव्ययीभावः अभूततद्भावे इति च्विः ज्वलादेर्ण इति भवतेर्णप्रत्ययः' अथवा अनव्ययस्य अव्ययत्वेन भवनमस्मिन्ने
त्यर्थी भावे इति अव्ययीभावः भावे आधारे वा घञ्' एवमन्वर्थसंज्ञाविज्ञानात् अव्ययादिति लुक्प्राप्तिरस्त्येव किमर्थमेतत्' मैवं तत्पुरुषादिसंज्ञावदस्या अन्व
र्थत्वाभावात् नन्वेतु योगविभागो मास्तु' अव्ययीभावादतोऽमनत इत्येकयोग एवास्तु' लुगनु अव्ययादित्यनेन सिद्ध एव' अतो योगविभाग एव ज्ञापयत्यत्रान्वर्थसं
ज्ञा नास्तीति अस्माद्विभक्तेर्लुक् स्यात्' अथ पाणिनिसूत्रम् अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्य
सादृश्यसंपत्तिसाकल्यान्तवचनेषु' विभक्त्यादिष्वर्थेषु विद्यमानमव्ययमन्वये सति सुबन्तेन नाम्ना सह समस्यते' विभक्त्यर्थेऽव्यये यथा' स्त्रियामित्यधिस्त्रि लो

अव्ययीभावात् विभक्तेर्लुक्' अधिस्त्रि। अतोऽमनतः' अदन्तादव्ययीभावाद्विभक्तेर्लुगं तस्य अमादेशः' कुंभस्य समीपमुप
कुम्भम्। वाटाङ्ग्योः' अदन्तादव्ययीभावाट्टाङ्ग्योरम्वा' उपकुम्भम् उपकुम्भेन वा कृतम् उपकुम्भम् उपकुम्भे वा निधेहि' अनतः किम्
उपकुम्भात् मद्राणां समृद्धिः सुमद्रम्' यवनानां व्यृद्धिर्दुर्यवनम्

॥ किक विग्रहवाक्यमिदं' सप्तम्यर्थस्य द्योतकोऽधिः स्त्री ङि अधि इत्यलौकिकं वि
ग्रहवाक्यं' अत्र निपातेनोक्तेऽप्यधिकरणे समासविधानसामर्थ्यात्सप्तमी' अन्ये तु स्त्रियामधिकृत्येति व्याख्यानेन तदसत् अधिहरीत्यत्राधिकृत्येत्यर्थस्याऽप्रतीतेः।
क्रमात् सुनारद इत्यबोधि स इत्यादौ समासो न' इति शब्दस्य प्रकृतपरामर्शकत्वेन कर्मत्वमात्राऽनभिधायकत्वात्। एवं च विभक्तिशब्दः सप्तम्यां पर्यवस्यति समीपा
र्थेऽव्यये यथा' कुम्भस्य समीपमिति उपकुम्भम्' समया ग्रामं निकषा लंकां' आराद्वनादित्यत्र तु नाव्ययीभावः विनादियोगे द्वितीयेति' ऋतेआदियोगे पञ्चमीति च
विधानसामर्थ्यात्। अतोऽमनतः' विशेषणत्वात्तदन्तविधिः अदन्तादव्ययीभावात् अनत इति षष्ठी न अत् अनत् तस्मात् अनतो विभक्तेरमादेशः स्यात्' वाटाङ्ग्योः' क्व
चिद्भवति क्वचिन्न भवतीयं व्यवस्थितविभाषा तस्या आश्रयणात्' समुद्रं उन्मत्तगंगमित्यादौ सप्तम्या नित्यमेवाम्· समृद्ध्यर्थे यथा ऋद्धेराधिक्यं समृद्धिः

मद्राणां देशविशेषाणां समृद्धिः सुमद्रम् उत्तरपदार्थः

प्राधान्ये तु न तत्पुरुषोपि भवति सम्भृद्धा मद्रा इति सुमद्राः ऋद्ध्यर्थे यथा विगताऋद्धिर्व्यृद्धिः यवनानामृद्धिरिति दुर्यवनं इह तेषामृद्ध्यभावे समासः ॥ ॥ अर्थाभावे यथा मक्षिकाणामभाव इति निर्मक्षिकं संसर्गाऽभावेऽयं समासः अत्ययेयथा हिमस्यात्ययो ध्वंस इति अतिहिमं असंप्रत्यर्थे यथा संप्रतीत्यव्ययमिदानीमीत्यर्थे भुजिक्रियांतर्भावेण नञ्समासः सौत्रो बोध्यः निद्रा संप्रति न युज्यत इत्यतिनिद्रम् शब्दप्रादुर्भावे यथा हरिशब्दस्य प्रकाश इति इति हरि षष्ठ्यं तेन हरिशब्दे न सह प्रकाशार्थस्येति शब्दस्य समासः पश्चादर्थे यथा विष्णोः पश्चादिति अनुविष्णु पश्चाच्छब्दस्य तु नायमव्ययीभावो भवति ततः पश्चात् स्रंसने इति भाष्यप्रयोगात् । सति चात्राव्ययीभावे पश्चाच्छब्दस्य पूर्वनिपातः स्यादित्यर्थः यथार्थे यथा । योग्यता वीप्सा पदार्थानतिवृत्तिसादृश्यानि यथार्थाः तत्रानुरूपतो योग्यतारू

मक्षिकाणामभावो निर्मक्षिकम् हिमस्यात्ययोऽतिहिमम् निद्रा सम्प्रति न युज्यते इत्यतिनिद्रम् हरिशब्दस्य प्रकाश इति हरि विष्णोः पश्चादनुविष्णु रूपस्य योग्यमनुरूपम् अर्थमर्थम्प्रति प्रत्यर्थम् शक्तिमनतिक्रम्य करोतियथाशक्ति हरेस्सादृश्यं सहरि सहादेस्सादिरिति सहस्य सः ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् चक्रेण युगपत्सचक्रम् सदृशस्सख्या ससखि क्षत्राणां सम्पत्तिस्सक्षत्रम् । तृणमप्यपरित्यज्य सतृणमत्ति अग्निग्रन्थपर्यन्तमधीते साग्नि ।

पस्य योग्यमिति अनुरूपं पदार्थानां व्याप्तुमिच्छा वीप्सा अर्थमर्थं प्रतीतीत्यर्थे समासे वीप्सायामनभावान्न द्विः । वीप्सार्थक प्रतियोगे द्वितीया विधानात् वाक्यमपि पदार्थाऽनतिक्रमः पदार्थानतिवृत्तिः शक्तिमनतिक्रम्येति यथाशक्ति हरेः सादृश्यमिति वस्यमाणेन सहादेः सादिरित्यनेन सहस्य सादेशः सहरि । अनुपूर्व्यार्थे यथा अनुपूर्वस्य भाव इत्यानुपूर्वं भावे तत्व्यण इति यण् ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं योगपद्ये यथा चक्रेण युगपत्समकालमिति सहादेरित्यनेन सहस्य सः सचक्रं सादृश्ये यथा यथार्थत्वेनैव सिद्धे पुनः सादृश्यग्रहणं गुणभूतेपि सादृश्ये यथा स्यादित्येतदर्थं सदृशः सख्या इति सहादेरित्यनेन सहस्य सः ससखि संपत्तौ यथा अनुरूपं आत्मभावः संपत्तिः क्षत्राणां संपत्तिरिति सहादेरित्यनेन सहस्य सः स

सन्तृणं साकल्येनात्ति इत्यर्थः। अन्तवचने यथा। उच्यते तत् इत्यन्तं अन्तस्य वचनं अन्तवचनं तस्मिन् अग्निशब्दोऽग्निप्रतिपादकग्रंथे वर्त्तते अस्वपदविग्रहो नित्यस
मासोयं। अग्निग्रंथपर्यन्तमिति साग्नि अधीते॥ ◎ ॥ यथाऽसादृश्ये। असादृश्ये एव यथाशब्दः समस्यते सादृश्ये इति यथार्थे इति वा प्राप्तं निषिध्यते यथा हरिस्तथा हरः। य
थाशब्दो हरेरुपमानत्वं द्योतयति। अवधारणे यावति च। यावच्छब्दस्याव्ययत्वादेव सिद्धे नियमार्थमिदं। अवधारणे एव यावदव्ययं समस्यते नाऽन्यस्मिन्नर्थे याव
तावच्च साकल्येऽवधीमानेऽवधारणे इत्यमरः। यत्परिमाणं येषां ते यावन्तः। एतत् किं यत्तद्भ्य इति वतुः यत्तदेतदामित्यात्वं तत्परिमाणं येषां ते तावन्तः तद्धितान्तेन विग्र
हः समासस्त्वऽव्ययेनैवाऽस्वपदविग्रहोयं। अवधारणे किं। यावद्दत्तं तावद्भुक्तं नाऽवधारयामि कियन्मया भुक्तमिति। क्वचिदनव्ययपूर्वपदेप्यव्ययीभावः। अ

यथाऽसादृश्ये यथाशब्दः सादृश्येन समस्यते। यथा हरिस्तथा हरः। अवधारणार्थे यावति च। अवधारणार्थे यावच्छब्दे प्रयुज्यमाने योऽव्यय
स्तोऽव्ययीभावसंज्ञकः समासो भवति। यावन्तः श्लोकाः तावन्तोऽच्युतप्रणामाः यावच्छ्लोकम्। क्वचिदनव्ययपूर्वपदेऽप्यव्ययीभावः। उ
न्मत्ता गङ्गा यस्मिन् देशे इत्युन्मत्तगङ्गम्। शाकस्य लेशः शाकप्रति। अक्षेण विपरीतं वृत्तं अक्षपरि। शलाकया विपरीतं वृत्तं शलाकापरि
एकपरि। क्वचिद्वा। अपविष्णोः अपविष्णु। परिविष्णोः परिविष्णु। बहिर्वनात् बहिर्वनम्। प्राग्वनात् प्राग्वनम्॥ ६॥ ७॥ ८॥

न्यपदार्थे सादंनेन· नदीवाचिभिः सह नित्यं समस्यते संज्ञायाम्। उन्मत्ता गंगा यस्मिन् पुंवद्भावेति पुंवद्भावः तेन उन्मत्तगंगम्। देशः। बहुव्रीह्यर्थेऽव्ययीभावो नित्यसमा
सोयं। लेशार्थे प्रतिना सह स्याद्यंतं नित्यं समस्यते लवलेशकणाणव इत्यमरः। शाकस्य लेश इति शाकप्रति। अक्षशलाकासंख्याः परिणा नित्यं समस्यंते द्यूतव्यवहारे परा
जये एवार्थे अक्षेण विपरीतं वृत्तमिति। अक्षपरि। पूर्वं ये यथा वृत्तं वृत्ते तथा न वृत्तमित्यर्थः। शलाकया विपरीतं वृत्तमिति। शलाकापरि। एकेन विपरीतं वृत्तमिति। एकप
रि। एते नित्यसमासाः। अथ वैकल्पिकाः समासाः। क्वचिद्वा। अपपरिबहिरंचूत्तरपदाः पंचम्या सह समस्यंते वा अपपरी वर्जनार्थकौ ग्राह्यौ बहिर्योगे तु क्तेने आ
दित्वात् पञ्चमी सा सर्वत्र तु न। करस्य करभो बहिरित्यमरोक्तेः। अञ्चुधातुरुत्तरपदं यस्य सोऽञ्चूत्तरपदो यथा। प्राग्वनमिति॥ ६॥ ६॥ ७॥ ६॥

मर्यादाभिविध्यर्थकाङ् पंचम्यन्तेन वा समस्यते॥ ॥ आमुक्ति संसारः आबालं हरिभक्तिः 'अभिप्रती आभिमुख्यार्थकौ चिन्हवाचिना सह वा समस्येते अभ्यग्नि शल
भाः पतंति' अत्र लक्ष्यलक्षणाभावे विनादित्वात् द्वितीया दैर्घ्यसमीपार्थको ऽनुश्चिन्हवाचिना षष्ठ्यंतेन सह वा समस्यते 'वनस्य समीपमिति अनुवन अशनि
र्गतः' लक्षणभूतस्य वनस्य समीपं गत इत्यर्थः गंगाया अनु इति अनुगंगं सेना 'अत्र दैर्घ्यलक्ष्यं तु समासार्थः। गंगादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः समासा
भावे गंगामनु इति विनादित्वात् द्वितीयैवं समासे तु विध्यर्थत्वात्षष्ठी 'तिष्ठद्गु गावो यस्मिन्काले स तिष्ठद्गु दोहनकालः' गोरिति ह्रस्वः निपातनाच्छतृप्रत्ययः
आयत्यो गावो यस्मिन्काले स आयतीगवं संध्या निपातनाट्टृप्रत्ययः 'वोऽविग्रहवत् पुंवद्भावाभावश्च' खलेयवा यस्मिन् काले स खलेयवं सप्तम्या अलुग् निपातनात्॥

आसुक्तेः आमुक्ति 'अभ्यग्निम्। अभ्यग्नि प्रत्यग्निम्। प्रत्यग्नि। वनस्य समीपमुपवनम्। गङ्गामनु अनुगङ्गम्। तिष्ठन्ति गावो यस्मिन्काले
स तिष्ठद्गु 'आयतीगवम्' पारे गङ्गायाः पारेगङ्गम्। मध्ये गङ्गायाः मध्येगङ्गम्' इत्यादयो निपात्याः 'खले यवा यस्मिन्काले खलेयवम्।
द्वौ मुनी वंश्यौ द्विमुनि 'त्रिमुनि व्याकरणस्य' सप्तगङ्गाः समाहृताः सप्तगङ्गम् द्वियमुनम्॥

\\ इह बहुव्रीहिविषये ऽव्ययीभावः पारमध्यशब्दौ षष्ठ्यं
तेन वा समस्येते 'एदन्तत्वं चाऽनयोर्निपात्यते' गंगायाः पारमिति पारेगंगं 'गंगाया मध्यमिध्यमिति मध्येगंगं' पक्षे षष्ठीतत्पुरुषोपि 'गंगायाः पारमिति गंगापा
रं' एवं गंगामध्यं वाक्यमपि 'गंगायाः पारं गंगाया मध्यमिति' वंश्यवाचिना सह संख्या वा समस्यते 'वंशः संतानः' स द्विविधो विद्यया जन्मना च तत्र भवो वंश्यः 'द्वौ मु
नी वंश्यौ पाणिनिकात्यायनाविति द्विमुनि त्रयो मुनयो वंश्या इति त्रिमुनि' व्याकरणस्येति संबंधे षष्ठी 'अन्यपदार्थप्राधान्यविवक्षायां तु त्रयो मुनयो वंश्या य
स्मिन् त्रिमुनि बहुव्रीहिरेव जन्मना वंश्यो यथा 'एकविंशतिर्भारद्वाजं वंश्या इति एकविंशतिभारद्वाजं' नदीवाचिना सह संख्या समस्यते 'समाहारार्थे सप्त
गङ्गाः समाहृताः सप्तगंगं द्वे यमुने समाहृते। इति पुंवद्भिती। पुंवद्भावः द्वियमुनं। द्विगोरपवादोयमव्ययीभावः॥ अथ समासांतप्रत्ययानाह॥ ॥ ६॥

समासस्य समासो न रपदस्य वा चरमाऽवयवाः समासान्ता इत्यर्थः ॥ ॥ टाडकाः । टच्च अच्च डच्च कच्च ते टाडकाः' समासे इत्यनुवर्तते टकार इद्वर्थः' अकारोऽदन्तत्वफ
लकः डषित्लोपार्थः कः श्रवणार्थः न त्वित्संज्ञकः प्रयोजनाभावात्' अव्ययीभावे शरदादिभ्यष्टप्रत्ययः एवं शरद्' विपाश्' अनस्' मनस्' उपानह्' दिव्' हिमवत्' अ
नडुह्' दिश्' दृश्' विश्' चेतस्' चतुर्' त्यद्' तद्' यद्' कियत्' एते शरदादयः' शरदः समीपमिति उपशरदं टः' विपाशं प्रतीति प्रतिविपाशं विनादित्वात् प्रतियोगे द्वितीया वि
पाशा तु विपाट् स्त्रियामित्यमरः' जरायाजरस्' अव्ययीभावे जराशब्दस्य जरसादेशः टप्रत्ययश्च' जरायाः समीपमिति उपजरसं टः प्रतिपरसमनुभ्योऽक्षिशब्दादव्ययीभावे
टः' अक्षि प्रतीति प्रत्यक्षं यस्येतीकारलोपः' अक्ष्णः परं विषय इति परोक्षं' परस्य परसादेशे सस्य विसर्गे च कृते नोऽस्तुरित्युत्वे ओत्वे एदोतोतः इत्यल्लोपः परो अक्ष्णो योग्य

टाडकाः' समासे सति टअट्कड इत्येते प्रत्यया भवन्ति शरदः समीपमुपशरदम्' प्रतिविपाशं' जरायाजरस्' उपजरसम्' अक्षि प्रत्यक्षम्' अक्ष्णः परस्य परोक्षम्' परशब्दस्य परस परोक्ष इति ज्ञापकात्' अन्वक्षम्' उपराजम्' क्लीबे वाऽनलोपश्च' उपचर्मम्' उपचर्म' इसान्ताद्वा' उपसमिधम्' उपसमित्' नद्यादिभ्यो वा' उपनदम्' उपनदि इत्यव्ययीभावः ॥ । अमाद्यैतत्पुरुषः' द्वितीयायन्ते पूर्वपदे सति योऽन्वयस्तत्पुरुषसंज्ञ समासो भवति' ग्रामं प्राप्तो ग्रामप्राप्तः ॥

' इति' समक्षं' अक्ष्णः पश्चादिति अन्वक्षं' अनन्ताऽव्ययीभावाट्टः' राज्ञः समीपमिति उपराजं' नो वेति टिलोपः' आत्मनि
इति अध्यात्मं वैकल्पिकं टप्रत्ययमाह' अव्ययीभावे नान्तनपुंसकाद्विशब्दात् इस्प्रत्याहारान्तात् नदीपौर्णमास्याग्रहायणीभ्यश्च वा टः' चर्मणः समीपमिति' उ
पचर्मं उपचर्म' गिरेः समीपमिति उपगिरं' उपगिरि' समिधः समीपमिति उपसमिधं' उपसमित्' नद्याः समीपमिति उपनदं' नपुंसकस्येति ह्रस्वे उपनदि' पौर्ण
मास्याः समीपमिति उपपौर्णमासं' उपपौर्णमासि' अग्रहायण्याः समीपमिति उपाग्रहायणं' उपाग्रहायणि' इत्यव्ययीभावः ॥ । अमाद्यैतत्पुरुषः' अम् आदिर्ये सि॰ कौ॰
ष्यसोऽमादिस्तस्मिन्नमादौ प्रत्यये सुप्यर्थे ते प्रत्ययग्रहणे तदन्तग्रहणमिति परिभाषया मायन्ते द्वितीयायन्ते पूर्वे इत्यनुवर्तते पूर्वपदे सति यो नाम्नोऽन्वयः स तत्पुरुषसं

पूर्वे इत्युक्तत्वात् द्वितीयाद्यंतस्य पूर्वनिपातः श्रितातीतपतितगतात्यस्तप्राप्तापन्नगामिन्बुभुक्षुभिः सह द्वितीयांतं समस्यते' श्रितादिष्वापन्नांतेषु गत्यर्थाद्क र्मकादिति कर्तरि क्तः' अत्यादीनां गतिविशेषवाचित्वात्॥ ः॥ कृष्णं श्रित इति कृष्णश्रितः' अक्तादिनिषष्ठीनिषेधः' कर्म्मणि क्तप्रत्यये तु कृष्णः श्रितो येनेति बहु व्रीहिरेव तत्र च बहुव्रीहौ विशेषणस्य प्रथमांतं कांतानामिति श्रितस्य पूर्वनिपाते समासांतकप्रत्यये च श्रितकृष्णक इति' दुःखमतीत इति दुःखातीतः' अतिपू र्वकादिणः कर्तरि क्तः। पतगतौ चुरादिरदंतोऽस्मात् कर्तरि क्ते कूपपतित इति' ग्रामं गत इति' तुहिनमत्यस्त इति तुहिनात्यस्तः' अस्यतोऽव्यतिक्रमः सोपिगतिविशेष एवेति कर्तरि क्तः। सुखप्राप्तः' दुःखापन्नः। ग्रामं गामीति ग्रामगामी। गमेरनिरित्यौणादिको भविष्यत्काले इन्' भविष्यत्यकस्येति सूत्रेण षष्ठीनिषेधात् कर्म्मणि

कृष्णश्रितः' कूपपतितः' ग्रामगतः' खट्वारूढः' मुहूर्तसुखम्' दुःखातीतः' ग्रामगामी' अन्नबुभुक्षुः' दात्रेणछिन्नम्' दात्रछिन्नम्' मासेनपूर्वो मासपूर्वः' मातृसदृशः' पितृसदृशः' माषोनम्' वाक्कलहः' आचारनिपुणः' गुडमिश्रः' मासावरः' हरित्रातः' नखभिन्नः' दध्योदनः' गुडधानाः' यूपायदारु' यूपदारु' अर्थस्य विशेष्यलिङ्गता' द्विजायायं द्विजार्थः सूपः' द्विजार्था शाटी' द्विजार्थम्पयः' भूतबलिः' गोहितम्' गोसुखम्' गो रक्षितम्' चौराद्भयम्' चौरभयम्' सुखापेतः' दुःखापोढः' व्याघ्रभीतः' राज्ञः पुरुषः' राजपुरुषः' द्विजयाजकः' देवपूजकः॥ ॥द्वितीयाभ

न्नंबुभुक्षुरिति अन्नबुभुक्षुः' सनाशंसभिक्षउ इत्युप्रत्ययः' द्वितीयांतः खट्वाशब्दः कालवाचीचक्तांतेन समस्यते' खट्वारूढो जाल्मः। नित्यसमासोयं। जाल्मोऽसमी क्ष्यकारीस्यादित्यमरः। मासं प्रमित इति मासप्रमितः। माङ्माने कर्तरि क्तः' अत्यन्तसंयोगे द्वितीयांतः कालवाची स्याद्यंतेन समस्यते' मुहूर्तं सुखमिति मुहूर्तसु खं कालाध्वनोरिति द्वितीया॥ तृतीयांतं तदर्थकृतगुणवचनेन सह समस्यते' गुणमुक्त्वा यो द्रव्यमुक्तवान् स गुणवचनः। कर्तरि युट् गुणश्चात्र सत्वे निविशते इत्यादिल क्षणलक्षितो गृह्यते' छिन्नमस्यास्मिन्निति छिन्नं दात्रेण छिन्नमिति दात्रछिन्नं। करणे तृतीया। छिदिर् द्वैधीकरणेऽस्माद्भावे क्तः। छिन्नः शब्दः क्रियारूपापन्ने॥

छिन्नमस्यस्मिन्निति छिन्नमित्यस्यार्थे लक्षणया तत् इति द्रव्ये वर्तते इति गुणवचनः। तृतीयान्तं पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः सह समस्यते तु
ल्यार्थे योगे इति समसदृशयोगे तृतीया। अन्ये योगे तु समासविधानसामर्थ्यात् तृतीया हेतौ तृतीया वा मासेन पूर्व इति मासपूर्वः। मात्रा सदृश इति मातृसदृशः।
पित्रा समः पितृसमः। माषेण ऊनं इति माषोनं। माषेण विकल इति माषविकलः। वाचा कलह इति वाक्कलहः। आचारेण निपुण इति आचारनिपुणः। गुडेन मिश्र इ
ति गुडमिश्रः। आचारेण श्लक्ष्ण इत्याचारश्लक्ष्णः। मासेन अवरोऽर्वागिति मासावरः। तृतीयान्तं कर्तृकरणे कृदन्तेन सह बहुलं समस्यते। हरिणा त्रात इति हरित्रातः।
। कर्मणि क्तः। कर्तरि तृतीया। नखैर्भिन्न इति नखभिन्नः। कर्मणि क्तः। करणे तृतीया। वा न नछेद्यतृणशक्यार्थेयः। काकेन पेयेति काकपेया नदी शक्यार्थे बहुलग्रहणात् क्व र्थेयः
चिन्न दात्रेण लूनवान् हस्तेन कुर्वन्। संस्कारकद्रव्यवाचकं तृतीयान्तमन्नेन सह समस्यते। दध्ना उपसिक्त ओदन इति दध्योदनः। उपसेकक्रियाद्वाराऽन्व
यः। भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्रीत्यमरः। गुडेन मिश्रा धानाः गुडधानाः। मिश्रणक्रियाद्वाराऽन्वयः। धाना भ्रष्टयवे स्त्रियां इत्यमरः। तदर्थार्थबलिहितसुख
रक्षितैः सह चतुर्थ्यन्तं समस्यते। यूपाय दारु इति यूपदारु। तादर्थ्ये चतुर्थी अर्थेन नित्यसमासो विशेष्यलिङ्गता च। अस्मिन् वार्तिकाभावे तु विकल्पाधिका
रात् पक्षे द्विजायार्थ इत्यपि स्यात्। द्वन्द्वतत्पुरुषयोः परपदस्यैवेति वक्ष्यमाणेन सर्वत्र पुल्लिङ्गप्रयोगश्चास्यार्थशब्दस्य पुल्लिङ्गत्वादत इदमुक्तं। भूतेभ्यो ब
लिरिति भूतबलिः। गोभ्यो हितमिति गोहितं। गोभ्यः सुखमिति गोसुखं। गोभ्यो रक्षितमिति गोरक्षितं। भयभीतभीति भीभिरपेताऽपोढमुक्तपतिताऽपत्रस्तैश्च स
ह पञ्चम्यन्तं समस्यते। चौराद्भयमिति चौरभयं। एवं वृकभीतः। सिंहभीतिः। राजभीः। सुखादपेत इति सुखापेतः। एवं कल्पनाऽपोढः। चक्रमुक्तः। स्वर्गपतितः। तरङ्गाप
त्रस्त इति। राज्ञः पुरुष इति राजपुरुषः। संबन्धे षष्ठी राजन् अस् पुरुष सि इत्यलौकिकविग्रहे समासे कृते समासप्रत्यययोरिति विभक्तेर्लुकि अंतर्वर्तिनीं विभक्तिमा
श्रित्य पदत्वान्नान्तस्य नलोप इति नलोपः। याजकादिभिः सह षष्ठ्यन्तं समस्यते। याजक पूजक परिचारक परिवेषक स्नातक अध्यापक उत्सादक होतृ पोतृ भर्तृ नप्तृ ग

कचिन्नषष्ठीनसमस्यते। निर्द्धारणेया षष्ठी सा न समस्यते' नृणां द्विजः श्रेष्ठः जातिक्रियागुणसंज्ञाभिरिति षष्ठी' पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन। पूरणार्थैः सह षष्ठ्यन्तं न समस्यते' पूरणार्थे सतां षष्ठः। षण्णां संख्यापूरणः षष्ठः षट्कतिकतिपयचतुरां थुक् इति थुक्' गुणार्थे काकस्य कार्ष्ण्यं कृष्णस्य भावः कार्ष्ण्यं 'अनित्योऽयं गुणेन निषेधः संज्ञाप्रमाणम् अर्थगौरवं बुद्धिमान्द्यमित्यादिनिर्देशात् फलानां सुहितस्तृप्तः करणे षष्ठी' तृतीयासमासस्तु स्यादेव अधिकरणवाचिना क्तेन षष्ठी न समस्यते' इदमेषामासितं गतं भुक्तं वा ध्रौव्यगतिप्रत्यवसानार्थेभ्य इत्यधिकरणे क्तः' एषामिति कर्त्तरि षष्ठी वर्तमानाधारार्थक सोऽनेनक्तत्र्यर्थकाभ्यामत्राऽकाभ्यां सह षष्ठी न समस्यते अपां स्रष्टा ओदनस्य पाचकः' तृज्वुणाविति कर्त्तरि तृज्वुण् प्रत्ययौ अपामिति ओदनस्येति कर्तृकर्मणोरित्यनेन कर्मणि षष्ठी' कर्तृषष्ठ्यन्तमकेन सह न समस्यते भ

कचिन्न षष्ठी न समस्यते' नृणां द्विजः' सतां षष्ठः' काकस्य कार्ष्ण्यम्' फलानां सुहितः' इदमेषां शायितम्' अपां स्रष्टा' ओदनस्य पाचकः' भवतः शायिका कचिदमाद्यन्तस्य परत्वम्' राजमतिक्रान्तोऽतिराः' नावमतिक्रान्तोऽतिनौः' पूर्वं भूतो भूतपूर्वः' कायस्य पूर्वः' पूर्वकायः' अपरकायः' अधरकायः' उत्तरकायः' अह्नो मध्यं मध्याह्नः' सायाह्नः' मध्यरात्रः' पश्चिमरात्रः

ये

ः वतः शायिका' आधारे वुण्प्रत्ययो भवतीति कर्त्तरि षष्ठी वर्तमानार्थक्तेन स सह षष्ठी न समस्यते' राज्ञां मतो बुद्धः पूजितो वा' राज्ञामिति कर्त्तरि षष्ठी' कचिदमाद्यन्तस्य परत्वात् तत्पुरुषे कचिदमाद्यन्तस्य पदस्य परनिपातो भवति' राजमतिक्रान्त इति अतिराः अत्याद्यः क्रान्ता — द्यर्थे द्वितीयेति समासः रैरसिमिरित्यनेनाकारः पूर्वे भूत इति भूतपूर्वः पूर्वाऽपराधरोत्तरमेकदेशिनैकाधिकरणे अवयववाचिना एकसंख्याऽवयविना समस्यते' कायस्य पूर्व इति पूर्वकायः' कायस्यापरोदेशः अपरकायः' कायस्याधरोदेशः इति अधरकायः' कायस्योत्तरोदेश इति उत्तरकायः' एकदेशः कालवाचिना समस्यते अह्नो मध्यमिति' मध्याह्नः। राजाहःसखिभ्यष्टच् इति टः' नीचेत्युपधालोपः। अह्नः पूर्व इति पूर्वाह्नः' अह्नः साय इति सायाह्नः' स्यते धिञ्‌ अवसानवचनः सायशब्दः रात्रेर्मध्यमिति मध्यरात्रः' रात्रेः पश्चिममिति पश्चिमरात्रः' टाडकाद्यनेनाऽप्रत्ययः नपुंसकोऽर्द्धशब्द एकसंख्याऽवयविना सह समस्यते' पुंस्यर्द्धोऽर्द्ध

यं चतुर्थंभिक्षाया इति २

अर्द्धपिप्पल्यादीनि अर्द्धपिप्पली द्वन्द्वतत्पुरुषयोरिति परवल्लिंगत्वात् स्त्रीत्वं भाष्ये तु अर्द्धपिप्पलीति कर्मधारये उक्तं समुदाये दृष्टाः शब्दा अवयवेष्वपि वर्त्तन्त इति न्यायात् द्वितीयतृतीयचतुर्थतुर्याण्येकदेशिना सह समस्यन्ते अमाद्यंतस्य परनिपातश्च वा द्वितीयं भिक्षाया इति द्वितीयभिक्षा भिक्षाद्वितीयं तृतीयं भिक्षाया इति तृतीयभिक्षा भिक्षातृतीयं चतुर्थभिक्षा भिक्षाचतुर्थं तुरीयं भिक्षाया इति तुरीयभिक्षा भिक्षातुरीयं द्वितीयांतस्य प्राप्तापन्नयोः परयोर्वा परनिपातः जीविकां प्राप्त इति जीविकाप्राप्तः प्राप्तजीविकः अन्यार्थ इति ह्रस्वः द्विगुप्राप्तापन्नेति वक्ष्यमाणेन परवल्लिंगोन कालवाचकः परिमाणवता सह समस्यते ऽमाद्यंतस्य परनिपातश्च तत्पुरुषे परिमीयते परिच्छिद्यते येन तत्परिमाणं परिमाणमस्यास्तीति परिमाणवान् तेन यस्य हि जननात् द्वौ मासौ जातः समासजातः उच्यते इह विग्रहे षष्ठी निर्दिष्टस्य प्रा

अर्द्धपिप्पली क्वचिन्न द्वितीयं भिक्षायाः द्वितीयभिक्षा भिक्षाद्वितीयम् तृतीयभिक्षा भिक्षातृतीयम् चतुर्थभिक्षा भिक्षाचतुर्थम् भिक्षातुरीयम् तुरीयभिक्षा जीविकाप्राप्तः प्राप्तजीविकः आपन्नजीविकः जीविकापन्नः समासे क्वचिदेकपदे णत्वहेतुः शराणां वनं शरवणम् आम्राणां वनमाम्रवणम् प्लक्षवणम् शूर्पणखा क्वचिन्न माषवापिनौ व्रीहिवापिणि व्रीहिवापानि व्रीहिवापेण व्रीहिवापेन सुरापाणम् सुरापानम् अक्षेषु शौण्डो ऽक्षशौण्डः पात्रेसमितादयो निपात्याः पात्रेसमितः गेहेशूरः गेहेनर्दी ॥ धान्यं द्योतयितुं यस्येत्युक्तं यद्यपि मासो जातो यस्येति बहुव्रीहिणापि सिद्ध्यति बहुव्रीहौ क्वचिन्नेति क्तांतस्य पूर्वनिपाननिषेधात् तथापि जातवत्त्वो मासो यस्येति समासजातवानित्याद्यर्थमिदम् । समासे क्वचिदेकपदे णात्वहेतुः एकपदस्य भावस्तेकपदं समासे क्वचिन् णत्वस्य हेतुरस्ति शराणां वनमिति शरवणं प्लक्षाणां वनमिति प्लक्षवणं। आम्राणां वनमिति आम्रवणं शूर्पणखा अत्र संज्ञायां णत्वम् क्वचिन्न। क्वचित्समासे णत्वं वा भवति माषान् वारंवारं वपतीति माषवापी बहुलमाभीक्ष्ण्ये इति णिनिः व्रीहीन्वपतीति कार्ये णित्यण् व्रीहिवापतानि व्रीहिवापाणि णत्वाभावे व्रीहिवापानि व्रीहीन् वारंवारं वपतीति व्रीहिवापी तस्मै व्रीहिवापिणे शौण्ड धूर्त कितव व्याड प्रवीण संवीत अधि अन्तर् पटु पण्डित कुशल निपुण सिद्ध शुष्क पक्व बंधैः सह सप्तम्यंतं समस्यते अक्षेषु शौण्डः प्रवीण इति अक्षशौण्डः पात्रेसमितादयः शब्दा निंदार्थे निपात्यंते भोजनस्य ॥ छु ॥ ८ ॥

सि॰ चं॰ टी॰ सु॰ ८५

मपेएवसंगतनाभवंतिनतुकार्य्यंतेपात्रेसमिताः'सम्पूर्वाद्दिणःक्तः'गेहेनर्द्दीनर्दशब्दे अस्माण्णिनिः सुप्तम्पालुगात्रएषांसमासांतरेप्रवेशोनभवतीत्यर्थः'नञिनञौहौ पर्युं-
दासार्थकौपर्युदासार्थकस्यनञएकार्थीभावेसमासोव्यपेक्षायांतुवाक्यमेवभवति'प्रसज्यप्रतिषेधार्थस्यतुक्रिययैवान्वयोन'ना म्नाअनन्वयेपिक्कापिनाम्ना
समासः'इणतन्यकर्तरित्तापकात्'कर्तरिनभवतीतितिनदर्थः'तेनासूर्य्यंपश्याराजदारादृत्यादिसिद्धम्'तदन्यतद्विरुद्धं तदभावाइतित्रयोनञोर्थाः।तत्सादृ-
श्यमभावश्चतदन्यत्वंतदल्पता'अप्राशस्त्यंविरोधश्चनञर्थाःषट्प्रकीर्तिताः।१ इतिकेचित्'यथाअब्राह्मणः अपापंअनश्वः अनुदराकन्या अपशवः।
अधर्मः'नञ्समासोद्वि'अर्थ्याभावेव्ययीभावेनसहविकल्प्यते'अद्भुतायामसंहितमितिवार्तिकप्रयोगात्'नानञइतिच्छेदः'आख्यातांतेपरेपिनञोदादे

नञि'नञिपूर्वपदेसतियोऽन्वयस्तस्यतत्पुरुषसंज्ञस्समासोभवति'ना'समासेनञोनस्यादेशः धर्म्मविरुद्धोऽधर्म्मः। ज्ञानविरुद्धमज्ञानम्'
अन्स्वरे।समासेनञोनस्यानस्यात्स्वरे'अश्वादन्योऽनश्वः'संशयस्याऽसम्भवोऽसंशयः'निरनुबन्धकस्यनानौनाकः'नक्षत्रम्'नक्रः'नासत्यौ
नैनैकधाइतितत्पुरुषः।चार्थेद्वन्द्वः'समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः'तत्रेश्वरंगुरुञ्चभजस्वेतिप्रत्येकमेकक्रियाभिःसम्ब-

शोभवति'निंदार्थेअपचसित्वंजाल्म'कुत्सितंपचसीत्यर्थः'अनुस्वरे।अनश्वइत्यत्रङ्णोह्रस्वादितिद्वित्वंतुनानपीतिनिर्देशात्'निरनुबंधकस्यतुनानोनिरनु-
बंधस्यअश्वअनच्चआनौतौनभवतः'सानुबंधकस्यतुभवतइत्यर्थः'नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकनेकधाशब्देषु
नशब्देनसमासः'नभ्राजतेइतिनभ्राट्'क्विबंतः'नपातीतिनपात्'शत्रंतः'नवेत्तीतिनवेदाः'असुप्रत्ययांतः'सन्तुसाधवइतिसत्याः'यप्रत्ययः'नसत्याअसत्याः'नअ-
सत्याःनासत्याः'नमुंचतीतिनमुचिः'नाम्युपधात्किरितिकिः'नकुलमस्येतिनकुलः'नखंछिद्रमस्येतिनखः'नस्त्रीपुंसोइतिनपुंसकः'स्त्रीपुंसयोःपुंसकभावोनिपा- एम
तनात्'नक्षरतीतिनक्षत्रं'क्षरसंचलनेभ्वादिः'निवासगत्योस्तुदादिरन्वयोःक्षत्रमितिनिपात्यते'नक्रामतीतिनक्रः'डप्रत्ययः'नअकमस्मिन्नितिनाकः'नएकधानेकधाइति ८५

समुच्चयः। एकमेकं प्रतीतिप्रत्येकं परस्परनिरपेक्षस्याऽनेकस्यैकक्रियायामन्वय इत्यर्थः त्वमीश्वरं गुरुं च भजस्वेत्यत्र भजनक्रियायां ईश्वरगुरुभ्यां प्रत्येकं सं बंधात् समुच्चयः। एकक्रियायामित्युपलक्षणं तेन परस्परनिरपेक्षस्यानेकस्यैकस्मिन् सम्बन्धिन्यन्वयः समुच्चय इत्यर्थः राज्ञो गजश्चाश्वश्चात्र द्रव्ये द्रव्ययोः स मुच्चयः। पटः शुक्लो रक्तश्चात्र द्रव्ये गुणयोः समुच्चयः रक्तः पटः कम्बलश्चात्र गुणे द्रव्ययोः समुच्चयः अनेके एकस्मिन् समुच्चीयन्ते इति समुच्चयः। क्रमेण क्रियाद्वय सम्बन्धोऽन्वाचयः परस्परनिरपेक्षस्यानेकस्य क्रियाद्वयेऽन्वयोऽन्वाचयः प्रत्येकस्य प्राधान्यात् तदनुरोधेनान्वितरदन्वाचीयते तदाऽन्वाचयः। यथा भिक्षामट गां चा नयेत्यत्र भिक्षाटनस्य प्रधानता गवानयनस्यत्वाऽनुषंगिकता मिलितयोर्मिलितानां वै क्रियान्वयः इतरेतरयोगः। परस्परसापेक्षस्यानेकस्यैकक्रियायामन्व ॥

समुच्चयः। बटो भिक्षामट गां चानयेति क्रमेण क्रियाद्वयसम्बन्धोऽन्वाचयः। मिलितयोरेकत्रान्वय इतरेतरयोगः। संहितस्य समाहारः तत्रा द्ययोर्न समासोऽस्त्यनन्वयात्। द्वन्द्वेऽल्पस्वरप्रधानौकारैकारान्तानां पूर्वनिपातः। पटुश्च गुप्तश्च पटुगुप्तौ अग्निश्च मरुच्च अग्नीमरुतौ भो क्तृभोग्यौ धवखदिरौ। इन्द्राश्वरयोः। नापसपर्वतौ स्वराद्यन्तस्य ईशकृष्णौ॥

यइतरेतरयोगः संहतिः समाहारः परस्परसापेक्षस्यानेकस्यस मूहरूपेणान्वयः समाहार इत्यर्थः चार्थे द्वन्द्वसमासो भवति। द्वौ द्वावर्थौ अभिरधान्येकोऽस्मिन्निति द्वंद्वः। बहूनामप्युपलक्षणमिदं ननु द्वंद्वसंज्ञा याः किं प्रयोजनमुच्यते द्वंद्वतत्पुरुषयोः परपदस्यैव लिङ्गमिति द्वंद्वेऽल्पस्वरप्रधानेकारौकारान्तानां पूर्वनिपात इति कृतां द्वंद्वे पूर्वपरस्थानत्वमित्यादि च प्रयो जनं आद्ययोः समुच्चयान्वाचययोः समासो न परस्परसाहित्याऽभावात् अन्ययोः समाहारेतरेतरयोगयोः समासोऽस्ति परस्परसाहित्यसत्त्वात्। इतरेतरयोगे सा हित्यं विशेषणं द्रव्यं विशेष्यं समाहारे तु साहित्यं प्रधानं द्रव्यं विशेषणं साहित्यप्रधानत्वादेकवचनं द्वंद्वेऽल्पस्वरप्रधानेकारौकारान्तानां पूर्वनिपातः। द्वंद्वेऽल्प स्वरशब्दस्य पूर्वनिपातः यथा धवश्च खदिरश्च धवखदिरौ समासेनोक्तार्थत्वाच्चशब्दाप्रयोगः। द्वंद्वे स्वराद्यदन्तस्य च पूर्वनिपातः स्वर आदिर्यस्य स स्वरादिः अत् अन्ते

चार्थे द्वन्द्वः समुच्चयान्वाचयेतरेतरयोगसमाहाराः

पू॰ सि॰ चं॰ टी॰ ८६

सस्य ईश्वरः स्वस्य ईशः स्वौ बहूनां द्वन्द्वे नियमो न इन्द्राश्वरथाः अश्वरथेन्द्रा वा प्रधानस्य पूर्वं निपातो यथा तापसश्च पर्वतश्च तापसपर्वतौ भोक्ता च भोग्य
श्च भोक्तृभोग्यौ इकारोकारान्तानां पूर्वं निपातो यथा पटुश्च गुप्तश्च पटुगुप्तौ अग्निमारुतौ ॥ ॥ देवताद्वन्द्वे पूर्वपदस्याकारः" इन्द्रश्च बृहस्पतिश्च इन्द्राबृहस्पती॥
अग्निश्च विष्णुश्च अग्नाविष्णू' क्वचिन्न देवताद्वन्द्वे पूर्वपदस्यात्वं न भवति क्वचिद् अग्निवायू वाय्वग्नी वा ईदग्नेः सोमवरुणयोः' आत्वस्यापवादोऽयं देवताद्वन्द्वे पूर्व
पदस्याग्नेरीत्त्वं स्यात् सोमवरुणयोः परयोः' अग्न्यादेः सोमादीनां सस्य षः अग्नीषोमौ आदिशब्दात् अग्निः स्तूयतेऽस्मिन् इत्यधिकरणे क्विप् अग्निष्टुत् यज्ञ
विशेषः' अग्नीनां स्तोम इति अग्निष्टोमः सोमस्य ज्ञस्य संस्था स्वायसस्था ज्योतिः ष्टोमः' आयुःष्टोमः अंगुलिषंगः' भीरुष्ठानमित्यादि' प्राणितूर्यसेनांगानां द्वन्द्व ए
कवत्' प्राणितूर्यसेनानामंगानि प्राणितूर्यसेनांगानि तेषां अंगशब्दः प्रत्येकमन्वेति द्वन्द्वात् श्रूयमाणत्वात् प्राण्यंगानां प्राण्यंगैः सह सेनांगानां सेनांगैः सहयो द्व

देवताद्वन्द्वे पूर्वपदस्याकारः॥ इन्द्राबृहस्पती। अग्नाविष्णू क्वचिन्न। अग्निवायू। ईदग्नेः सोमवरुणयोः। अग्नेः सोमादीनां सस्य षः' अ
ग्नीषोमौ' अग्नीवरुणौ।

न्द्वः स एकवद्भवति एकेन द्वन्द्व एकवद्भावो न यथा मार्दंगिकाश्वारोहौ प्राण्यंगे· दन्ताश्च ओष्ठौ च दन्तोष्ठं' तूर्यांगे' मृदंगवादनं शिल्पम
स्येत्यर्थे ठक् प्रत्ययः णिनोवेति वृद्धिः प्रणुवंति स्तुतिं कुर्वन्त्यनेनेति पणवो गायनपटहः' णु स्तुतौ अस्मात्परः अप् इत्यः प्रत्ययः सोपसर्गस्य निपातनाद्वे फ लोपे न स्य णत्वे च प
णव इति पणववादनं शिल्पमस्येति ठक् प्रत्ययः' मार्दंगिकाश्च पाणविकश्च मार्दंगिकपा णविकं सेनांगे· रथेन चरन्ते इति रथिकाः' चरतीत्यर्थे ठकः' रथिकाश्च अ
श्वारोहाश्च तेषां समाहारो रथिकाश्वारोहं' ननु समाहारस्यैकत्वादेकत्वे सिद्धे। किमर्थमिदमुच्यते। प्राण्यंगादीनां प्राण्यंगादिभिः समाहार एव यथा स्यादिति नियमा
र्थमिति' प्राणिवर्जजातिवाचिनां क्षुद्रजंतूनां च द्वन्द्व एकवत्' धानाश्च शष्कुल्यश्च तासां समाहारो धानाशष्कुलि' प्राणिनां तु विट्शूद्राः' द्रव्यजातिरेवात्र ग्राह्या द्व एम·
तेन रूपरसादिनित्या दीन यूकाश्च लिक्षाश्च यूकालिक्षम्' विभाषा वृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् वृक्षादिसप्तानां भेदकानां ८६

याणामश्ववडवेत्यादीनां त्रयाणां च द्वंद्वः एकवद्भूताश्च अशोकाश्च तेषां समाहारो भूताशोकम् 'भूताशोकाः' रुरवश्च पृषताश्च तेषां समाहारो रुरुपृषतं 'रुरु
पृषताः' कुशाश्च काशाश्च तेषां समाहारः कुशकाशं 'कुशकाशाः' व्रीहयश्च यवाश्च तेषां समाहारो व्रीहियवं 'व्रीहियवाः' दधि च घृतं च तयोः समाहारो दधिघृतं 'द
धिघृते' गावश्च महिषाश्च तेषां समाहारो गोमहिषं 'गोमहिषाः' शुकाश्च बकाश्च तेषां समाहारः शुकबकं 'शुकबकाः' अश्वश्च वडवा च तयोः समाहारोऽश्ववडवम्
'अश्ववडवौ' अश्ववडवयोर्द्वंद्वः पूर्ववल्लिंगइति पूर्वलिंगता 'पूर्वा च अपरा च तयोः समाहारः पूर्वापरं 'पूर्वापरे' अधरा च उत्तरा च तयोः समाहारोऽधरोत्तरं 'अधरो
त्तरे' फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिर्द्वंद्व एकवत् 'एषां बहुवचनान्ताप्रकृतिः कारणं यस्य स बहुप्रकृतिर्द्वंद्व एकवद्भवतीति
नियम्यते। बदराणि च आमलकानि चेति बदरामलकं 'प्राणिवर्जं जातौ' इत्यनेन एकवद्भावे प्राप्ते नियमः 'रथिकाश्चाश्वारोहाश्चेति रथिकाश्वारोहं' सेनांगत्वान्नित्ये ए
कवद्भावे प्राप्ते नियमः 'प्लक्षाश्च न्यग्रोधाश्चेति प्लक्षन्यग्रोधं 'विभाषा वृक्षेति वैकल्पिके एकवद्भावे प्राप्ते नियमः 'रुरवश्च पृषताश्चेति रुरुपृषतं 'शुकाश्च बकाश्चेति शु
कबकं विभाषेति वैकल्पिके एकवद्भावे प्राप्ते नियमः नकुलपर्यन्ताः क्षुद्रजन्तवः 'यूकाश्च लिक्षाश्चेति यूकालिक्षं' क्षुद्रजन्तूनामित्येकवद्भावे प्राप्ते नियमः 'व्रीह
यश्च यवाश्चेति व्रीहियवं 'कुशाश्च काशाश्चेति कुशकाशं 'अत्रापि विभाषेति वैकल्पिके एकवद्भावे प्राप्ते नियमः 'द्विप्रकृतौ एकवचनान्तयोर्द्वयोः प्रकृत्योर्द्वंद्वेना
स्य एकवद्भाव इत्यर्थः ॥ बदरामलके रथिकाश्वारोहौ प्लक्षन्यग्रोधौ रुरुपृषतौ शुकबकौ यूकालिक्षे व्रीहियवौ कुशकाशौ वितिऋतां द्वंद्वे पूर्वपदस्यात्वमितिव
क्ष्यमाणेनात्वं 'उद्गातृनप्तृ' इत्यनेनाऽऽदृ होतापोतारौ पंच सुड्डित्यनेनाऽऽर् मातापितरौ पुत्रे चेति वक्ष्यमाणेनात्वं पितापुत्रौ मातरपितरौ इति पाक्ष्यो मातृशब्दस्याऽर
ङादेशो निपात्यते उदीचामाचार्याणां मतेन त्यदादीनि शिष्यन्ते सर्वैः सहोक्तौ सर्वैः शब्दैः सहोक्तानि त्यदादीनि शिष्यन्तेऽन्यानि पदानि लुप्यानि लुप्यन्ते द्वंद्वे इत्यर्थः॥

॥ ॥

समाहारे एकवद्भावः एकवद्भवनमित्येकवद्भावः एकवचनमित्यर्थः। एकत्वे द्विगुद्वंद्वौ एकत्वे वर्त्तमानौ द्विगुद्वंद्वौ नपुंसकलिंगौ भवतः एकत्वे किं पंचकपालाः पुरोडाशाः। एकशब्द एकत्वसंख्याविशिष्टस्य वाचकः परवल्लिंगापवादोयं विधिः पाणी च पादौ च तेषां समाहारः पाणिपादम् मार्दङ्गिकश्च पाणविकश्च तयोः समाहारो मार्दङ्गिकपाणविकं रथिकाश्च अश्वारोहाश्च तेषां समाहारो रथिकाश्वारोहं पदान्यधीते इति पदकः क्रममधीते इति क्रमकः कप्रत्ययः पदकश्च क्रमकश्च तयोः समाहारः पदकक्रमकं बदराणि च आमलकानि च तेषां समाहारो बदरामलकं शशाश्च कुशाश्च पला— शाश्च तेषां समाहारः शशकुशपलाशं अथ समासान्त प्रत्ययः चवर्गान्तात् दषहान्तात् टच् समाहारे वाक् त्वचं वाक्स्रजं शमीदृषदं वाक्त्विषं छत्रोपानहं समाहारे किं प्रावृट्शरदौ अहः पूर्वाह्णात्रिशब्द

समाहारे एक वद्भावः। एकत्वे द्विगुद्वन्द्वौ नपुंसकलिङ्गौ भवतः पाणिपादम् मार्दङ्गिकपाणविकम् रथिकाश्वारोहम् पदकक्रमकम् बदरामलकम् शशकुशपलाशम्। संख्यापूर्वो द्विगुः। तद्धितार्थे पंचकपालः। समाहारेऽन ईब् द्विगुः। समाहारेऽर्थे द्विगुस्समासो भवति तेनोऽकारान्तात् ङीप्प्रत्ययः। दशानां ग्रामाणां समाहारो दशग्रामी। पञ्चाग्नि कचिन्न। पञ्चपात्रं

॥ दः समाहारे अहश्च रात्रिश्च तयोः समाहारोऽहोरात्रः। रात्राह्नाहाः ता इति पुंस्त्वं इति द्वंद्वः। संख्यापूर्वो द्विगुः॥ संख्यापूर्वो यस्य स संख्यापूर्वः समासो द्विगुसंज्ञो भवति समाससंज्ञाफलं समासप्रत्यययोरिति द्विगुसंज्ञाफलमेकत्वे द्विगुद्वंद्वाविति। द्वौ गावौ शब्दौ यस्मिन्नित्यन्वर्थसंज्ञाबलात् द्वयोरेव द्विगुसमाहारो द्विगावेकवद्भावः। तद्धितार्थे द्विगौ तु नैकवद्भावः। किंतु विशेषनिघ्नता पंचसु कपालेषु संस्कृतः पुरोडाशः संस्कृतार्थेऽण् लुग्बहुत्वे क्वचिदित्यत्र क्वचिद्ग्रहणात् द्विगोर्लुगनपत्ये द्विगोर्निमित्तस्याऽनपत्यार्थस्य स्वरादेस्तद्धितस्य लुग्वक्तव्य इत्यर्थो बोध्यः पंचकपालः। द्विगौ तद्धितस्य लुगभूत् समाहारेऽनई पू द्विगुः समाहरणं समाहारः भावे घञ् समाहारे राशीकरणेऽर्थे द्विगुः समासो भवति अदंतात् द्विगोः स्त्रियामाप् चा दशानां ग्रामाणां समाहारो दशग्रामी यस्येत्यलोपः ननु विप्रकीर्णानामे

इंता

उच्यते। एकक्रियायां समन्वयात् बुद्ध्या राशीकरणस्य संभवादुदाहरणं। पंचाग्नयः समाहृता इति पंचाग्नि। क्वचिन्न क्वचिद्द्वन्द्वे द्विगौ रीपूनस्यात् पंचानां पात्रा
णां समाहारः पंचपात्रं चतुर्णां युगानां समाहारः चतुर्युगं। त्रयाणां भुवनानां समाहारः त्रिभुवनं समासांतान्नग्रेव स्यामि इति द्विगुः ॥ बहुव्रीहिरन्यार्थे।
बहुव्रीहिरित्यस्य पूर्वोच्चारणसामर्थ्यादन्यपदार्थाऽभावेपि बहुव्रीहिः क्वचिद्भवति यथा द्वौ वा त्रयो वा द्वित्राः पंच षट् वा पंचषाः द्वौ दश वा द्विदशाः त्रयश्च
दश वा त्रिदशाः डप्रत्ययांतानेतानग्रे प्रवक्ष्यामि पदानां समासविधानादन्यशब्देन पदं गृह्यते अन्यस्य समस्यमानपदाद्भिन्नस्य पदस्यार्थः अन्यार्थस्तस्मिन्
अमादौ विभक्त्यस्याऽनुवर्त्तनात् द्वितीयाद्यन्ते इति विशेषणं कर्त्तव्यम् अत्र हि द्वितीयाद्यंतपदेन प्रकृत्यर्थोपसर्जनकः प्रत्ययार्थः कर्मादिरभिधीयते प्र
थमान्तेन तु प्रातिपदिकार्थमात्रे यद्यपि त्रिकपक्षे संख्या प्रत्ययार्थस्तथापि न सा प्रकृत्यर्थं प्रति विशेषणत्वान्न प्रकृत्यर्थोपसर्जनकः प्रत्ययार्थः प्रथ

चतुर्युगम्। त्रिभुवनम्। आवन्नाह्वा। पंचखट्वी। पंचखट्वं। बहुव्रीहिरन्यार्थे। अन्यपदार्थे योऽन्वयस्स बहुव्रीहिसंज्ञः। बहुव्रीहौ वि
शेषणसप्तम्यन्तक्तान्तसर्वादिसंख्यानां पूर्वनिपातः। बहु धनं यस्य स बहुधनः। अस्तिधनः। लम्बकर्णः। कण्ठेकालः। वहेगडुः। कृतकटः सर्वप्रि
यः। द्विपुरुषः।

मान्तस्यास्ति एवं च द्वितीयान्ताद्यर्थे इति स्थिते तथा परिशेषात् समस्यमानं प्रथमान्तमेव लब्धं अथाऽप्रथमाविभक्त्यर्थे बहुव्रीहिरिति समाना
धिकरणानामिति च फलितं। अनेकं प्रथमान्तमप्रथमार्थेऽन्यार्थे वर्तमानं समस्यते स बहुव्रीहिः समस्यमानपदेतरपदार्थे समस्यमानपदानामन्वयो ब
हुव्रीहिरित्यर्थः कण्ठेकाल इत्यादिषु बहुव्रीहौ विशेषणसप्तम्यन्तक्तान्तानामिति ज्ञापकाद्भवतीत्यर्थः अतः स द्विधा बहुधा समानाधिकरणो व्यधिकरण
स्तुक्तं क्वचिन्न संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वमित्युक्तत्वात् किंच बहुव्रीहितत्पुरुषयोर्विषयविभागो यथा विज्ञायेत एतदर्थं सूत्रे अन्यग्रहणं।
कृतं द्वितीयाद्यंतं नमन्यपदार्थे क्रमेणोदाहरति प्राप्तमुदकं यमिति समासोक्तत्वात् कर्मादौ प्रथमा प्राप्तोदको ग्रामः ऊढो रथो येन स ऊढरथोऽनड्वान् उपहृतः प
शुर्यस्मै स उपहृतपशू रुद्रः उद्धृत ओदनो यस्याः सा उद्धृतौदना स्थाली पीतमंबरं यस्य स पीताम्बरः वीरः पुरुषो यस्मिन् स वीरपुरुषो ग्रामः इति। बहुव्रीहौ।

विशेषणसप्तम्यंतक्तांतानांपूर्वनिपातः।बहुव्रीहौविशेषणंसप्तम्यंतक्तांतंचपूर्वंप्रयोज्यंविशेषणंयथाबहुधनः अस्तीतिसत्तार्थेऽव्ययं।अस्तिधनंयस्यसोऽस्तिध
नः।लंबौकर्णौयस्यसलंबकर्णः।सप्तम्यंतंयथा।कंठेकालः।वहेगडुः।सप्तम्याअलुगत्र क्तांतंयथा।कृतंकटोयेनसकृतकटः।सर्वादिसंख्याचबहुव्रीहौसर्वादिग
णःसंख्याचपूर्वंप्रयोज्यासर्वःप्रियोयस्यससर्वप्रियः द्वौपुत्रौयस्यसद्विपुत्रः।त्रिपुत्रः॥ ॥ क्वचिन्नबहुव्रीहौक्वचिद्विशेषणसप्तम्यंतक्तांतानांपूर्वनिपातो
नभवतिचन्द्रःशेखरेयस्यसचन्द्रशेखरः।पद्मंनाभौयस्यसपद्मनाभः।टाडकाइत्यनेनाऽप्रत्ययः।दंताजातायस्यसःदंतजातः।ऊरूभिन्नौयस्यसऊरुभि
न्नः।क्वचिद्वा।बहुव्रीहौक्वचिद्विशेषणसप्तम्यंतक्तांतानांवापूर्वनिपातोभवतिप्रियोगुडोयस्यसप्रियगुडः।गुडःप्रियोवा।आहितअग्निर्येनसआहिताग्निर
ग्न्याहितोवा।असिरुद्यतोयेनसउद्यतासिःअसुद्यतोवा।नञ्दुःसुभ्यः प्रजामेधयोरस्।नञादिभ्यः पराभ्यांप्रजामेधाभ्यामस्प्रत्ययःस्याद्बहुव्रीहौ।नप्रजायस्य

क्वचिन्नचन्द्रशेखरः।पद्मनाभः।दन्तजातः।ऊरुभिन्नः।क्वचिद्वा।प्रियगुडः।गुडप्रियः।आहिताग्निः।अग्न्याहितः।अस्युद्यतः।उद्यतासिः।
नञ्दुःसुभ्यः प्रजामेधयोरसुक्।अप्रजाः।दुर्मेधाः।सुप्रजाः।धर्मादन्।सुधर्मा।रूपवतीभार्य्यायस्य।अन्यार्थे।स्त्रीप्रत्ययान्तस्यान्यार्थेवर्त्त
मानस्यह्रस्वः।

सः।नाइत्यनेनादादेशः।अस्प्रत्ययेयस्यलोपइत्यलोपः।अत्वसोरितिदीर्घः।अप्रजाः।दुःप्रजाः।सुप्रजाः।अमेधाः।दुर्मेधाः।सुमेधाः।अल्पमेधस
इतिकाशिका।धर्मादन्।धर्मशब्दादनुप्रत्ययःस्यात्द्विपदबहुव्रीहौ।सुष्ठुधर्मोयस्यसः सुधर्मा।ननुअकारोव्यर्थःअनप्रत्ययेनैवरूपसिद्धेरितिचेन्नउच्यतेधर्मे
करोत्याचष्टेवेतिधर्मनाम्नोणिजिटिकरणेइतिज्यंनात्क्विपिधर्मितिपरमोधर्मोयस्यएकदेशविकृतस्याऽनन्यत्वात् अनन्यपरमधर्माइत्याद्यर्थमकारोच्चारणं
बोध्यं।अन्यार्थे।अन्यार्थेगौणत्वेवर्तमानस्यस्त्रीप्रत्ययांतस्यनाम्नोह्रस्वोभवति।स्त्रीप्रत्ययस्येतिकिम्।अतिलक्ष्मीः।अतिचमूः।गौणत्वेकिम्।राजकुमारी।ब्रह्म राम
विद्या।किंचनपुंसकान्त्यमोलुगित्यतोलुगित्यनुवर्त्यवाक्यभेदेनव्याख्येयं।तथाहि अन्यतद्धितस्यार्थेवर्त्तमानेयत्स्त्रीप्रत्ययांतंतदवयवस्यस्त्रीप्रत्ययस्यलु ८८
क्स्यात्।यथापञ्चभिःपट्वीभिःक्रीतः पंचपटुःपंचभिर्ब्राह्मणीभिःक्रीतःपञ्चब्राह्मणःपंचभिरिंद्रा

णीभिः क्रीतः पंचेन्द्रः पंच अग्नयो यो देवता अस्येति पञ्चाग्निः पंचमनायो देवता अस्येति पंचमत्रुः अत्र हि संख्यापूर्वो द्विगुरित्यनेन तद्धितार्थे द्विगुः ततोऽणप्रत्य यः तस्य लुगबहुत्वे कचिदित्यनेन लुक् सन्तद्धितार्थे गौणस्य स्त्रीप्रत्ययस्यानेन लुक् क्रियते इत्यर्थः रूपवती भार्या यस्येति लौकिकविग्रहः ॥ ३ ॥ पुंवद्भाषि पू र्वस्य उक्तः पुमान् तुल्यप्रवृत्तिनिमित्ते येन तदुक्तपुंस्कं तस्योक्तपुंस्कस्य स्त्रीवाचकप्रत्ययांतस्य नाम्नः पुंवाचकस्येव रूपं भवति समानाधिकरणे स्त्री लिंगे समासस्य चरमावयवे रूढपदमुत्तरपदं तस्मिन्नुत्तरपदे सति एकविभक्त्यंतानामेकार्थनिष्ठत्वं समानाधिकरणत्वं किंत्वयद्यत्र उक्तः पुमान् तदुक्तपुं स्कमित्युच्यते तर्हि कुटीभार्यः द्रोणीभार्य इत्यादावतिप्रसंगः स्यात् कुटीद्रोणीशब्दाभ्यामर्थांतरे पुल्लिंगस्याप्रयुक्तत्वात् तथा च कुटः कोटे शिलाकुट्टे घटे गेहे कुटी सुरावित्रगुच्छकुम्भदासीकूटं पूर्द्वार यंत्रयोरिति हैमः द्रोणः पार्थगुरौ काके माणे द्रोणी तु नीवृति नौभेदे शैलसंधौ चेति हैमः उक्तपुंस्कस्येति किं छाया

पुम्वद्भा ॥ समासे समानाधिकरणे स्त्रीलिङ्गे परे पूर्वस्योक्तपुंस्कस्य स्त्रीलिङ्गस्य पुल्लिङ्गस्येव रूपम् रूपवद्भार्य्यः । उक्तपुंस्कस्य किम् छायाद्वितीयः । गङ्गाभार्य्यः । ऊ प्रत्ययान्तस्य न वामोरूभार्य्यः । पूरणार्थप्रत्ययान्ते प्रियादौ च न कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमीरात्रयः कल्याणीप्रियः ॥

१ द्वितीयः गंगाभार्या यस्य स गंगाभार्यः अत्रानयोर्नित्यस्त्रीत्वं अलौकिकविग्रहे रूपवती सु भार्या सु इति अन्या र्थे इत्यनेन ह्रस्वः पुंवद्भा इत्यनेनेपो निवृत्तिः ऊ प्रत्ययांतस्य तु न । उक्तपुंस्कस्य ऊ प्रत्ययांतस्य स्त्रीलिंगस्य पुंवद्भावो न भवति समानाधिकरणे स्त्रीलिंगे परे वामो रूः भार्या यस्य स वामोरूभार्यः । संहितशफलक्षणवामसहितसहादेरित्यूप्रत्ययः पूरणार्थप्रत्ययान्ते प्रियादौ च न । उक्तपुंस्कस्य स्त्रीलिंगस्य पुंवद्भावो न भवति समानाधिकरणे स्त्रीलिंगे पूरणार्थप्रत्ययांते प्रियादौ च परे अलौकिकविग्रहे कल्याणी सु पंचमी सु इति अन्यार्थे इत्यनेन ह्रस्वः पूरणार्थे पंचादेर्मट् इ ति मट् प्रत्ययः । पूरणार्थप्रत्ययांते इत्यनेन कल्याणी इत्यत्र पुंवद्भावो न ततः समासांतो प्रत्ययो यस्येतीकारलोपस्ततः स्त्रियामाप् कल्याणी पंचमा स्ताः प्रियामनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वसा कान्ता क्षान्ता समा चपला दुहिता वामा अबला तनया षोडश प्रियादयः कल्याणी प्रिया यस्य स कल्याणीप्रियः ॥

तरतमचरट्कल्पदेश्यदेशीयरूपपाशादौ पुंवत् एषु परेषु स्त्रियाः पुंवद्भवति अतिशयेन दर्शनीयेति॰ दर्शनीयतरा दर्शनीयतमा तरतमेयस्त्विष्ठा इति तरतमौ भूतदर्शनीयेति दर्शनीयचरी भूतपूर्वे चरडिति चरट् ष्ट्रित इतीप् ईषदसमाप्तौ कल्पदेश्यदेशीयाः इति कल्पदेशीयौ प्रशस्तादर्शनीयेति॰ दर्शनीयरूपा प्रशंसायां रूपप् इति रूपः कुत्सितादर्शनीयेति दर्शनीयपाशा कुत्सायां पाश इति पाशः आदिशब्दात् त्वतल्जातीयपथ्याप्यादयो ज्ञेयाः बह्वीषु बहुत्वबहनः पट्वीप्रकारवती पटुजातीया प्रकारे जातीय इति जातीयप्रत्ययः बहुधा न्कि सर्वादिबहुभ्यः प्रकारे धा अजाभ्यो हिता अजथ्या अजा विभ्याथ्य इति थ्य प्रत्ययः शसि बह्व्ल्पार्थस्य पुंवत् बह्वल्पार्थस्य स्त्रीप्रत्ययान्तस्य पुंवद्भावो भवति शसि बह्वीभ्यः इति बहुशः अल्पाभ्य इत्यल्प

तरतमचरट्कल्पदेश्यदेशीयरूपपाशादौ पुम्वत्॥ दर्शनीयतरा। दर्शनीयतमा। दर्शनीयचरी दर्शनीयपाशा। शसि बह्वल्पार्थस्य पुम्वत्। बह्वीभ्यो देहि बहुशः अल्पशः। त्वतयोर्गुणवचनस्य शुक्लाया भावः शुक्लत्वम्। शुक्लता कुक्कुट्यादीनामण्डादिषु। कुक्कुट्या अण्डं कुक्कुटाण्डम्। मृगपदम्। मृगक्षीरम्। काकशावः। सर्वादेः समासादौ पुम्वत्। दक्षिणस्याः पूर्वस्या अन्तरालं मध्ये या दिक् सा दक्षिणपूर्वा। सर्वाः प्रधानमस्येति सर्वमयः सर्वां करोति सर्वकरः॥

॥ शः बह्वल्पार्थान्कारकादिति शस् त्वतयोर्गुणवचनस्य गुणवचनस्य शब्दस्य पुंवद्भावो भवति त्वतयोः परयोः। कुक्कुट्यादीनामण्डादिषु। कुक्कुट्यादीनां पुंवद्भावो भवत्यण्डादिषु परतः। कुक्कुट्या अण्डमिति कुक्कुटाण्डम्। मृग्याः पदमिति मृगपदं मृग्याः क्षीरमिति मृगक्षीरं काक्याः शाव इति काकशावः सर्वादेः समासादौ पुंवत्। सर्वादेर्गणस्य पुंवद्भावो भवति समासादौ आदिशब्दात् कृत्तद्धितयङाद्यन्तधातुषु च समासे यथा दक्षिण। स्याः पूर्वस्याश्च दिशोर्मध्ये या दिक् सा दक्षिणपूर्वा तद्धिते यथा॰ सर्वाः प्रधानमस्येति प्राचुर्यविकारप्राधान्यादिषु मयडिति मयट् सर्वमयः। कृति यथा सर्वां करोतीति सर्वकरः। इत्यखवीति खः खिति परस्येति मुम्॥ यङाद्यन्तधातुषु यथा। सर्वामिच्छतीति काम्यच्चेति काम प्रत्ययः। सर्वकाम्यः॥ ६॥ ६॥ ६॥

यङ्‌मानिनोः पुंवत् एतयोः परतः स्त्रीलिंगस्य पुंवद्भवति। एनीवाचरतीति कर्तुर्यङ्‌ इति यङ्‌ ईपो निवृत्तौ तन्निमित्तकस्य नत्वस्यापि निवृत्तिः येइति दीर्घः एता यनाप्यते दर्शनी यां मन्यते इति मनेः कर्त्तरिणिनिः दर्शनीयमानी। प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति स्वभिन्नां कांचिद्दर्शनीयां मन्यते पासा दर्शनीयमानिनी इहापि पुंवत्‌ त्वणई प्‌ अकतद्धिताभ्यां कोपधस्य न। अकतद्धितप्रत्ययाभ्यां कृत्वा कोपधस्य स्त्रीलिंगस्य पुंवद्भा वो न भवति पचतीति। तृवुणा वितिवुण युवोरिन्‌ का देशे आवत इत्याप्‌ काप्यत इति तं पाचिका भार्या यस्य स पाचिका भार्यः। अन्यार्थे इति ह्रस्वः रसोऽस्त्यस्या इति अर्श आद्यच्‌ मत्वर्थे इति कः रसिका भार्या यस्येति रसिका भार्यः। अन्यार्थे इति ह्रस्वः एवं मद्रेषु भवा मद्रिका भवार्थे कः आप्‌ काप्यत इतीत्वं मद्रिके वाचरतीति मद्रिकां मन्यते इति मद्रि

यङ्‌मानिनोः॥ पुम्वत्‌। एनीवाचरति एतायते दर्शनीयां मन्यते दर्शनीयमानी चैत्रः। अकतद्धिताभ्यां कोपधस्य न। पाचिका भार्यः। रसिका भार्यः। संज्ञापूरणार्थे प्रत्ययोर्न। दत्ताभार्यः। पंचमी भार्यः। वृद्धिहेतोस्तद्धितस्यारक्तविकारार्थस्य न। माथुरी भार्यः। अरक्ते किम्‌। कषायेण रक्ता कन्या काषायी काषायी कन्या यस्य स काषायकन्यः। विकारे किम्‌। हेम्नो विकारो हैमी हैमी मुद्रिका यस्येति हैममुद्रिकः

कामानिनी अत्र यङ्‌मानिनोरिति पुंवद्भावे प्राप्ते निषेधः संज्ञापूरणार्थे प्रत्ययोर्न अनयोः पुंवद्भावो न भवति दत्ता भार्या यस्येति दत्तां मन्यते इति स्त्रियां पुंसि च संज्ञाभूतो यं दत्तशब्दो भाषितपुंस्कोऽस्ति दत्ता भार्यः दत्ता मानिनी पंचमी भार्या यस्येति कुत्सिता पंचमीति पंचमी भार्यः पंचमी पाशा पंचादेर्मडिति संख्यापूरणे मट्‌ पंचमी पाशेऽत्यत्र तरतमेति प्राप्ते निषेधः वृद्धिहेतोस्तद्धितस्याऽरक्तविकारार्थस्य न आदिस्वरस्येति सूत्रेण विहिता या वृद्धिस्तस्या हेतुर्यो ऽरक्तविकाराव र्थौ यस्य स रक्तविकारार्थस्तस्य रक्तविकारार्थस्य तद्धितस्य पुंवद्भावनिषेधो न भवति मथुरायां भवा माथुरी भवार्थे ऽण आदिस्वरस्येति वृद्धिः त्वणइतीप्‌ माथुरी भार्या यस्य स माथुरी भार्यः। माथुरीवाचरतीति माथुरीयते कर्तुर्यङ्‌ इति यङ्‌ माथुरीं मन्यते इति माथुरीमानिनी अत्र पुंवद्भावो न। वृद्धिहेतोरिति किं। मध्ये भवा मध्यमा। मध्यान्म इति भ

किं।काण्डं लुनातीति काण्डलावी।कार्येऽणित्यण् कर्मण्यण् क्रूरयं कांडलावी भार्या यस्य स कांडलावभार्यः।आदिस्वरस्येति विहिता वृद्धिरिति किं।तत्परिमाणमस्यास्तीति ताव,
ती एतत्किं यत्तद्भ्य इति वतुः यत्तदेतदामित्याकारः।तावती भार्या यस्य स तावद्भार्यः।अरक्तविकारार्थस्येति किं।कषायेण रक्ता काषायी कारकान्तक्रियायुक्ते इति
तेन रक्तमित्यर्थेऽण् त्र्यण् इतीप् काषायकन्थः पुंवद्भावादीपो निवृत्तिः हेम्नो विकारो हैमी।विकारार्थेऽण् त्र्यण् इतीप् हैमी मुद्रिका यस्य स हैममुद्रिकः पुं
वद्भावः॥ ॥पुटि सति पुंवत् वृद्धिहेतोस्तद्धितस्याऽरक्तविकारार्थस्य स्त्रीप्रत्ययान्तस्य पुंवद्भावो भवति पुडागमे कृते सति व्याकरणमधीते वेत्ति वा इत्यर्थे अ
ण् तसंधिय्वोरितीट् पश्चाद्वृद्धिः त्र्यण् इतीप् वैयाकरणी २ भार्या यस्य स वैयाकरणभार्यः।सुष्ठु अश्वो यस्य स्वश्वः स्वश्वस्याऽपत्यं स्त्री ऊढ् वृद्धी सौवश्वी २ भा

पुटि सति पुम्वत्।वैयाकरणभार्य्यः।स्वाङ्गादीपो मानिनि सुकेशी भार्य्या यस्य स सुकेशीभार्य्यः।मानिनि तु सुकेशमानिनी।जातिवाचिन
स्त्रीप्रत्ययान्तस्य न शूद्राभार्य्यः ब्राह्मणीभार्य्यः इत्यादि गोः गोशब्दस्यान्यार्थे वर्तमानस्य ह्रस्वो भवति पञ्चगावो यस्य स पञ्चगुः संख्या
सुव्याघ्रादिपूर्वस्य पादशब्दस्यान्तलोपः॥

र्या यस्य स सौवश्वभार्यः।स्वांगादीपोऽमानिनि स्वांगात्परस्य ईप्प्रत्ययस्य पुंवद्भावो न भवति मा
निन्शब्दे परे तु पुंवद्भावो भवतीत्यर्थः।सुष्ठु केशा यस्याः सा स्वांगाद्वेतीप् सुकेशी २ भार्या यस्य स सुकेशीभार्यः स्वांगात्किम् पट्वी भार्या यस्य स पटुभार्यः ई
प् इति किं न विद्यन्ते केशा यस्याः सा अकेशा सहनञ्जितीप् निषेधः।अकेशा भार्या यस्य स अकेशभार्यः।पुंवद्भावः सुकेशीं मन्यते यः स सुकेशमानी स्त्री तु सुकेश
मानिनी जातिवाचिनः स्त्रीप्रत्ययान्तस्य न जातिवाचिशब्दात्परस्य स्त्रीप्रत्ययस्य पुंवद्भावो न भवति।शूद्रा भार्या यस्य स शूद्राभार्यः।अजादेरित्याप् ब्राह्म
णी भार्यः जातेरितीप्।गोः॥अन्यार्थे वर्तमानो यो गोशब्दस्तदंतस्य नाम्नो ह्रस्वो भवति।पंच गावो यस्य स पंचगुः।पंचभिर्गोभिः क्रीतः स पंचगुः क्रीतार्थे इक
स्य लुक् च।अन्यार्थे किं।अतिशयितो गौरतिगौः संख्यासुव्याघ्रादिपूर्वपादशब्दस्यांतलोपः।संख्यासुपूर्वस्य व्याघ्रादिपूर्वस्य च पादस्यांतस्य लोपः स्यात्।बहु
भार्या यस्य स ब्राह्मणी ॥२

सहस्रं पादा यस्य सः सहस्रपाद्‌ इ शसादौ स्वरे ईपीकारे तद्धितयस्वरे च पदादेशः अश्र पादशब्दस्य पदादेशः स्यात्‌ शसादौ स्वरे सहस्रपदः ईपि द्विपदी पादौ वे
ती पृई कारे व्याघ्रपदी कुले तद्धितयस्वरे वैयाघ्रपद्यः । ण्य युटौ तद्धितस्वरे वैयाघ्रपदः अणयुटौ अन्यपदार्थाभावे समानाधिकरणाभावे च क्वचिद्बहुव्रीहिर्भवति ।
यथा पुत्रेण सहवर्तते यः स सपुत्रः सह इत्यस्य तृतीयांतेन समासः । संख्येयार्थे यासंख्या यासहाः व्यया सन्नादूराधिकसंख्याः समस्यंते स बहुव्रीहिर्भवति द
शानां समीपे ये संति ते उपदशाः नव एकादश वेत्यर्थः उपशब्दो हि समीपिनि च वर्तते समीपे ऽव्ययीभावः । समीपिनि तु बहुव्रीहिर्भवतीति आसन्ना विंशतेर्ये संति
ते आसन्नविंशाः ड प्रत्ययः विंशतेस्तिलोपो डिनीति तिलोपः अदूरा त्रिंशतः इति अदूरत्रिंशाः अधिका चत्वारिंशति अधिकचत्वारिंशाः द्वौ वा त्रयो वा द्वित्राः वार्थेऽयं
बहुव्रीहिः द्विरावृत्ता दश विंशतिरित्यर्थः सुप्रत्ययार्थेऽयं बहुव्रीहिः दिङ्‌नामान्यंतराले समस्यंते स बहुव्रीहिः दक्षिणपूर्वा नेषु गृहीत्वा इदं युद्धं प्रवृत्तमित्यर्थे नेन प्र

सहस्रं पादा यस्य स सहस्रपात्‌ शसादौ स्वरे तद्धितयस्वरयोरीपीकारे च पदादेशः । सहस्रपदः । व्याघ्रपदी । कुले । वैयाघ्रपदः । वैयाघ्रप
द्यः । द्विपाद्‌ द्विपादौ । द्विपादः । सुपात्‌ । व्याघ्रपात्‌ । दाडकाः । मध्यान्हः । पूर्वाह्नः ॥

हृत्येदं युद्धं प्रवृत्तमित्यर्थे तेन प्रहृत्येन प्रहृत्येदं युद्धं प्रवृत्तमित्यर्थे च
सन्नम्यंते ये स्तृतीयांतयोश्च पदयोः समासो भवति क्रियाव्यतिहारे द्योत्ये स बहुव्रीहिः अत्र पूर्वपदस्य दीर्घश्च वक्ष्यमाणः समासांत इ प्रत्ययः । इ प्रत्ययांतस्याव्यय
संज्ञा च केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तमिति केशाकेशि दंडैश्च दंडैश्च प्रहृत्येदं युद्धं प्रवृत्तमिति दंडादंडि मुष्टिभिर्मुष्टिभिः प्रहृत्येदं युद्धं प्रवृत्तमिति मुष्टीमु
ष्टि बाहुषु बाहुषु गृहीत्वा इदं युद्धं प्रवृत्तमिति वोऽव्ययस्वरे इत्यवादेशः । बाहूबाहवि अत्र च समासांतप्रत्ययाउच्यंते पूरणार्थप्रत्ययांते यत्‌ स्त्रीलिंगं तदंतात्‌ प्र
माण्यंताच्च बहुव्रीहेरः कल्याणी पंचमी रात्रयः । अत्र संख्यापूरणे मट्‌ पूरणार्थप्रत्ययांते इति पुंवद्भावे निषेधः स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः नित्यस्त्रीत्वात्‌ पुंवद्भावः प्र
मानि अनयेति प्रमाणी करणे युट्‌ प्रधाने कार्यसंप्रत्यय इति न्यायात्‌ प्रधाने पूरणार्थप्रत्ययांते स्त्रीलिंगे एवायं प्रत्ययः पुंवद्भावनिषेधश्च रात्रिः पूरणार्थप्रत्ययवाच्या चेत्सुकोदा

पू॰
सि॰ च॰
टी॰ तु॰
९१

नक्षत्रार्थे नेतृशब्दांताद् बहुव्रीहेरः। मृगो मृगशीर्षं नक्षत्रं चांद्रो नेता नायको यासां ताः मृगनेत्रा रात्रयः। अन्तर्बहिर्भ्यां च लोम्नः। पूर्वपदाल्लोमन्नंताद् बहुव्रीहेरः। अंतर्लोमः
बहिर्लोमः। नोवेति टिलोपः। नासिकांताद् बहुव्रीहेः स्थूलपूर्वात्तु न। द्रुरिव नासिकायस्येति सहादेरिति नासिकाया नस्। द्रुणसः। खरणा नासिका यस्य स खरणसः। उभयत्र सं
ज्ञायाम् संज्ञायां खुरखराभ्यां नासिकाया वा अप्रत्ययः। खुरणसः। खुरणाः। खरणसः। खरणाः। उपसर्गाच्च नासिकाया अः असंज्ञायाम्। उन्नता नासिका यस्य स उन्न
सः। प्रगता नासिका यस्य स प्रणसः। स्थूलपूर्वात् किं स्थूलनासिकः। सुप्रातसुश्वसुदिवशारिकुक्षिचतुरश्रैणीपदाजपदप्रोष्ठपदाः अप्रत्ययांता निपात्यंते ब
हुव्रीहौ। शोभनं प्रातरस्येति सुप्रातः। रनिवृत्तिर्निपातनात्। शोभनं श्वोऽस्येति सुश्वः। सनिवृत्तिर्निपातनात्। शोभनं दिवाऽस्येति सुदिवः। शारेरिव कुक्षिरस्येति शा
रिकुक्षः। चतस्रोऽश्रयोऽस्येति चतुरश्रः। तालव्यशसदंत्यः सो निपातनात् एण्या इव पादावस्येति एणीपदः। अजपदः। प्रोष्ठपदः। निपातनात् पदादेशः। नञ्दुःसुपूर्वपदाद् हलि
सक्थिशक्त्यंताद् हेरो वा। अहलः। अहलिः। असक्थः। असक्थिः। अशक्तः। अशक्तिः। ईदूदंतस्त्रीलिंगोत्तरपदाच्च बहुव्रीहेः कः। कल्याणी पंचमी रात्रि र्यस्मिन् स क
ल्याणपंचमीकः पक्षः। बहवः कर्तारो यस्य स बहुकर्तृकः प्रासादः। उरःप्रभृत्यंताद् बहुव्रीहेः कः। व्यूढं विशालमुरो यस्य सः व्यूढोरस्कः। प्रियं सर्पिर्यस्य स प्रियसर्पि
ष्कः। वाचस्पत्यादित्वात् सत्वं। इह हीरः। प्रभृतौ पुमान्। अनड्वान्। पयः। नौः। लक्ष्मीरित्याद्येकवचनांताद्वकः। द्विवचनबहुवचनांतेभ्यस्तु वैकल्पिकः को भवतीति विवे
कः। पथ्यादिपुमान्। द्विपुंस्कः। नञ्पूर्वादर्थान्नो बहुव्रीहौ अनर्थकः। इन्नंताद् बहुव्रीहेः कः स्त्रियां बहुदण्डिका नगरी। अनुक्तसमासांताद् बहुव्रीहे र्वा कः। महायशस्
कः। महायशाः। आवंतस्य वा ह्रस्वः के। बहुमालाकः। बहुमालकः। काभावे बहुमालः। ईयसप्रत्ययांतोत्तरपदाद् बहुव्रीहेर्न कः। बहवः श्रेयांसोऽस्य स बहुश्रेयान्।
अन्यार्थे इति ह्रस्वे प्राप्ते ईयसप्रत्ययांतस्य स्त्रीलिंगस्य ह्रस्वो न बहुव्रीहौ। बह्व्यः श्रेयस्योऽस्य स बहुश्रेयसी। बहुव्रीहौ किम्। अतिश्रेयसिः। संख्येये बहुव्रीहे र्डौ
नतु बहुगणाभ्याम्। उपदशाः। बहुगणाभ्यां किम्। उपबहवः। उपगणाः। स्वांगवाचिसक्थ्यक्ष्यंताद् बहुव्रीहेः षः। टित्वात् ङीप्। दीर्घसक्थिनी यस्य स दीर्घसक्थः। जल
जाक्षी। स्वांगवाचीति किम्। दीर्घसक्थि शकटं। स्थूलानि अक्षीणि पर्वाणि यस्याः सा स्थूलाक्षा वेणुयष्टिः। वक्ष्यमाणो डप्रत्ययः। अंगुल्यंताद् बहुव्रीहेः षो दा राम
रुण्यर्थे। पंचांगुलयो यस्य तत् पंचांगुलं दारु। अंगुलिसदृशावयवं धान्यादिविक्षेपकाष्ठं। बहुव्रीहेरिति किम्॥ ॰ ॥ हुर्छ ॥ ॥ ९१

द्वे अंगुली प्रमाणमस्या इति द्व्यंगुला यष्टिः' तद्धितार्थे द्विगुः' प्रमाणे द्वयसज्दघ्नञ्मात्रच् इति मात्रच् तस्य लुक् च न तु समासांतोऽप्रत्ययः' द्वारुलि किं' पंचांगुलि हे
स्तः' द्वित्रिपूर्वात् मूर्ध्नो बहुव्रीहेः षः' द्विमूर्द्धः' त्रिमूर्द्धः' नोवेति टिलोपः' सुहरिततृणसोमेभ्यः' प्रा इजंभात् बहुव्रीहौ जंभो भक्ष्ये चरंते चेति· शोभनो जंभो यस्यस
सुजंभा हरितजंभा तृणजंभा भोभ स्पय स्यं तृणमिव जंभा रंता अस्येति वा तृणजंभा सोमजंभा' व्याधयोगे दक्षिणेर्मन्यन्नंतं निपात्यते बहुव्रीहौ दक्षिणे ईर्मे व्रणं यस्य सदृ
क्षिणेर्मा मृगः व्याधेन कृतव्रण इत्यर्थः' क्रियाव्यतिहारे बहुव्रीहेरिः' केशाकेशि' मुशलामुशलि' प्रहरणेऽर्थे' द्विदंडि द्विमुशलि' उभौहस्ति उभयाहस्ति' इति इप्रत्ययान्ता
नानि निपात्यंते बहुव्रीहौ' द्वौ दंडौ यस्मिन् प्रहरणे तत् द्विदंडि' द्विमुशलि' उभाहस्ति' उभयाहस्ति' निपातनाद्दा' उभयेति· इति बहुव्रीहिः' अथ द्विगुतत्पुरुषकर्मधारयस
मासांताः' गोरतद्धितलुकि' द्विगुतत्पुरुषकर्मधारयाट्टोन तु तद्धितलुकि' पंचगवं' तद्धितलुकि' पंचभिर्गोभिः क्रीत इति पंचगुः' क्रीतार्थे ठकस्तस्य लुक् च' देवगवी परमगवी सं
ख्याव्ययादेरंगुल्यंतात् द्विगुतत्पुरुषकर्मधारयाट्टः' द्वे अंगुली प्रमाणमस्येति द्व्यंगुलं दारु' प्रमाणे द्वयसजिति मात्रच्' तस्य लुक् च' निर्गतमंगुलिभ्य इति निरंगुलं' एकांगु
लां सर्वैकदेशसंख्यातपुण्यसंख्याऽव्ययेभ्यो रात्रेरः' द्विगुतत्पुरुषकर्मधारये' सर्वा चासौ रात्रिश्चेति रात्रान्हाहानाः इति पुंस्त्वं सर्वरात्रः' रात्रेः पूर्वमिति पूर्वरात्रः' संख्या
तरात्रः' पुण्यरात्रः। द्वयोः रात्र्योः समाहार इति संख्यापूर्वं रात्रमिति क्लीबता' द्विरात्रं' अतिक्रांतो रात्रिमित्यतिरात्रः' राजाहःसखिभ्यष्टच्' द्विगुतत्पुरुषकर्मधारये' कविराजः
'उत्तमाहः' रात्रान्हाहानाः इति पुंस्त्वं' पुण्याहं' पुण्यसुदिनाभ्यामिति क्लीबता' कृष्णसखः' पंचाह्नं' मुख्यवाचिन उरसष्टच्' तत्पुरुषे' अश्वानामुर इव' इत्येवेत्यश्वोरसः' मुख्योऽ
श्व इत्यर्थः। अनोऽश्मायःसरोभ्यष्टोजातिसंज्ञार्थे' तत्पुरुषकर्मधारये' उपानसं' अमृताश्मः' कालायसः' मंडूकसरसमिति जातिः' महानसं' पिंडाश्मः' लोहिताय
सं जलसरसमिति संज्ञा' ग्रामकौटाभ्यां तक्ष्णः टच् तत्पुरुषकर्मधारये· ग्रामस्य तक्षा ग्रामतक्षः' साधारण इत्यर्थः' कुट्यां भवः कौटः स्वतंत्रः। कौटश्चासौ तक्षा च कौटतक्षः
अतेः शुनष्टच्' तत्पुरुषे' श्वानमतिक्रांतो जवेनेत्यतिश्वो वराहः' अतिश्वी राजसेनेत्यर्थः' अप्राणिविषयकोपमानवाचिनः शुनष्टच्' तत्पुरुषे' आकृष्यतेऽनेन खलादिगतं
धान्यमित्याकर्षः' काष्ठविशेषः' आकर्षः श्वेवेति आकर्षश्वः' अप्राणिविषयकेति किं' वानरः श्वेवेति वानरश्वा' उत्तरमृगपूर्वोपमानात् सक्थ्नः' मृगसक्थं' पूर्वसक्थं।
फलकमिव सक्थि' फलकसक्थं' नौशब्दांतात् द्विगोष्टच् न तु तद्धितलुकि' द्विनावं' त्रिनावं न तु तद्धितलुकीति किं' पंचभिर्नौभिः क्रीत इति पंचनौः' अत्र क्रीतार्थे ठक

स्तस्य लुक् च अर्द्ध पूर्वीन्नाव धस्तत्पुरुषे' नावोऽर्द्धमित्यर्द्धं नावं क्लीबत्वं लोकात् 'खारी शब्दांताद् द्विगो रर्द्ध पूर्वात्खार्यंतात् तत्पुरुषान्नु वा टः 'द्विखारं टाभावे
द्विखारि स्त्रीबत्वं लोकात् अर्द्ध खारं' द्वंद्व तत्पुरुषयोरितिपरवल्लिंगे 'अर्द्ध खारी' द्विगोर्द्वित्रिभ्यामंजले ष्टो वा 'नेतु तद्धितलुकि' द्व्यंजलं' द्व्यंजलिं न तु तद्धित
लुकीतिकिम्' द्वाभ्यामंजलिभ्यां क्रीत इति द्व्यंजलिः 'क्रीतार्थे ठकस्तस्य लुक् च' 'ब्रह्मशब्दांतात्तत्पुरुषाट्टोजानपदे' सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः' कुमहद्भ्यां ब्रह्मणष्टो वा
तत्पुरुषकर्मधारये। कुत्सितो ब्रह्मा कुब्रह्मः कुब्रह्मा महाब्रह्मः महाब्रह्मा ब्रह्मणपर्यायो ब्रह्मन् शब्दः संख्यातात्तत्पुरुषाड् डः निर्गतानि त्रिंशत इति
निस्त्रिंशानि वर्षाणि चैत्रस्य निर्गतस्त्रिंशतोऽगुलिभ्य इति निस्त्रिंशः खड्गः॥ इति द्विगुतत्पुरुषकर्मधारयसमासांताः॥ अथ सकलसमाससाधारणसमासांता ऋक्पूरब्
धूःपथामानसे याधूस्तत्र तु न' ऋचोऽर्द्धमिति अर्द्धर्चः अर्द्धर्चादय इति पुंस्त्वं' अनृचबह्वृचशब्दावध्येतर्य्येव नेह अनृक्सामं बह्वृक्सूक्तं वैकल्पिकप्रत्ययस्तु भव
त्येव अनृचकं बह्वृचकमिति विष्णोः पूरिति विष्णुपुरं' क्लीबत्वं लोकाद्विमलापं सरः' द्व्यंतरुपसर्गेभ्यः ऋतसमासांतस्याऽपस्या देरीः द्विर्गता आपो यस्मिन्निति द्वीपं अंतर्गता
आपोऽस्मिन्निति अंतरीपं प्रतिकूला आपोऽस्मिन्निति प्रतीपं संगता आपोऽस्मिन्निति समीपं कथं तर्हि समापो देवयजनमिति' समा आपो यस्मिन्निति समापः देवाईज्य
तेऽस्मिन्निति अंतरीपप्रतिकूला आपोऽस्मिन्निति प्रतीपं संगता आपोऽग्रहणान्नेह स्वप्सरः पूजनार्थेति निषेधान्नसमासांताऽभावः अवर्णांताद्रुपसर्गान्नतसमा
सांतस्यापस्या देरीर्वा प्रेपं परं पं प्रापं परापं त्रानोः ऋतसमासांतस्यापस्या देरूः। अनुगता आपोऽस्मिन्निति अनूपो देशः। जलप्रायमनूपं स्यादित्यमरः। राजधुरा अक्ष
इति किं। अक्षधूः। दृढधूरक्षः। सखिपथो रम्यपथो देशः' प्रत्यऽन्वऽवपूर्वाभ्यां सामलोमभ्यामः प्रतिसामम्' अनुसामं। अवसामं। प्रतिलोमं॥ अनुलोमं। अवलोमं। बहु
व्रीह्यव्ययीभावप्रादिसमासा अत्र कृष्णोदक्पांडुसंख्यापूर्वाया भूमेरः कृष्णभूमः' उदग्भूमः' पांडुभूमः' द्विभूमः' त्रिभूमः प्रसादः' बहुव्रीहावेवने' संख्यायानदीगो
दावरीभ्यामः पंचनदं सप्तगोदावरं' अव्ययीभावे एतौ नाभेरः' पद्मनाभावस्येति पद्मनाभः अचक्षुः पर्यायादक्ष्णोऽप्रत्ययः गवांकिरणा
नामक्षिरंध्रमिवेति गवाक्षः' ब्रह्महस्तिपल्यराजभ्यो वर्चसोऽप्रत्ययः' ब्रह्मवर्चसं हस्तिवर्चसं पलं मांसमर्हतीति पल्यो मासभोजी' पल्यवर्चसं राजवर्चसं षष्ठीतत्पुरु
षोत्र अवसमंधेभ्यस्तमसोऽप्रत्ययः अवहीनं तम इति अवतमसं समंतात् तम इति संतमसं अंधयतीति अंधं अंधं च तत्तमश्च अंधतमसं ध्वक्षुपघातेत्त्वुरादिरस्मात्पचाद्यच् प्रत्ययः ॥ ६॥

अंधंगाढंतमस्त्वंधतमसं 'श्वसश्शब्दाद्वसीयः' श्रेयोभ्यामः वसुशब्दः प्रशस्तवाचीतस्मादीयसुप्रत्ययेवसीय इति · श्वसश्शब्दस्तुकालवाच्यप्यत्राशीर्विषयताया द्योतको
स्ति 'श्वोवसीयसं श्वः श्रेयसं कर्मधारयोऽत्र · अन्ववतप्तेभ्यो रहः शब्दाद्दः रह इत्यनेनाऽप्रकाशमुच्यते अनुगतं रहः इत्यनुरहसं · अवहीनं रहः इत्यवरहसं' अनुगतं र-
होऽस्मिन्नित्यादिबहुव्रीहिर्वा · तप्तंचतद्रहश्चेति तप्तरहसं · परेणानधिगम्यमित्यर्थः प्रतेरुरसश्शब्दाद्दः उरसि इति प्रत्युरसं · सप्तम्यर्थे अव्ययीभावोयं 'अप्रत्ययांत-
मनुगवं दीर्घत्वंनिपात्यते · अनुगवं यानं गोदैर्घ्यसदृशदैर्घ्योपलक्षितमित्यर्थः 'उपसर्गादध्वशब्दाद्दः प्रगतोऽध्वानमिति प्राध्वो रथः' अचतुरविचतुरसुचतुरत्रिचतुरउ-
पचतुरस्त्रीपुंसधेन्वऽनडुह ऋक्सामवाङ्मनसाऽक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाऽहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषऋक्-
यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः 'अप्रत्ययांतानि पात्यंते' अविद्यमानानि चत्वार्यस्येति अचतुरः 'विचतुरः' सुचतुरः 'त्रयश्चत्वारो वेति त्रिचतुरः' चतुर्णां समीपे ये
संतिते उपचतुराः 'एते पंच बहुव्रीहयस्तेन तत्पुरुषे अचत्वारो विचत्वार इत्येवं भवतीतिभावः स्त्रीपुंसौ धेन्वनडुहौ ऋक्सामे 'वाङ्मनसे' अक्षिणी च भ्रुवौ च अक्षिभ्रुवं
प्राण्यंगत्वादेकवद्भावः। दाराश्च गावश्च दारगवं। ऊरू च अष्ठीवंतौ च ऊर्वष्ठीवं 'निपातनाट्टिलोपः' जानूरुपर्वाष्ठीवदऽस्त्रियामित्यमरः 'सक्थि क्लीबे पुमानूरुरिति
चामरः 'पदष्ठीवं निपातनात् पादस्य पद्प्राण्यंगत्वादेकवद्भयत्र 'नक्तं च दिवा च नक्तंदिवं' रात्रौ च दिवा च रात्रिंदिवं 'रात्रेर्मान्तत्वं निपातनात्' अहनि च दिवा चेति अ-
हर्दिवं 'वीप्सायां द्वंद्वो निपात्यते · अहन्यहनीत्यर्थः 'एते एकादश द्वंद्वाः 'रजः अपि अपरित्यज्येति सरजसं' साकल्येऽव्ययीभावोयं · बहुव्रीहौ तु रजसा सह वर्तते
इति सरजसं 'पंकजमिति' निश्चितं श्रेय इति निःश्रेयसं तत्पुरुष एवायं बहुव्रीहौ तु न 'निश्चितं श्रेयो येनेति निःश्रेयान्' पुरुषः 'पुरुषस्यायुः पुरुषायुषं तत्पुरुषोऽयं।
द्व्यायुषं त्र्यायुषं एतौ द्विगू 'ऋग्यजुषं' द्वंद्वोऽयं 'जातोक्षः' महोक्षः 'वृद्धोक्षः' एते त्रयः कर्मधारयाः 'शुनः समीपं उपशुनं' टिलोपाभावः। संप्रसारणं च निपात्यतेऽव्य-
यीभावे 'गोष्ठे श्वेति गोष्ठश्वः' सप्तमीतत्पुरुष एवायं षष्ठीतत्पुरुषे तु न 'गोष्ठश्वा' पूजनार्थे स्वतिपूर्वकान्नाम्नः समासांतान बहुव्रीहौ तु भवंति · सुराजा · अतिराजा पूजना-
र्थे इति किं 'गामतिक्रांतोऽतिगवः' बहुव्रीहौ किं सुसक्थः 'सुष्ठु सक्थि नीयस्य सः' सुष्ठु अक्षिणी यस्य सः 'स्वक्षः' षप्रत्ययोऽत्र 'निन्दार्थके तिकिम् पूर्वान्नाम्नः समासांतान कु-
त्सितो राजा 'किं राजा 'किं सखा किं गौः 'निंदार्थके इति किं' किं राजः 'किं सखः किं गवः' नञ्तत्पुरुषात्समासांतान 'अराजा' असखा तत्पुरुषात्॥ ६ ॥ ७ ॥ ८ ॥

पू॰
सि॰ चं॰
टी॰ सु॰
८३

किं नविद्यते धूर्यस्य तत् अधुरं शकटं नञ्पूर्वपथिशब्दाद्वा समासांतस्तत्पुरुषे अपथं अपंथाः अपथं तत्पुरुषे क्लीबमिति क्लीबत्वं तत्पुरुषे किं अपथो देशः बहुव्री
हिरत्र अपथं अर्थाभावेऽव्ययीभावोऽयम् ॥ॐ॥ इति सकलसमाससाधारणाः प्रत्ययाः ॥ॐ॥ अथप्रकृतमनुसरामः । अन्होमध्यमिति मध्यान्हः । अन्हः पूर्वइति पूर्वान्हः
कवीनां राजेति कविराजः कृष्णस्य सखेति कृष्णसखः राजाहः सखिभ्यष्टइति प्रत्ययः ॥ ॥ नोवा नांतस्य नाम्नष्टेर्लोपस्तद्धिते येस्वरे च अत्र समासांतास्तद्धितान
भूता ज्ञेयाः अत्र वेति व्यवस्थार्थं तेन न क्वचिट्टिलोपः क्वचिदुपधालोपः क्वचिन्नोभयं टिलोपो यथा उडुलोम्नोपत्यमिति औडुलोमिः राजन् कमैति राज्यं कविराजः उ
पधालोपो यथा वृत्रघ्नोऽपत्यं वार्त्रघ्नः नस्नणोऽपत्यं नास्नणः अन्हः पूर्वः पूर्वान्हः नोभयं यथा ब्रह्मणोऽपत्यं ब्राह्मण इत्यादि देवानां गौर्देवगवी परमाचासौ गौश्चपर
मगवी गोन्ताद्द्विगुतत्पुरुषकर्मधारयाट्टइति टः राजपुरं एकधुरं सर्वधुरः कर्मधारये पुंवत् ऋक्पूरब्धूःपथामइत्य प्रत्ययः वाक् च मनश्च वाङ्मनसं अच

नोवा नान्तस्य टेर्लोपस्वरे यकारे च परे वाग्रहणात् क्वचिन्न क्वचिदुपधालोपः कविराजः कृष्णसखः देवगवी परमगवः राजपुरम् ए
कधुरम् सर्वधुरम् वाङ्मनसे दक्षिणापथः अहोरात्रः द्वित्राः पञ्चषाः बहुकर्तृकः बहुलक्ष्मीकः स्त्रीपुंसौ ऋक्सामे महोक्षः वृद्धोक्षः द्व्यायु
षम् त्र्यायुषम् ग्रामतक्षः फलकसक्थम् मृगसक्थम् पूर्वसक्थम् अर्द्धखारम् अर्द्धनावम् । तुरविचतुरेत्यनेनाप्रत्ययो द्वंद्वे दक्षिणापथः

ऋक्पूरब्धूःपथामइत्यऽप्रत्ययः अहश्च रात्रिश्च अहोरात्रः अहःपूर्वाद्रात्रिशब्दादः समाहारेइत्यप्रत्ययः रात्रान्हाहांनाइति पुंस्त्वं द्वौ वा त्रयो वा द्वित्राः पंच
वा षट् वा पंचषाः संख्येये बहुव्रीहे डइति डः बहुकर्तृकः बहुलक्ष्मीकः ईदूदंत स्त्रीलिंगोत्तरपदाद्दंतोत्तरपदाच्च बहुव्रीहेः कइति कः प्रत्ययः स्त्रीपुंसौ
ऋक्सामे अचतुरविचतुरेत्यनेन द्वंद्वे डप्रत्ययः महोक्षः जातोक्षः वृद्धोक्षः अचतुरविचतुरेत्यनेन कर्मधारयेऽप्रत्ययः पुरुषायुषं अचतुरविचतुरेत्यनेन त
त्पुरुषेऽप्रत्ययः द्व्यायुषं त्र्यायुषं अचतुरेत्यनेन द्विगावप्रत्ययः ग्रामतक्षः ग्रामकौटाभ्यां तक्ष्णष्टइति तत्पुरुषे टः फलकसक्थः मृगसक्थः पूर्वसक्थः उत्तरमृगपू
र्वोपमानात्सक्थ्नष्टस्तत्पुरुषे इति टप्रत्ययः । फलकमिव सक्थि अस्येति बहुव्रीहौ तु स्वांगवाचि सक्थ्यक्ष्यंताद्बहुव्रीहेः षइति षप्रत्ययो बोध्यः अर्द्धखारं खारीश

राम
८३

कर्मधारयस्तुल्यार्थे समस्यमानयोर्द्वयोः पदयोर्विशेषणविशेष्यधर्मयोर्यत्र परस्परं तुल्यार्थता तत्रैव समासो भवति नान्यत्र भ्रमरादिः साधारणरूपेण प्रतिपन्नो नीलार्थः उत्पलार्थेनोत्पलेस्याप्यनेकादिसाधारणरूपेण प्रतिपन्न उत्पलार्थोपि नीलार्थेन नीलेस्याप्यन इति भवति द्वयोस्तुल्यार्थता पदयोर्द्वयं पदद्वयं तस्मिन् एकस्मिन्नर्थे निष्ठा वृत्तिर्यस्य भिन्नप्रवृत्तिनिमित्तकस्य पदद्वयस्य तदेकार्थनिष्ठं तस्मिन् सति य एकार्थीभावः स कर्मधारयसंज्ञकः समासो भवति भिन्नार्थो नामैकरूपेणैकत्रान्वयविवक्षायां द्वन्द्वः भिन्नार्थविशेष्यविशेषणभावेनैकत्रान्वयविवक्षायां कर्म्मधारय इत्यर्थः विशेष्यतेऽनेनेति विशेषणे करणे युट् भेदकं व्यावर्त्तकमिति यत्साधारणाकारेण प्रतिपन्नं बहुप्रकारं वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्यैकस्मिन् प्रकारे व्यवस्थापयति तद्विशेषणं व्यवस्थाप्यमानं तु विशेष्यं भेद्यं प्रधानमिति अत्र लौकिकविग्रहे भेदद्योतकश्चशब्दो धर्मभेदद्योतनाय प्रयुज्यते धर्म्मभेदबोधनाय सर्वादिश्च द्रव्यगुणक्रियासन्निधाने द्रव्य।

कर्म्मधारयस्तुल्यार्थे। पदद्वये तुल्यार्थे एकार्थनिष्ठे सति कर्म्मधारयः समासो भवति। कर्म्मधारये पूर्ववत्। नीलमुत्पलम्। नीलोत्पलम्। रक्तलता। पुंस्कोकिलः। ब्राह्मणभार्या। दत्तभार्या। सुकेशभार्या। स्नातानुलिप्तः। एकनाथः। सर्वयाज्ञिकाः। जरन्नैयायिकाः। पुराणमीमांसकाः।

वाचकस्यैव प्राधान्यमित्यतो द्रव्यस्य प्राधान्यात्तु गुणक्रिययोश्चाप्राधान्याद्गुणद्रव्ययोः क्रियाद्रव्ययोश्च समासे गुणक्रिययोरेव पूर्वनिपातो बोध्यः। यत्र तु गुणशब्दयोः क्रियाशब्दयोर्गुणक्रियाशब्दयोर्वा समासस्तत्रानियम एव खञ्जकुब्जः कुब्जखञ्जः पाचकपाठकः पाठकपाचकः पाचकखञ्जः। द्रव्यशब्दयोरुपनिपाते तु न नियमः शिंशपावृक्षः। इह वृक्षत्वस्य व्यापकत्वादप्राधान्यं शिंशपात्वस्य तु विपर्ययात् प्राधान्यमित्येवं सर्वत्र विशेषणस्य पूर्वनिपातो बोध्यः हसादिरिति निर्देशाद्विशेष्यस्यापि पूर्वनिपातश्च। कर्मधारये पूर्वं पुंवत् स्त्रीलिंगमुक्तपुंस्कं पूर्वपदं पुंवद्भवति कर्म्मधारये पूरणार्थप्रत्यये ते। प्रियादौ च नेत्यप्राप्तः पुंवद्भावो विधीयते महती चासौ नवमी चेति पञ्चादेरिति मट् पुंवद्भावे कृते सहादेरित्यात्वं महानवमी महाप्रिया तथाऽकतद्धिताभ्यां कोपधस्या नेति १ संज्ञापूरणार्थप्रत्यययोर्नेति २ वृद्धिहेतोस्तद्धितस्याऽरक्तविकारार्थस्य नेति ३ स्वाङ्गादीपोऽमानिनीति ४ जातिवाचिनः स्त्रीप्रत्ययान्तस्य नेति ५ पञ्चसूत्र्या प्रतिषि

विधीयते क्रमेणोदाहरणानि यथा पाचकस्त्री दत्तभार्या पंचभार्या सुग्रेभवा स्त्रौघ्नी भवार्थेऽण् स्त्रौघ्नी चासौ भार्या च स्त्रौघ्नभार्या सुकेशभार्या ब्राह्मणभार्या रक्ता
चासौ लता च रक्तलता पुमांश्चासौ कोकिलश्च पुंस्कोकिलः ब्राह्मणी चासौ भार्या च ब्राह्मणभार्या दत्ता चासौ भार्या च दत्तभार्या सुकेशी चासौ भार्या च सुकेशभार्या।
पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः एकश्चासौ नाथश्चैकनाथः दिक्संख्ये इति नियमबाधनार्थमुदाहरणं यज्ञमधीयते विदन्ति वा ते याज्ञिकाः इकूप
त्ययः सर्वे च ते याज्ञिकाश्च सर्वयाज्ञिकाः जरंतश्च ते नैयायिकाश्चेति जीर्यतेरतृ इति भूतेऽर्थेऽतृ न्यायमधीयते विदंति वा ते नैयायिकाः जरन्नैयायिका जीर्णा
नैयायिका इत्यर्थः युटवृद्धिश्च मीमांसामधीयते विदंति वा ते मीमांसकाः केनेयेका इति कप्रत्ययह्रस्वत्वं पुराणाश्च ते मीमांसकाश्च पुराणमीमांसकाः पठं
ति ॥ पाठकाः। तृबुणाविति बुण नवशब्दः संख्यावाचीत्र न गृह्यते दिक्संख्ये इति नियमात्। नवाश्च ते पाठकाश्च नवपाठकाः व्याकरणमधीयते विदंति वा वै

नवपाठकाः। केवलवैयाकरणाः। नाम्नश्च कृता समासः प्रादेरुपसर्गस्य नाम्नश्च कृदन्तेन सह तत्पुरुषस्समासो भवति व्याघ्रः कच्छपः कुंभ
कारः शाकपार्थिवादीनां मध्यमपदलोपः शाकप्रियः पार्थिवः शाकपार्थिवः। देवपूजको ब्राह्मणो देवब्राह्मणः सहादेस्सादिः समासे सति
सहादेस्सादिरादेशः सह पुत्रेण सपुत्रः सहाञ्चतीति सध्र्यङ् समञ्चतीति सम्यङ् तिरोञ्चतीति तिर्यङ् विष्वग्र्यङ् देवद्र्यङ्। ॥याकरणाः अ

ण युट वृद्धिश्च केवलाश्च ते वैयाकरणाश्च केवलवैयाकरणाः इति कर्मधारयः। नाम्नश्च कृता समासः। पुनस्तत्पुरुषमाह। स्यायं तस्य नाम्नः कृता कृदन्तस्य पा
तेन सह योऽन्वयः स च पुनः प्रादेः कृता योऽन्वर्थः स तत्पुरुषसंज्ञः स्यात् व्याजिघ्रतीति व्याघ्रः उपसर्गे च्यादंतादिति कः। घ्रशब्देन प्रादेः समासः कच्छेन पि
बतीति कच्छपः नाम्नि चेति डः कच्छेनेति नाम्नः कृदंतेन समासः कुंभं करोतीति कुंभकारः कार्य्येऽणित्यण प्रत्ययः इह कुंभ ङस् कार इत्यलौकिकं प्रक्रिया
वाक्यं। अमिति नोक्तं कृद्योगे षष्ठीविधानात्। उपपदस्य कृता समासः शाकपार्थिवादीनां मध्यमपदलोपः पृथिव्या ईश्वरः पार्थिवः ईश्वरेऽर्थेऽण् शाकः प्रि
योयस्य स शाकप्रिय इत्यस्य पार्थिवशब्देन समासे कृते प्रिय इति मध्यमपदस्य लोपः शाकपार्थिवः बहुव्रीहिगर्भः कर्मधारयः देवानां पूजक इति षष्ठीतत्पुरुषः न स्यब्रा

अन्तं ताः सहादयः। सहादयश्च प्रयोगानुसारेण बोध्याः। बहुव्रीहेरवयवस्य सहस्य सो वा' यथा पुत्रेण सहेति स सपुत्रः 'सहपुत्रो वा बहुव्रीहिरयं' सहांऽचतीति सहस्य सध्रि रादेशः 'क्विबंते चतौ परे सध्र्यङ् ' संगतमंचतीति संशब्दस्य समिरादेशः 'क्विबंतेऽचतौ परे सम्यङ् ' तिरोऽचतीति तिरःशब्दस्य तिरिरादेशः क्विबंतेऽचतौ तिर्यङ् विष्वगंचतीति विष्वग्देवयोरद्रसश्चटेरद्रिरादेशः क्विबंतेऽचतौ विष्वद्र्यङ् देवानंचतीति देवद्र्यङ् 'एते तत्पुरुषा बोध्याः' लक्ष्मीर्जायाऽस्येति जायाया जानिरादेशो बहुव्रीहौ लक्ष्मीजानिः। कुत्सितमन्नमिति। कुशब्दस्य कत् स्वराद्युत्तरपदे तत्पुरुषे कदन्नं त्रिवर्णरथवदतृणेषु कुशब्दस्य कत्। कुत्सितास्त्रयः इति कत्त्रयः। कद्रथः। कद्वदः। कत्तृणं ईषदर्थे कुशब्दस्य का पथ्यऽक्षयोः परयोश्चा ईषज्जलं काजलं। कुत्सितः पंथा इति ऋक्पूरित्यः प्रत्ययः। संख्याव्ययाभ्यामिति ङीब्वनां कापथः' काक्षः। अक्षशब्देन तत्पुरुषो क्षिशब्देन बहुव्रीहिर्वा समासः 'उष्णे कुशब्दस्य का कव कदादेशाः ईषदर्थे कोष्णं कवोष्णं कदुष्णं द्यौश्च भूमिश्चेति देवता द्वंद्वे दिव् शब्दस्य द्या

लक्ष्मीर्जाया यस्य स लक्ष्मीजानिः। कुत्सितमन्नं कदन्नम्' ईषदुष्णम्। कोष्णम्। कवोष्णम्। कदुष्णं। द्यौश्च भूमिश्च द्यावाभूमी। जाया च पतिश्च जम्पती। दम्पती। मातरपितरौ। कुपुरुषः। कापुरुषः। षट् च दश च षोडश। षड् दन्ता यस्य षोडन्। षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वम्। संख्यायाः प्रकारे धा। षट् प्रकाराः षोढा' षड्धा। महानीश्वरो महेश्वरः। महादेवः। खरणा नासिका यस्य स खरणसः। खरणाः। खुरणसः। खुरणाः। उन्नता नासिका यस्य स उन्नसः' प्रणसः॥

वा भूमी पृथिवी शब्दे दिव्शब्दस्य द्यावादिवश्च द्यावापृथिव्यौ दिवस्पृथिव्यौ। जाया च पतिश्चेति जायाया जंदंवा द्वंद्वे जंपती। दंपती जंदंशब्दावव्ययौ दारवचनौ तयोः पत्या सह द्वंद्वे जंपती। दंपती इति चान्द्राः दाराः पुंसि बहुत्वे च दंकलत्रे नपुंसकमित्यमरमाला पत्न्यां जंदमलिंगा इति नामप्रपंचः। माता च पिता चेति मातुररङ् द्वंद्वे मातरपितरौ। पुरुषे कुशब्दस्य वा च का कुपुरुषः कापुरुषः। षट् च दश चेति दतृदशधा परस्य षष उत्वं परस्य ष्टुत्वं च धा प्रत्यये वा षोडश। षोढा। षड्धा। षट् प्रकारा अस्येति प्रकारे धेति धा प्रत्ययः। षट् दंता अस्येति संख्यासुपूर्वस्य दंतस्य दतृ वयोर्थे स्त्रियां तु नुमिति नुम् षोडन्' सुदन्' स्त्रियां तु ङ्गित इतीप्। सुदती। महांश्चासौ ईश्वरश्चेति महत आकारोऽन्तादेशः समानाधिकरणे उत्तरपदे जातीये च महेश्वरः। महादेवः॥ ६॥

समानाधिकरणे किं महतः सेवा महत्सेवा महान् प्रकारो महाजातीयः खरानासिकायस्येति खुरखन्नासिकाया नसबहुव्रीहावप्रत्यये खुरख
राभ्यानासिकाया नसः अप्रत्ययश्च वा खरणसः अप्रत्ययः पुंवद्वेतिपुंवत् अत्वसोः सावितिदीर्घे खरणाः खुरणसः अप्रत्ययः खुरणाः उन्नना नासिकाऽस्येति उन्नसः अ
प्रत्ययः प्रगता नासिकाऽस्येति प्रणसः अप्रत्ययः ॥ ॥ वेर्नासिकायाः ग्रश्वा विगतानासिकाऽस्येति विग्रः ॥ विख्यः वेः खुरव्यग्रा इति शाकटायनसूत्राद्धि खुर्विख्यो
विग्र इति रूपत्रयं च खरणाः स्यात् खरणसो विग्रो विखुर्विनासिक इति रभसः चतस्रोऽश्रयोऽस्येति नालव्यस्थाने दंत्यसो निपात्यते चतुरस्रः अप्रत्ययः प्रोष्ठो
गौस्तस्येव पादावस्येति पादस्य पद्भिपात्यते अप्रत्ययः प्रोष्ठपदः ॥ प्रसमभ्यां जानुशब्दस्य ज्ञुरूचवा बहुव्रीहौ प्रगते जानुनी यस्य सप्रज्ञुः संज्ञुः ऊर्द्धज्ञुः ऊ
र्द्धजानुः शृङ्गस्य विकारः शार्ङ्गं अण् शार्ङ्गं धनुरस्येति धनुरंतस्य बहुव्रीहेरनङ् संज्ञायां च वा शार्ङ्गधन्वा संज्ञायां तु शतधन्वा शतधनुः उत्पूतिसुरभिभ्यः ग

विगतानासिकायस्य सविग्रः विख्यः चतस्रोऽस्रयोयस्य सचतुरस्रः प्रोष्ठोगौस्तस्येव पादायस्य सप्रोष्ठपदः ॥ प्रगते जानुनी अस्य प्रज्ञुः संज्ञुः ।
ऊर्द्धज्ञुः ऊर्द्धजानुः उद्धोद्वाज्ञुः बहुव्रीहौ धनुषोऽनङ् ॥ अधिज्यधन्वा शार्ङ्गं धनुरस्य शार्ङ्गधन्वा ॥ उदग न्धिः सुगंधिः पूतिगंधिः सुरभि
गंधिः द्विदन् चतुर्दन् अमुमञ्चतीति अमुमुयङ् अदमुयङ् अदद्र्यङ् कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः कौमुदगंधीपतिः समानज्यो
तिरस्य सज्योतिः सनाभिः ।
णवाचिनो गंधस्येकारांतादेशो बहुव्रीहौ उद्गंधिः पूतिगंधिः सुगंधिः सुरभिगंधिः गुणवाचिन इति किं शोभनागंधा द्रव्याण्यस्य
सुगंधआपणिकः अल्पवाचिनो गंधस्येत्वं बहुव्रीहौ सूपस्य गंधो लेशो यस्मिन् तत् सूपगंधि भोजनं घृतगंधि उपमानाद्गंधस्येकारांतादेशः पद्मस्येव गंधोऽस्य प
द्मगंधिः गंधस्तु सौरभे न्यत्ये गंधके गर्वलेशयोरित्यमरः स एव द्रव्यवचन बहुत्वे पुंसि च स्मृत इति हो दंतावस्येति संख्यासुपूर्वस्येति दत्तृ द्विदन् चतुर्दन् अमुमंच
तीति अदस् अञ्चु इति स्थिते विष्वग् इति टेरद्रिः अदद्रि अञ्चु इत्यत्र यत्वम् अदसो से र्दादु दो म इत्यनेन द्राभ्यां परयोर कारर कारयोरुकारौ दकारस्य मकारोऽ
मुमुयङ् अन्यथा धंऽन्यसदेश इति वदतां मते परदकाररकारस्यैव मुत्वं अदमुयङ् मदाघत्वे एवमुत्वे नान्यत्रेति पक्षे अदद्र्यङ् कुमुदस्येव गंधोयस्येति उपमानाद्गं

[illegible]

दगंधेरपत्यं स्त्री कौमुदगंध्या अपत्ये ष्यङ् कौमुदगंध्यायाः पुत्र इति। कौमुदगंध्यायाः पतिरिति या इत्यस्य स्थाने ईत्वं निपात्यते' कौमुदगंधीपुत्रः' कौमुदगंधीपतिः
समानं ज्योतिरस्येति ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबंधुतीर्थ्यब्रह्मचारिषु समानस्य सः' सज्योतिः' सनाभिः॥ ॥ सनामा सवयाः ब्र
ह्मवेदः तदध्ययनार्थं व्रतमपि ब्रह्म तच्चरतीति ब्रह्मचारी व्रते इति णिनिः समानः ब्रह्मचारीति' सब्रह्मचारी' समाने तीर्थे वसतीति सतीर्थ्यः वसत्यर्थे यत्प्र
त्ययः उत्तरपदे उदकस्योदः' क्षीरोदः। सुरोदः। लवणोदः। शुद्धोदः। पृषतः उदरमिति तलोपः। पृषोदरं वारिणो वाहक इति। पूर्वपदस्य वः' उत्तरपदादेश्च ल
त्वं' बलाहकः। गूढोत्मा अत्र आकारस्य स्थाने उत्वं। भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्। गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरं १ हंतेः पचादित्वादच्प्रत्यये
समागमात् हंस इति हिंसेः पचादित्वात्प्रत्यये हकारसकारयोर्व्यत्यसया न्‌सिंह इति' दिक्शब्देभ्यस्तीरस्य तारो वा सर्वादेः समासादावेति पुंवत्' दक्षिणतारं' द

सनामा' सवयाः' सब्रह्मचारी' सतीर्थ्यः' क्षीरोदः' सुरोदः' लवणोदः' शुद्धोदः' पृषोदरः' वारिवाहको बलाहकः' गूढोत्मा' दक्षिणतीरम्। दक्षिणतारम्
'इत्यादि' अलुक् क्वचित्' क्वचित्समासे तद्धिते च विभक्तेरलुक्' कृच्छ्रान्मुक्तः' स्तोकान्मुक्तः' दूरान्मुक्तः' निकटान्मुक्तः' अप्सुयोनिः' सरसिजम्। उर
सिलोमा' हृदिस्पृक्' कण्ठेकालः' वाचोयुक्तिः' दिशोदण्डः' पश्यतोहरः' खेशयः' ग्रामेवासः' ग्रामेवासी' चौरस्यकुलम्' ओजसाकृतम्। सहसाकृतम्॥

क्षिणतीरमित्यादि' अलुक् क्वचित्' समासप्रत्यययोरित्यस्यापवादः। कृच्छ्रस्तोकदूरार्थनिकटार्थेभ्यः पंचम्या अलुक् उत्तरपदे' कृच्छ्रान्मुक्तः। स्यात्कथंकृच्छ्रमा
भील्लमित्यमरः' उत्तरपदे किं' निःक्रांतः स्तोकादिति निःस्तोकः' द्विवचनबहुवचनांतानां तु समासो नेष्यते ऽनभिधानात्' तेन स्तोकाभ्यां मुक्त इत्यादौ वाक्यमेव' अ
प्सुयोनिरुत्पत्तिर्यस्येति अपः सप्तम्या अलुक् योनिजचरमतिषु अप्सुयोनिः अप्सुजः' अप्सुचरः' अप्सुमतिः' हसंतादंतात् च सप्तम्या अलुक् संज्ञायां' सरसि
जं' अदंतात्तु अरण्येतिलक इत्यादि स्वांगात् सप्तम्या अलुक् ऽकामे परे मूर्द्धमस्तकाभ्यां तु न। उरसिलोमा अकामे इति किं' मुखे कामोऽस्य मुखकामः' मूर्द्धमस्तकाभ्यां ने
ति किम्' मूर्द्धशिखः' हृदयं स्पृशतीति दिव् हृद्भ्यां सप्तम्या अलुक् हृदिस्पृक्' कर्मणोऽधिकरणत्वविवक्षायां सप्तमी। एवं दिविस्पृक्। कण्ठेकालः स्वांगात्।

सप्तम्या अलुगित्यलुक्' वाच् दिक् पश्यद्भ्यः षष्ठ्या अलुग् युक्ति दण्ड हरेषु' वाचोयुक्तिः' दिशोदण्डः' पश्यतोहरः' पश्यंतमनादृत्य हरतीत्यर्थः' अनादराधिक्ये इति षष्ठी' अकालवाचकात्सप्तम्या अलुग्वा शयवासवासिषु' खेशयः' खशयः' ग्रामेवासः' ग्रामवासः' ग्रामेवासी' ग्रामवासी' षष्ठ्या अलुग् आक्रोशे' चौरस्यकुलं आ। क्रोशे किं ब्राह्मणकुलं' ओजसंभसहसतमसं' ओजोऽभ्यस्तृतीयाया अलुक्' ओजसाकृतं॥ ॥ अंभसाकृतं नमसाकृतं' अंजसाकृतमार्जवेन कृतमित्यर्थः' पुंसोऽनु जे जनुषोंऽधेच तृतीयाया अलुक् यस्याऽग्रजः पुमान् स पुंसानुजः' जनुषांधः' जात्यंधइत्यर्थः। जनुर्जननजन्मानीत्यमरः आत्मनस्तृतीयाया अलुक्। पूरणार्थे प्रत्यये परे' आत्मनापंचमः' पूरणार्थे किं' आत्मकृतं' त्वचिसारः' हसंतात् इदंताच्च सप्तम्या अलुक् संज्ञायामित्यलुक्। गोः सप्तम्या अलुक् स्थिरे' गविष्ठिरः' युधिष्ठिरः' हसंतादिति सप्तम्या अलुक् परशब्दादात्मशब्दाच्च चतुर्थ्या अलुक् वैयाकरणाख्यायां परस्मैपदं। परस्मैभाषा' आत्मनेपदं' आत्मनेभाषानादर्थे चतुर्थ्या अ

अंभसाकृतम्' पुंसानुजः' जनुषान्धः' आत्मनापञ्चमः' त्वचिसारः' गविष्ठिरः' युधिष्ठिरः' आत्मनेपदम्' आत्मनेभाषामध्येगुरुः' स्तम्बेरमः। क र्णेजपः' पूर्वाह्णेतरे पूर्वाह्णेतमे' आमुष्यायणः' आमुष्यकुलिका आमुष्यपुत्रिका' मातृपितृभ्यां सुस्वसृषः' मातृष्वसा' पितृष्वसा' मातृपितृभ्यां वा मा तुस्स्वसा' मातुःष्वसा' पितुस्स्वसा' पितुःष्वसा' होतुरन्ते वासी' होतुःपुत्रः' पितुरन्तेवासी' पितुःपुत्रः'॥ लुगत्र मध्यान्ताभ्यां सप्तम्या अलुग्गुरौ प

रे' मध्येगुरुः' अन्तेगुरुः' न त्वरुषे सप्तम्या अलुक् कृत् प्रत्यये ते वहुलं' स्तंवेरमः' स्तंवेनीरेरमते इति स्तंबेरमो हस्ती' कर्णेजपः' कर्णेजपस्तु सूचकः' कालवा चकात्सप्तम्या अलुग्वा नरतमकालतनेषु। पूर्वाह्णेतरे पूर्वाह्णतरे पूर्वाह्णेतमे पूर्वाह्णतमे पूर्वाह्णेकाले पूर्वाह्णकाले पूर्वाह्णेतने' पूर्वाह्णतने' अदसः षष्ठ्या अ लुगायनपुत्रिकाकुलिकासु' अमुष्याऽपत्यं नडादित्वादायनण्' आमुष्यायणः' अमुष्यपुत्रस्यभावः आमुष्यपुत्रिका' अमुष्यकुलस्यभावः आमुष्यकुलिका' भावार्थे कः' ऋदंतात्षष्ठ्या अलुग्वा स्वसृपत्योः' मातृपितृभ्यां स्वसुः सस्य षः' आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे मातृष्वसा' पितृष्वसा' मातृपितृभ्यां वा आभ्यां स्व सुः सस्य षो वा स्यात् समासे' मातुःष्वसा' मातुःस्वसा' पितुःष्वसा' पितुःस्वसा' विद्यासंबंधयोनिसंबंधवाचिनः ऋदंतात्षष्ठ्या अलुक् होतुरंतेवासी' होतुःपुत्रः' पितुरंते

राम
९६

देवानांप्रिय इति मूर्खेऽर्थे षष्ठ्या अलुक्' अन्यत्र देवप्रियः' दिवोदासे परे षष्ठ्या अलुक्॥ दिवोदासः॥ शुनः षष्ठ्या अलुक् शेफपुच्छलांगूलेषु' शेफः सकारान्तः स्याल्लिं
गं चिन्हं शेफसो रित्यमरोक्तेः' शीङ्‌ औणादिके पप्रत्यये पकारान्तोपि शुन इव शेफमस्य स शुनःशेफः' शुन इव पुच्छमस्य स शुनःपुच्छः' शुन इव लांगूलमस्य स शुनोलां
गूलः' बहुव्रीहय एते त्रयोप्यमी ऋषिविशेषाणां संज्ञाः॥ इत्यलुक्समासः॥ तरतमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ईबंतस्यानेकस्वरस्य ह्रस्वो भाषितपुंस्क
स्य अतिशयेन ब्राह्मणीति ब्राह्मणितरा ब्राह्मणितमा' तरतमचरडिति पुंवद्भावो न' जातिवाचिनः स्त्रीप्रत्य यांतस्येति निषेधात्' तरतमे यस्त्विष्ठाः प्रकर्षे इति तरतमौ प्र
शस्ता ब्राह्मणीति ब्राह्मणिरूपा प्रशंसायामिति रूपः' ईषन्न्यूना ब्राह्मणीति ब्राह्मणिकल्पा ईषदसमाप्तौ कल्पेति कल्पप्रत्ययः' चेलडादीनि वृत्तिविषये समासादौ कु

देवानांप्रिय इति च मूर्खे' दिवोदासः' शुनश्शेफः' शुनःपुच्छः' इत्यादि' तरतमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ईबन्तस्यानेकस्वरस्य ह्रस्वो भा
षितपुंस्कस्य' ब्राह्मणितरा' ब्राह्मणिरूपा' ब्राह्मणिकल्पा' ब्राह्मणिचेली' अनीबन्तस्य स्त्रीप्रत्ययान्तस्येबन्तस्यैकस्वरस्य वा ह्रस्वस्तरादौ' ब्रह्मबन्धूतरा'
ब्रह्मबंधुतरा' स्त्रीतरा' स्त्रितरा' व्रितः परस्य वा' विदुषीतरा' विद्वत्तरा' भवतितरा' भवत्तरा' पचतितरा' पचत्तरा' इष्टकेषीकामालानां चिततूलभारिषु ह्र-
स्वः' इष्टकचितम्' पक्वेष्टकचितम्' इषीकतूलम्' मुञ्जेषीकतूलम्' मालभारी' उत्पलमालभारी॥ त्सनवाचीनि सन्ति कुत्सिता ब्राह्मणि चेली' उक्तपुंस्कस्येति किं
आमलकीतरा' कुवलीतरा' आमलकीकुवलीशब्दौ ह्येते नित्यस्त्रीलिंगौ' अनीबंतस्य स्त्रीप्रत्ययांतस्य ईबंतस्यैकस्वरस्य वा ह्रस्वस्तरादौ' अनीबंतस्य स्त्रीप्रत्ययांतस्य वा।
ह्रस्वः' एकस्वरस्य ईबंतस्य च वा ह्रस्वो भवति' तरतमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु परेषु' ऊतः ऊरिति ऊप्रत्ययान्तस्य यः अतिशयेन ब्रह्मबंधूरिति तरतमे यस्त्विष्ठा इति
तरप्रत्ययः' ब्रह्मबंधूतरा' व्रितः परस्य वा' उश्च आच तयोः समाहारः व्व इत् यस्य स व्रित्' तस्मात् व्रितः उकारेत् ऋकारेत् च परस्य ईप्रत्ययस्य ह्रस्वो वा भवति
तरादौ' विदुषितरा' श्रुत इतीप्' वसोर्वउ रित्युत्वं ह्रस्वाभावे तरतमचरडिति पुंवद्भावः' विद्वत्तरा' विदुषीतरेत्यपि केचिदुदाहरंति तन्निर्मूलम्' इष्टकेषीकामालानां चि
ततूलभारिषु ह्रस्वः' इष्टकादीनां तदंतानां च ह्रस्वो भवति चितादिषु' इष्टकाभिश्चितमितीष्टकचितं' तदंते पक्वेष्टकचितं' इषीकानां तूलम् इषीकतूलं' मालां बिभर्तीति

कारे सत्यागदस्य मुम् सत्यागदयोर्मुम् स्यात् कारे' सत्यंकारः' शपथकरणमित्यर्थः अगदंकारो वैद्यः' अस्तोश्च अस्तु इत्यस्य मुम् स्यात् कारे अस्तु इत्याख्यातप्रतिरू
पकमव्ययं अस्तुंकारो ऽभ्युपगम इत्यर्थः धेनोर्भव्यायां' धेनुशब्दस्य मुम् स्यात् भव्यायां परस्यां धेनुश्चासौ भव्या चेति विग्रहः' धेनुंभव्या' भविष्यन्ती धेनुरित्यर्थः नि
पातनाद्भविष्यति कर्तरि कृत्प्रत्ययः' लोकस्य पृणे लोकस्य मुम् स्यात् पृणे परे पृणधातुः प्रीणनार्थः लोकं पृणः सूर्यः' इत्ये ऽनभ्यासस्य मुम् स्यात् इत्ये परे अ
भ्यासं समीपं अभ्यासभिन्नमनभ्यासं एति सुप्यजातौ णिनिः' इणः क्यप् अनभ्यासमित्यः दूरतः परिहर्तव्य इत्यर्थः' भ्राष्ट्राग्न्योरिन्धे अनयोर्मुम् स्यादिन्धे परे इन्धी दीप्तौ का
र्यैः शिन्धपि भ्राष्ट्रमिन्धः' अग्निमिन्धः' नाम्नश्च कृते निसमासः गिले ऽगिलस्य अगिलस्य गिलभिन्नस्य मुम् भवति गिले परे' तिमिंगिलो मत्स्यविशेषः' गिरतेर्मूलवि

कारे सत्यागदस्य मुम्' सत्यङ्कारः' अगदङ्कारः' अस्तोश्च' अस्तुंकारः' धेनोर्भव्यायाम्' धेनुम्भव्या' लोकस्य पृणे' लोकम्पृणः। इत्ये ऽन
भ्यासस्य मुम्' अनभ्यासमित्यः' भ्राष्ट्राग्न्योरिन्धे' भ्राष्ट्रमिन्धः' अग्निमिन्धः' गिले ऽगिलस्य मुम्' तिमिङ्गिलः। गिलगिले मुम् च' तिमिङ्गिलगि
लः' उष्णभद्रयोर्मुम् करणे' उष्णंकरणम्' भद्रंकरणम्' रात्रेः कृति वा' रात्रिञ्चरः' रात्रिचरः' रात्रिमटः' रात्र्यटः। नहिवृतिवृषिव्यधिरुचिस
हितनिषु क्वौ' क्विबन्तेषु पूर्वस्य दीर्घः' उपानत्' नीवृत्' प्रावृट्' मर्माविध्' नीरुक्' अभीरुक्' ऋतीषट्' परीतत्' मत्वर्थे बहुस्वरस्य' अमराव
ती शरादेश्च' शरावती अजिरादेर्न' अजिरवती' उपसर्गस्य घञ्यमनुष्ये वा दीर्घः' परिपाकः' परीपाकः' परिहासः' परीहासः' अमनुष्ये किं
मुनिषादः॥

मुजादित्वात्कप्रत्ययः गिरतेरेफस्य वा लत्वमिति लत्वं गिलगिले च' अगिलस्य मुम् भवति गि लगिले परे' गिलं गिलतीति गिलगिलः' तिमीनां गिलगिल
इति तिमिंगिलगिलः' उष्णभद्रयोः करणे। उष्णभद्रयोर्मुम् स्यात् करणे परे' रात्रेः कृति वा' रात्रेर्मुम् वा स्यात् कृत् प्रत्ययान्ते परे' अखिदर्थमिदं सूत्रं' खिति प्रत्यये खिति
परस्येति नित्यमेव मुम् स्यात्। अट। विनिट प्रत्ययः रात्रिंचरः। नहिवृतिवृषिव्यधिरुचिसहितनिषु क्विबन्तेषु परे षु पूर्वस्य दीर्घः' क्विबन्तेष्वेषु परेषु पूर्वस्योपसर्गका
रकस्य दीर्घः स्यात्' णह बंधने वृतु वर्तने वृषु सेचने व्यध ताडने रुच दीप्तौ षह मर्षणे तनु विस्तारे उपसमीपेन ह्यते इति उपानत् ॥ ६ ॥ ६ ॥ ६ ॥ राम

कर्मणि क्विप्। निवर्त्तते इति नीवृत्। नीवृज्जनपदे। देशस्समरः प्रवर्षतीति प्रावृट्। मर्माणि विध्यतीति मर्मावित्। श्वानं विध्यतीति नाम्नो नो लोपश्शिति नलोपः। श्वाविन्। लोकभाषायां सहेयम् हाडि॰ इति चेतिसंप्रसारणं निरोचनेद् इतीनीरुक्। ऋतिसहते इति ऋतीषट्। ऋतिर्जुगुप्साकल्याणगतिस्पर्द्धास्वथो ऋतुरिति हेमः

परितनोतीति परीतनत्। क्विबन्ते ष्विति किं। परिणहनं उपसर्गकारकस्येति किं। पटुरुक्। तिग्मरुक्॥ ः॥ मत्वर्थे बहुस्वरस्य बहुस्वरस्य दीर्घः स्यात् संज्ञायामस्य

र्थे परे। अमराः सन्त्यस्याममरावती। मातोपधा द्वित्विनोद् इति वत्। ष्टितरीतीपू संज्ञायामिति किं। वलयवती। बहुस्वरस्येति किं। व्रीहिमती। शरादेश्च। शरादेर्दीर्घः स्यात् अ

स्त्यर्थे। शराः सन्त्यस्यामिति शरावती। अजिरादेर्न। अजिरादेर्दीर्घो न भवति। अस्त्यर्थे अजिरमस्त्यस्यां सा अजिरवती। अंगणं चत्वरमजिरे इत्यमरः। उपसर्ग

आदेश्च द्वन्द्वे। द्वन्द्वे सति क्वचिदादेर्लोपः। माता च पिता च पितरौ। श्वश्रूश्च श्वशुरश्च श्वशुरौ। दुहिता च पुत्रश्च पुत्रौ। स्वसा च भ्राता च भ्रातरौ।

ऋतान्द्वन्द्वे पूर्वस्यात्वम्। मातापितरौ होतापोतारौ नेष्टोद्गातारौ पुत्रे च पिता पुत्रौ गावश्च गावश्च गावइमाः। शुक्लश्च शुक्ला च शुक्लञ्च शुक्लम् स

चयश्च नौ यौवादिक्सङ्ख्ये संज्ञायाम्। दिग्वाचिनस्संख्यावाचिनश्शब्दास्समानाधिकरणेन संज्ञायामेव समस्यन्ते स कर्म्मधारयस्समासः

दक्षिणाग्निः सप्तर्षयः॥ संज्ञायां किम्। पञ्चफलानि। दिक्संख्ये किम्। शूर्पणखा॥ साघञ्यऽमनुष्येवा दीर्घः उपसर्गस्य वा दीर्घः स्यात् घञ्यन्ते परे न

तु मनुष्येऽर्थे अमनुष्ये किं। निषीदन्त्यस्मिन्निति घमित्यधिकरणे घञ् निषादः। पुलिन्दो मनुष्यजातिः॥ आदेश्च द्वन्द्वे। द्वन्द्वविषये भिन्नार्थानां तुल्यार्थानां च नाम्नामन्योऽव

शिष्यते आदेशयोरादीनां च लोपो भवतीत्यर्थः। रामश्च रामश्च रामौ। घटश्च कुम्भश्च कुम्भौ। घटश्च कुंभश्च कलशश्च कलशाः। मातृश्वश्रूभ्यां सहोक्तौ पितृश्वशुरौ वा

शिष्येते। माता च पिता चेति पितरौ। मातापितरौ वा। पितुर्दशगुणा माता गौरवेणातिरिच्यते इति स्मृतेर्मातुः प्रधानत्वात्पूर्वनिपातः। ऋतां द्वन्द्वे इति पूर्वस्यात्वं

श्वशुरौ। श्वश्रू श्वशुरौ वा। स्वसृदुहितृभ्यां सहोक्तौ भ्रातृपुत्रौ शिष्येते। दुहिता च पुत्रश्च पुत्रौ। स्वसा च भ्राता च भ्रातरौ। ऋतां द्वन्द्वे पूर्वपदस्यात्वं विद्यायोनिसंबध

वाचिनां ऋदन्तानां योद्वन्द्वस्तत्र पूर्वपदस्यात्वं भवति। षष्ठीनिर्दिष्टत्वादन्त्यस्यादेशः। द्वयोर्द्वन्द्वे एवात्व। माता च पिता चेति एकशेषाभावे मातापितरौ पुत्रोन्यादन्ते

पोता चेति होता पोता रौ नेष्टा चो द्गाता च नेष्टोद्गातारौ इह होतादिरूपविद्याकृतः संबंध एकस्मिन् यत्ते आर्त्विज्यरूपो वेद्यः॥ ॥ पुत्रे च विद्यायोनिसंबंधवाचिनां ऋ
दंतानामात्वं भवति पुत्रे परे पिता च पुत्रश्च पितापुत्रौ अनयोर्योनिकृतः संबंधो जन्यजनकभावलक्षणो त्र ग्राम्यपशुसमूहेष्वतरुणेष्वनेकखुरेषु सहोक्तौ स्त्रीलिं
गोऽवशिष्यते गावश्च गावश्चेति गावः उभयत्र रूपस्य समानत्वात् स्त्रीलिंगे शेषस्य फलमाह इमा इति ग्राम्ये भवा ग्राम्याः येण ग्रामेति किं रुरव इमे मृगविशेषा वन
चारिण इत्यर्थः। पशुग्रहणं किं ब्राह्मणाश्च ब्राह्मणाश्च ब्राह्मणाः संघेषु किं एतौ गावौ अतरुणेषु किं वत्सा इमे अनेकखुरेषु किं अश्वा इमे अश्वानामेक एव खुर
इत्यर्थः अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा एकवत् तल्लक्षण एव विशेषश्चेत् शुक्लः पटः शुक्ला पटी शुक्लं वस्त्रं तदिदं शुक्लं तानीमानि शुक्लानि त्यदादीनां मिथः
सहोक्तौ परं पूर्वं च शिष्यते। स च यश्च यौ तौ वा स्त्रियाः सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् हंसी च हंसश्च हंसौ इह सर्वत्र एकशेषे कृते ऽनेकाभावात्

द्वन्द्वतत्पुरुषयोः परपदस्येव लिङ्गम् कुक्कुटमयूर्याविमे मयूरीकुक्कुटाविमौ अर्द्धपिप्पली द्विगुप्राप्तापन्नालम्पूर्वप्रादिसमासेन पञ्चक
पालः प्राप्तो जीविकां प्राप्तजीविकः आपन्नजीविकः अलंकुमार्यै अलंकुमारिः। निष्कौशाम्बिः ॥ द्वंद्वसमासो न तेन शिरसी शिरांसि इत्यादौ प्राण्यं
गत्वादेकवद्भावो न पंथानौ पंथान इत्यादौ समासांतप्रत्ययो न भवतीत्येकशेषः पुनः कर्मधारयमाह दिक्संख्ये संज्ञायां दिक् च संख्या च दिक्संख्ये दिग्वाचिनः सं
ख्यावाचिनश्च शब्दाः सुल्यार्थेन सह समस्यंते स कर्मधारयः कर्मधारयस्तुल्यार्थे इत्यनेनैव सिद्धे नियमार्थमिदं संज्ञायामेवेति दक्षिणाश्चासौ अग्निश्चेति दक्षिणा
ग्निः सप्त च ते ऋषयश्च सप्तर्षयः दक्षिणाग्निर्गार्हपत्याहवनीयस्त्रयोऽग्नय इत्यमरः॥ ॥ द्वन्द्वतत्पुरुषयोः परपदस्येव लिंगं इतरेतरयोगद्वंद्वोऽत्र गृह्यते न स
माहारद्वंद्वः एकत्वे द्विगुद्वंद्वाविति नपुंसकत्वात् द्वन्द्वतत्पुरुषयोरिति संबंधे षष्ठी एतयोः परपदतुल्यं लिंगं भवति कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ इमे इति स्त्रीलिंगनि
र्देशः मयूरी च कुक्कुटश्च मयूरीकुक्कुटौ इमाविति पुल्लिंगनिर्देशः पिप्पल्या अर्द्धमित्यर्धपिप्पली इयमिति स्त्रीलिंगनिर्देशः द्विगुप्राप्तापन्नालंपूर्वप्रादिसमासेन द्वि
गुसमासे प्राप्तापन्नालंपूर्वसमासे प्रादिसमासे च परपदतुल्यलिंगं न भवति पंचसु कपालेषु संस्कृतः तद्धितार्थे द्विगुः संस्कृतार्थे अण् तस्य लुक् च तद्धितार्थे द्विगुः

विशेष्यनिघ्नः। पुरोडाश्यते इति दाशृ दाने कर्मणि घञ् निपातनाद्ध्रस्वडः पुरोडाशः। प्राप्तजीविकः। आपन्नजीविकः। अलंकुमारिः तत्पुरुषे एते अन्यार्थे इति ह्रस्वः। प्रादि
समासो यथा प्रादयो गताद्यर्थे प्रथमया प्रगत आचार्यः प्राचार्यः दुराचारः पुरुषः दुःपुरुषः प्रगतः पितामहः प्रपितामह इत्यादि। अत्यादयः क्रान्ताद्यर्थे द्विती
यया अतिक्रान्तो मालां अतिमालः। अन्यार्थे इति ह्रस्वः। अभिगतो मुखं अभिमुखः। उद्गतो वेलां उद्वेलः प्रतिगतो ऽक्षं प्रत्यक्ष इत्यादि। अवादयः क्रुष्टाद्यर्थे तृतीयया।
अवक्रुष्टः कोकिलया अवकोकिलः। अन्यार्थे इति ह्रस्वः। परिणद्धो वीरुधा परिवीरुत्। पर्यादयो ग्लानाद्यर्थे चतुर्थ्या परिग्लानो ऽध्ययनाय पर्यध्ययनः। गुरुकुलवा
सादिना परिग्लानो ऽध्ययनाय इत्यर्थः। निरादयः क्रान्ताद्यर्थे पंचम्या निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः। अन्यार्थे इति ह्रस्वः। उत्क्रान्तः कुलात् उत्कुलः। निर्गतमङ्गुलिभ्यो
निरंगुलं अस्वपदविग्रहेण नित्यसमासा एते। इति प्रादिसमासाः॥ ॥ अश्ववडवयोर्द्वंद्वः पूर्ववल्लिंगः। सूत्रे द्विवचनमतंत्रमविवक्षितं बहुत्वेपि पुंल्लिंगस्य दर्शनात् अ

अश्ववडवयोर्द्वन्द्वः पूर्ववल्लिङ्गः ॥ अश्ववडवान्। रात्राह्नाहान्ताः पुंस्येव। अहोरात्रः। पूर्वरात्रः। पूर्वाह्णः। द्व्यह्नः। पूर्वाहः। संख्यापूर्वं रात्रं क्ली
बं द्विरात्रं। त्रिरात्रम्। अपथं नपुंसके क्लीवम्। अपथम्। अर्धर्चादयः क्लीबपुंसोः। अर्धर्चम्। अर्धर्चः। ध्वजम्। ध्वजः। तीर्थम्। तीर्थः। एवं शरी
रम्। एडप। यूष। देह। देश। अंकुश। कलश। इत्यादि॥ ॥ अश्वश्च वडवा च अश्ववडवौ निपातनाट्टापो निवृत्तिः। बहुत्वे पुंल्लिंगं दर्शयति। अश्ववडवान्। अश्ववडवैः।
विभाषा वृक्षेति पक्षे समाहारद्वन्द्वे ऽश्ववडवं क्रियाव्ययविशेषणानां क्लीबत्वमेकवचनं क्रियाविशेषणानामव्ययविशेषणानां चैकवचनं क्लीबत्वं च भवति। रात्रा
ह्नाहानाः पुंस्येव। परवल्लिंगताऽपवादोऽयं परत्वात्समाहारनपुंसकतां बाधते। अप्रत्ययान्तो रात्रिशब्दः सप्रत्ययान्तो ह्नशब्दः एतदन्ता द्वन्द्वद्विगुतत्पुरुषकर्मधारयाः
पुंल्लिंगे एव भवंति। अहश्च रात्रिश्च अन्हः इति न स्पसः। अहोरात्रः। अहःपूर्वाद्रात्रिशब्दादः समाहारे ऽच् प्रत्ययः। रात्रेः पूर्वभागः पूर्वरात्रः सर्वैकदेशेत्यच् प्रत्ययः। अन्हं पूर्वं इ
ति पूर्वाह्णः। राजाहःसखिभ्यष्टच् इति टच् प्रत्ययः। नो वेत्युपधालोपः। द्वयोरह्नोः समाहार इति टः। नो वेति टिलोपः। द्व्यहः। संख्यापूर्वं रात्रं क्लीबं द्वयोः रात्र्योः समाहारः तिसृणां रात्रीणां
समाहारः इति सर्वैकदेशेत्यच् प्रत्ययः। द्विरात्रं त्रिरात्रं अपथं तत्पुरुषे क्लीबं नञ्पूर्वः कृतसमासांतः पथशब्दः क्लीबे स्यात् न पंथा इत्यपथं ऋक्पूरब्धूःपथामित्यप्रत्ययः। न

पूं. च.
सि. टी. सु.
६६

पूर्वोत्तरपदयोः शब्दाद्वा समासांतस्तत्पुरुषे इति विकल्पः 'प्रसंगादाह' अर्द्धर्चादयः क्लीबपुंसोः 'अर्द्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः आबंतो नरपदो द्विगुर्वा स्त्रियां पंचा
नां खट्वानां समाहारः। नपुंसकस्येति ह्रस्वे कृते इदं प्रवर्त्तते पंचखट्वं 'स्त्रियां तु समाहारेऽनड् नीप् पंचखट्वी' अनो नलोपो द्विगुर्वा स्त्रियां इह वा शब्दः स्त्रियामित्यने
न संबध्यते न तु नलोप इत्यनेन अन्नन्तस्य द्विगोर्नित्यं नलोपो भवति 'अन्नन्तो द्विगुः स्त्रियां च वा' पंचानां तक्ष्णां समाहारः पंचतक्षं 'स्त्रियां तु समाहारेऽनड् इति ईप् पंच
तक्षी। पुण्यसुदिनाभ्यामन्हः क्लीबता 'आभ्यां परस्याहन् शब्दस्य क्लीबत्वं स्यात्' पुण्यं च तदहश्चेति राजाहःसखिभ्य इति टः नोवेति टिलोपः पुण्याहं सुदिनं च तदहश्चे
ति सुदिनशब्दः प्रशस्तपर्यायः 'सुदिनाहं' रात्राह्नाहाः पुंसि एवेत्यस्यापवादोयं 'संख्याव्ययाभ्यां परस्य पथस्य क्लीबता' आभ्यां परः कृतसमासान्तः पथशब्दः क्लीबः।

श्राबन्तो नरपदो द्विगोर्वेप्' पञ्चखट्वी' पञ्चखट्वम्' अनो नलोपो द्विगोर्वेप्' पञ्चतक्षम्' पञ्चतक्षी। पुण्यसुदिनाभ्यामन्हः क्लीबता' पुण्याहम्
सुदिनाहम्' संख्याव्ययाभ्याम्परस्य पथः क्लीबता' त्रिपथम्' विपथं सामान्ये नपुंसकम्' मृदु पचति' प्रातः कमनीयम्' उपज्ञोपक्रमान्तस्तत्पुरु
षः क्लीबम्' उपज्ञायमानोपक्रम्यमाणयोः प्राथम्यञ्चेदाख्यातुमिष्यते' पाणिनेरुपज्ञा पाणिन्युपज्ञम्' नन्दोपक्रमं द्रोणः छायान्तश्च पूर्व
पदार्थबाहुल्ये' इक्षूणां छाया' इक्षुच्छायम्॥ मित्यर्थः। त्रयाणां पथां इति ऋक्पूरब्धूरित्यप्रत्ययः 'त्रिपथं' विरूपः पंथा इति विपथं कथं पुंस्त्वं व्यध्वो दु
रध्वो विपथः कदध्वा कापथः समा इत्यमरे उच्यते प्रमाद एवायमिति बहवः वस्तुतस्तु पथे गतौ इत्यस्मात् पचाद्यच्प्रत्यये पथति व्याप्नोति नित्युत्पादितः पथशब्दः त
था च त्रिकांडशेषः वाटः पथश्च मार्गः स्यादिति अनेन समासे पुंस्त्वमुपपन्नं कापथ इत्यत्र कादेशस्तु ईषदर्थे बोध्यः 'अथ च परवल्लिंगापवादत्वात् तत्पुरुष एवेदं
प्रवर्त्तते नान्यत्र विपथा नगरी' बहुव्रीहिरयं' पंथानमतिक्रांता अतिपथा इहापि न द्विगुप्राप्तापन्नालमिति परवल्लिंगप्रतिषेधात् इति माधवः' सामान्येन पुंसकं अनिय
तलिंगविषयकमिदं' तेनाद्य पचतीत्यादौ पुंस्त्वमेव' मृदु पचतिं क्रियाविशेषणत्वात् द्वितीयांतमिदं धातूपात्तक्रियां प्रति हि फलांशः कर्मीभूतः फलसामानाधिकर राम.
ण्ये द्वितीया' उपज्ञोपक्रमांतः तत्पुरुषः क्लीबं अन्यत्र तत्पुरुषाधिकारोयं' उपज्ञांत उपक्रमांतश्च तत्पुरुषः क्लीबं स्यात्' उपज्ञायते इत्युपज्ञा षिद्भिदादिभ्योऽङ् इति क ६६

र्मण्यङ्‌ उपक्रम्यते इत्युपक्रमः कर्मणि घञ्‌ मांतस्य सेटो न वृद्धिरिति वृद्ध्यभावः उपज्ञा च उपक्रमश्च उपज्ञोपक्रमौ उपज्ञोपक्रमौ अंते यस्य स उपज्ञोपक्रमां
तः उपज्ञा ज्ञानमाद्यं स्यात्‌ ज्ञात्वारंभ उपक्रमइत्यमरः उपज्ञायमानस्योपक्रम्यमाणस्य च प्रथमस्य भावः प्राथम्यं चेद्यदि आख्यातुं वक्तुमिष्यते वांछ्यते पाणि
नेरिति कर्तरि षष्ठी नंदस्योपक्रम इति नंदोपक्रमं छायांतश्च पूर्वपदार्थबाहुल्ये छायांतस्तत्पुरुषो नपुंसकस्यात्‌ पूर्वंचनत्यइ च पूर्वपदं स्यार्थः बहुलस्य भा
वो बाहुल्यं पूर्वपदार्थस्य बाहुल्यं पूर्वपदार्थबाहुल्यं तस्मिन्‌ सेनासुराछायेत्यस्य विकल्पस्यापवादोयं ॥ ॐ ॥ राजपर्यायपूर्वो रक्षःपिशाचादिपूर्वश्च सभांतः क्ली
बं राजपर्यायपूर्वः सभांतस्तत्पुरुषो रक्षःपिशाचादिपूर्वः सभांतस्तत्पुरुषश्च नपुंसकस्यात्‌ इनेश्वरशब्दौ राजपर्यायौ इनस्य सभा इनसभं ईश्वरस्य सभा ईश्वरस
भं राजपर्यायपूर्व इति किं राजसभा रक्षसः सभा रक्षःसभं पिशाचस्य सभा पिशाचसभं संघातार्थसभान्तः संघातार्थो या सभा तदंतस्तत्पुरुषः क्लीबंस्यात्‌ सेनासुरा

राजपर्यायपूर्वो रक्षःपिशाचादिपूर्वश्च सभान्तः क्लीबं इनसभम्‌ ईश्वरसभम्‌ नेह राजसभा रक्षस्सभम्‌ पिशाचसभम्‌ संघाता र्थसभा
न्तः स्त्रीसभम्‌ स्त्रीसंघात इत्यर्थः ॥ सेनासुराछायाशालानिशान्नो वा ब्राह्मणसेनम्‌ यवसुरम्‌ कुड्यच्छायम्‌ गोशालम्‌ श्वनिशम्‌ पक्षे ब्रा

छायाशालानिशांनो वा एतदंतस्तत्पुरुषः क्लीबं स्याद्वा श्वनिशं कृष्णचतुर्दशी अनन्तत्पुरुष इत्यधि ह्मणसेनेत्यादि ॐ इति समासप्रक्रिया समाप्ता ॐ
कारान्नेह दृढसेनो राजा दृढा सेना यस्येति बहुव्रीहिः असेना अविद्यमाना सेना ॥ इति नञ्पूर्वस्तत्पुरुषः ॥ अथ शेषमाह ॥ कृत्तद्धितसमासैकशेषयङ्लुगं
धातुरूपाः पंचवृत्तयः पंचानां वृत्तिरिति   पूर्वाचार्यसंज्ञा वृत्तिलक्षणमाह परार्थाभिधानं वृत्तिः परस्य शब्दस्य योऽर्थस्तस्याऽभिधानं शब्दांतरेण यत्र सा वृ
त्तिः यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थायामनुक्तः पुरुषार्थोऽभिधीयते विग्रहलक्षणमाह वृत्त्यर्थावबोधकं वाक्यं विग्रहः स द्विधा लौकिकोऽलौकि
कश्च परिनिष्ठितत्वात्साधुर्लौकिकः प्रयोगानर्होऽसाधुरलौकिकः यथा राज्ञः पुरुष इति लौकिकविग्रहः राजन्‌ अस्‌ पुरुष सु इत्यलौकिकविग्रहः नित्यस
मासलक्षणमाह अविग्रहो नित्यसमासः लौकिकविग्रहरहितो नित्यसमासो ज्ञेयः लोके यस्य विग्रहो न प्रयुज्यते इति भावः अस्वपदविग्रहो वा समस्यमानयाव

समासः षड्विध इति प्रायोवादः। अव्ययीभावतत्पुरुषद्वंद्वद्विगुबहुव्रीहिकर्मधारयाधिकारबहिर्भूतस्यापि नाम्नश्च कृतेति विधानात्। तद्व्याख्यानेन तत्पुरुष इत्यु
क्ति सुप्रा चामनुरोधेनेति ध्येयम्। पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। उभयपदार्थप्रधानो द्वंद्वः। संख्यापूर्वान्यपदार्थप्रधानो द्विगुः। अन्य
पदार्थप्रधानो बहुव्रीहिः। विशेषणपूर्वकर्मधारय उत्तरपदार्थप्रधानः। विशेष्यपूर्वस्तु पूर्वपदार्थप्रधानः। न तु सार्वत्रिकः। सूपप्रति उन्मत्तगंगमित्याद्यव्ययीभावे अति
मालादौ तत्पुरुषे दंतोष्ठमित्यादौ द्वंद्वे द्वित्रा इत्यादौ बहुव्रीहौ चाऽभावात्। अनेकपदत्वं द्वंद्वबहुव्रीह्योरेव। किं च सिपासिपा तिपा नाम्ना धातुना च तिपाति पा सिबंतेने
ति विज्ञेयः समासः षड्विधो बुधैः १ प्रायो भिप्रायः। सिबंतानां सिबंतेन यथा राजपुरुषः। सिबंतानां तिपा समासो वेदे एव भवति नान्यत्र यथा पर्यभूषत्। सिबंतानां नाम्ना
प्रातिपदिकेन यथा कुंभकारः। अत्र सिबुत्पत्तेः प्रागेवोपपदसमासः। सिबंतानां धातुना यथा कि ब्विप् च्छ्रायतस्तु कटप्रुजुश्रीणामित्यादिनिपातनाद्धातुना समासः क
टप्रूः। अजस्त्रं निपातितिपा समासो यथा क्रियासातत्ये आख्यातं आख्यातेन समस्यते। अश्नीतपिबतेत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता पचतभृज्जता खादतमोदता

ऋपत्येऽण्। नाम्नोऽपत्येऽर्थेऽण्प्रत्ययः॥ ६॥ १॥

तिपा सिपा यथा एहीडादयोऽन्यार्थे समस्यंते एहि ईड इति यस्मिन् कर्मणि तत् एहीडं कृतं विचक्षण इति यस्यां क्रियायां सा कृतं विचक्षणा इवेन नित्यसमासो विभ
क्त्यलोपश्च जीमूतस्येव इति सर्वसमासशेषः। जात्याख्यायामेकस्मिन्बहुवचनं वा। ब्राह्मणाः पूज्याः ब्राह्मणः पूज्यः। एकत्वे द्वित्वे चास्मदो बहुवचनं वा वयं ब्रूमः। अहं ब्रवी
मि आवां ब्रूवो वा उपमानानि सामान्यवचनैः समस्यंते घनश्यामः इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते उपमान
स्य पूर्वनिपातार्थमिदं उपमेयं व्याघ्रादिभिः सामान्याप्रयोगे समस्यते विशेषस्य पूर्वनिपातार्थमिदं पुरुषव्याघ्र इव शूर इत्यर्थः॥ इति समासप्रक्रिया॥ ॥ अथ तद्धि
तो निरूप्यते। तेभ्यः स्याद्यंतपदेभ्यो हितस्तद्धितः विभक्त्यंतनाम्न एव तद्धितोत्पत्तिर्भवतीत्यर्थः। ऋपत्येऽण्। षष्ठ्यंतान्नाम्नोऽण्प्रत्ययो भवति अन्वये सत्यपत्यार्थे राम॰
अन्वयस्तु एकार्थीभाव एव वृत्तौ वाक्ये तु व्यपेक्षालक्षणः। आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे इत्यमरः॥ १००

॥ः१ ७१५ १०५,७४७ १७१५ ॥

आदिस्वरस्यञ्णिति वृद्धिः स्वरेषु आदिः आदिस्वरः निर्द्धारणार्थे सप्तम्यासमासः क्वचिदमाद्यं तस्य परत्वमिति परनिपातः निर्द्धारणषष्ठ्या तु न समासः निर्द्धारणे
रु याषष्ठीति निषेधात् यद्वा वोव्यस्वरेइत्यतः स्वरे इत्यनुवर्त्यं तच्च जातावेकवचनं निर्द्धारणे सप्तम्यं तेन तथा च स्वरेषु यआदिस्वरस्तस्य वृद्धिरिति व्याख्याने आ
दिश्चासो स्वरश्चेति कर्मधारयः ञ्च णश्च ञ्णौ तौ इतौ यस्य स ञ्णित् तस्मिन् ञ्णितिप्रकरणात्तद्धिते इति लभ्यते इच्छ्वच्छन्दस्तु प्रत्येकं संबध्यते द्वन्द्वान्ते श्रूयमाण
त्वात् वोऽव्ययस्वरे उश्च ओश्चानयोः समाहारो वो एकत्वे द्विगुद्वन्द्वावितिनपुंसकत्वे पि न ह्रस्वः अनुकार्यस्वरूपस्य संस्पष्टप्रतिपत्त्यर्थत्वात् अन्यथा संशयः स्यात् ये
श्च स्वरश्च तयोः समाहारः यस्वरं तस्मिन् यस्वरे तद्धितसंबंधिनि अत्रौकारस्य स्वरे चाविसिद्धेपि यकारार्थं तद्ग्रहणं वस्तुतस्तु क्वचिद्यकारेऽपि स्वरकार्यमिति दे
शादेव सिद्धिरित्योग्रहणं व्यर्थमिति ध्येयम् गामुपगतः इत्युपगुः नाम्नश्चेति समासः गोरितिह्रस्वः यादवविशेषस्य उद्धवस्य पूर्वजः कश्चित् उद्धवप्रकृत्यैषोपग

आदिस्वरस्य ञ्णिति च वृद्धिः । स्वराणाम्मध्ये य आदिस्वरस्तस्य वृद्धिर्ञिति णिति च तद्धिते वोऽव्यस्वरे उवर्णस्यौत्त्वश्चाव् तद्धितस्य यकारे स्व
रे च उपगोरपत्यमौपगवः वैदुषः वासिष्ठः गौतमः भार्गवः आङ्गिरसः वैदः और्वः वार्त्रघ्नः ऋ उरणि संख्यासम्भद्रपूर्वस्य मातृशब्द
स्य ऋतउर्भवत्यणि परे षाण्मातुरः द्वैमातुरः साम्मातुरः भाद्रमातुरः १९ विर्जगामेति भागवतात् उपगोरपत्यमिति अणः प्रयोगे उक्तार्थानामप्र

योग इतिन्यायात् पत्यशब्दस्याऽप्रयोगः वाटाह्वो रित्यतो वेत्यनुवर्त्यते तेन पसेषष्ठीसमासोपि उपगवऽपत्यमिति समासस्य वैकल्पिकत्वाद्वाक्यमपि औपगवः स्त्रियां
तु जाते वितीपू औपगवी अन्वये किं वस्त्रमुपगोर पत्यं चैत्रस्य विदुषोपत्यं वैदुषः वसोर्वे उरित्युत्वं वसिष्ठस्य ऋषेरपत्यं वासिष्ठः गौतमस्य ऋषेरपत्यं गौतमः भृगो
ऋषेरपत्यं भार्गवः अंगिरस ऋषेरपत्यं आंगिरसः विदस्यापत्यं वैदः उर्वस्यापत्यं औवर्वः ऋ उरणि सामान्यशब्दस्यापि लक्ष्यानुसारात् विशेषपरत्वं बोध्यं तेन संख्या
दिपूर्वस्य मातृशब्दस्य लाभः षण्णां मातॄणामपत्यमिति तद्धितार्थे द्विगुसमासो यं तनुपण् मातॄणामपत्यमिति विग्रहः दिक्संख्ये संज्ञायामिति नियमेनाऽसंज्ञायां स
मासाभावात् तद्धितान्तस्य संज्ञात्वेपि समासस्यासंज्ञात्वात् आदिस्वरवृद्धिः षोडइति डत्वं क्वचिज्जवस्यापि नमः इति डस्य णः उरण् षाण्मातुरः द्वयोर्मात्रोरपत्यं द्वैमातु

शिवादेभ्योऽण् ॥ शिवादेरणस्यादपत्येऽर्थे इञपवादो ऽयं शिवस्यापत्यं शैवः ॥ लह्यस्यापत्यं लाह्यः ॥ गंगाया अपत्यं गांगः पक्षे गांगेयः ॥ एयणशिवकत्रुन्यथ वनंडजनस्काल
विपाशान्न न स्ननू विश्रवणरवण ऋषिवेणविरूपास्तेन्यादिः ॥ अत इञ ऽनृषे ऋषिवाचकादंतानु अणेव भवति अनृषिवाचकमदंतं यन्नामतिपदिकं तस्म
तिकान्तषष्ठ्यन्तादिञ्स्यादपत्येऽर्थे देवदत्तस्यापत्यं दैवदत्तिः श्रीधरस्यापत्यं श्रैधरिः दशरथस्यापत्यं दाशरथिः ॥ पुरंदरस्याऽपत्यं पौरंदरिः ॥ बह्वादेश्च ॥ बह्वादिभ्य इ
ञ् स्यादपत्येऽर्थे बाह्वादिराकृतिगणोऽयं बाहोरपत्यं बाहविः ॥ उडूनी वलोमानि यस्य स उडुलोमा तारकाप्युडु वा स्त्रियामित्यमरः ॥ उडुलोम्नोऽपत्यमिति टिलोपः
औडुलोमिः ॥ बहुत्वेन स्मादणो वर्णिनो वेत्यणिन्ना वृद्धिः ॥ उडुलोमाः ॥ गर्गस्यापत्यं गार्गिः विदस्यापत्यं वैदिः ॥ नडस्यापत्यं नाडिः ॥ कुंजस्यापत्यं कौंजिः ॥ वह्वादिर्यथा विद

शिवादेभ्यः ॥ शैवः ॥ गाङ्गः ॥ अत इञनृषेः ॥ अकारान्तान्नाम्नोऽनृषिशब्दादपत्येऽर्थे इञ् ॥ दैवदत्तिः ॥ श्रैधरिः ॥ दाशरथिः ॥ पौरन्दरिः ॥ बह्वादेश्च ॥ बहो
रपत्यम्बाहविः ॥ औडुलोमिः ॥ गार्गिः ॥ वैदिः ॥ नाडिः ॥ कौञ्जिः ॥ सुधातृव्यासवरुडनिषादचण्डालविम्बानामकङ् च ॥ सुधातुरपत्यं सौधातकिः ॥ वैयास
किः ॥ वारुडकिः ॥ नैषादकिः ॥ चाण्डालकिः ॥ वैम्बकिः ॥ एण्यायनणोयणीया गर्गानडाश्रिस्त्रीपितृष्वस्रादेश्च ॥ गर्गादेर्ण्यं नडादेरायनण् अत्र्यादे ∧
स्त्रीप्रत्ययान्ताच्चैयण् पितृष्वस्रादेश्छीयोऽपत्येऽर्थे ॥ गार्ग्यः ॥ वात्स्यः ॥ कात्यः ॥ वातण्ड्यः ॥ आवट्यः ॥ माण्डूक्यः ॥ पौतिमाष्यः ॥ नाडायनः ॥ चा
रायणः ॥ गार्ग्यायणः ॥ वात्स्यायनः ॥ आमुष्यायणः ॥ आत्रेयः ॥ कापेयः ॥ नैधेयः ॥ गाङ्गेयः ॥ माहेयः ॥ गौधेयः ॥ नाटेयः ॥ कल्याण्यादेरिनङ् च ॥ का
॥ ल्याणिनेयः ॥ कौलटिनेयः

उर्व ॥ कश्यप ॥ कुशिक ॥ भारद्वाज ॥ उपमन्यु ॥ विश्वानर ॥ परस्त्रीपरसुं च इत्यादि ॥ सुधातृव्यासवरुड निषादचांडालबिंबानामकङ् ॥ ए
णामकङन्तादेशः स्यात् इञ्प्रत्ययश्चाऽपत्येऽर्थे ङित्वादंत्यस्य स्थानेऽकङ् ॥ सुधातुरपत्यं सौधातकिः ॥ वेदान् व्यसतीति वेदव्यासः कार्येणित्यऽण् भीमो भीमसेन इतिवदेक
देशस्य ग्रहणं व्यासस्यापत्यमिति न संधिः ष्वोर्युट् चेति वक्ष्यमाणेनेडागमः ततो वृद्धिर्वैयासकिः ॥ वरुडस्यापत्यं वारुडकिः ॥ वरुडादयो जातिविशेषाः ॥ निषादस्यापत्यं नैषादकिः चांडालस्यापत्यं चांडालकिः विंबस्यापत्यं वैंबकिः ॥ ण्यायनणोयणीयाः ग र्गनडाश्रिस्त्रीपितृष्वस्रादेः एयश्च ॥ आयनण् च एयण् च छीयश्च ते ण्यायनणोय ∧

गीयाः गर्गश्च नडश्च अत्रिस्त्रियौ च पितृष्वसा च एषां समाहारो गर्गनडात्रिस्त्रीपितृष्वसृ गर्गनडात्रिस्त्रीपितृष्वसृ आदिर्यस्य स गर्गनडात्रिस्त्रीपितृष्वस्रादि
स्तस्मात् द्वंद्वांते श्रूयमाणः आदिशब्दः प्रत्येकं संबध्यते स्त्रीशब्देन स्त्रीप्रत्ययस्य ग्रहणान्नादिशब्दप्रयोगः। इह स्वरूपग्रहणं अत्र्यादिषु न स्तु नेष्टं सुग्रहा
त् यथाक्रमेण गर्गादिभ्यो ण्यो ऽपत्येऽर्थे नडादेरायनण ऽपत्येऽर्थे अत्र्यादेः स्त्रीप्रत्ययांताच्च एयण् अपत्येऽर्थे पितृष्वस्रादेरीयो ऽपत्यर्थे इह आयन एय णोर् ण
नत्वादीपः अंतरणकार पाठ सामर्थ्याद्दीर्घ एव ग्रहणपरिभाषाया अनित्यत्वात् अन्यथा रायणीयवनानीपनेयोयाविन्येव ब्रूयादिति गर्गादिर्यथा गर्ग वत्स व्याघ्रपा
द् पुलस्ति विभु मंड वतंड कपि कत शाकल क एवं अगस्त्य कुंडिनी याज्ञवल्क्य पराशर जमदग्नि इत्यादि नडादिर्यथा कुंज ब्रध्न शंख शकट इत्यादि अत्र्यादिर्यथा अत्रि
शुभ्र मृकंड अश्वादिना तृ विधवा गोधा प्रवाहण पांडु इत्यादि गर्गादिशब्दास्तदपत्ये लाक्षणिकाः साक्षादपत्ये इणेवानन्तरापत्ये गार्गिरित्युक्तत्वात् गर्गस्यापत्य
मिति कोऽर्थः गर्गैरपत्यं गार्ग्यः वत्सस्यापत्यं वात्स्यः कतस्यापत्यं कात्यः वनंडस्यापत्यं वानंड्यः। अवटस्यापत्यमावट्यः मंडूकस्यापत्यं मांडूक्यः पूतिमाषस्यापत्यं पौ
तिमाष्यः स्त्रियां तु नडादित्वादीप् हसात्तद्धितयस्येतीति यलोपः गार्गी। वात्सी। नडादित्वात् स्त्रियामायनणि गार्ग्यायणी कात्यायनी वानंडी वानंड्यायनी मांडूक्या
यनी अजादित्वाट्टाप् प्रत्यये आवट्या पौतिमाष्या नडस्यापत्यमिति कोऽर्थः नाडेरपत्यं नाडायनः चरस्यापत्यं चारायणः एवं तानाभिन्नंतानां च नडादित्वे बोध्य
मं गार्ग्यस्यापत्यं गार्ग्यायणः। वात्स्यस्यापत्यं वात्स्यायनः। दाक्षेरपत्यं दाक्षायणः अमुष्यापत्यमामुष्यायणः षष्ठ्या अलुगत्र। अत्रेरपत्यमात्रेयः। कपेरपत्यं कापेयः
। कल्याण्यादेरिनङ् चाएषामिनङादेशः स्त्रीप्रत्ययांतत्वादेयण् प्रत्ययः कल्याणी सुभगा दुर्भगा बंधकी परस्त्री कुलटा इत्यादि कल्याण्या अपत्यं ङित्वादन्त्यस्या
नेइनङ् आदिस्वरवृद्धिः यस्येत्यलोपः काल्याणिनेयः कुलान्यटति भिक्षार्थं हलादेरीषादाविति टेर्लोपः सा कुलटा सती भिक्षुकीत्यत्रेनङ् विधौ गृह्यते यानुव्यभि
चारार्थं कुलान्यटति तस्या एरण् प्रत्यये कौलटेरः। एयणि तु कौलटेयः सतीपक्षे तु इनङ् वा भवति कौलटिनेयः कौलटेयः इति अथ बांधकिनेयः स्याद्बंधुलश्चा
सतीसुतः कौलटेरः कौलटेयो भिक्षुकी तु सती यदि तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मज इत्यमरः सुभगाया अपत्यमिति क्वचिद्द्वयोरिति वक्ष्यमाणेनोभ
यत्रवृद्धिः॥ इनङ् सौभागिनेयः॥ ८॥ ८॥

गोधादेरारगोरणौ॰ गोधादेरारण्‌ आरक्‌ एतौ प्रत्ययौ स्तोऽपत्येऽर्थे गोधाया अपत्यं गोधारः नटयाअपत्यं नाटारः यस्येतिलोपः पंडोनपुंसकस्तस्यापत्यं पांडारः। एरणि
तु गौधेरः नाटेरः पितृष्वस्रादेर्णीयः पितृस्वसेति मातृपितृभ्यां स्वसुरिति षत्वं पितृष्वसुरपत्यं पैतृष्वस्रीयः मातृष्वसुरपत्यं मातृष्वस्रीयः पितृष्वस्रादेरेयणि टि
लोपः पितृष्वस्रादेः टेर्लोपः स्यादेयणि॰ अत्र्यादित्वादेयण पैतृष्वसेयः पांडोर्ड्यण्‌ पाण्डुशब्दात्‌ ड्यण्‌ स्यादपत्येऽर्थे णित्करणं तु पांड्याभार्या इत्यत्र वृद्धिहेतोस्त
द्धितस्यारक्तविकारार्थस्येति पुंवद्भावप्रतिषेधार्थं पांडोरपत्यं पाण्ड्यः चटकादेरण्‌ चटकशब्दादेरण्‌ स्यादपत्येऽर्थे प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमि-
ति परिभाषया स्त्रिया अपि चटकस्य चटकाया वाऽपत्यं चाटकैरः स्त्र्यपत्ये लुक्‌। चटकादेरणो लुक्‌ स्यात्‌ स्त्र्यपत्ये चटका अजादित्वाट्टाप्‌। लुग्बहुत्वे क्वचि

गोधादेरारगोरणौ। गोधारः। नाटारः। पाण्डारः। गौधेरः। नाटेरः। पाण्डेरः। पैतृष्वस्रीयः। मातृष्वस्रीयः। पितृष्वस्रादेरेयण टिलोपः। पैतृष्वसे
यः। मातृष्वसेयः। पाण्डोर्ड्यण। पाण्ड्यः। चटकादेरैरण। चटकस्यापत्यं चाटकैरः। स्त्र्यपत्ये लुक्‌ चटका। लुग्बहुत्वे क्वचित्‌ प्रत्ययस्य ग
र्गाः वसिष्ठाः भृगवः अङ्गिरसः। वत्साः कुत्साः। गौतमाः। अत्रयः। विदाः। अङ्गाः। वङ्गाः कलिङ्गाः विदेहाः स्त्रियामवन्तिकुरुकुन्तिशूरसे
नादिभ्योऽबहुत्वेऽपि। अवन्ती। कुन्ती। कुरूः। शूरसेनी ॥ तत्क्वचिदपत्यप्रत्ययस्य लुक्‌ स्यात्‌ तत्कृते बहुत्वे एव स्यात्‌ लुक्‌। गर्गाः वत्साः। ननु कृते इति किं प्रियोगा
र्ग्या येषां ते प्रियगार्ग्याः स्त्रियां तु न गार्ग्यः स्त्रियः अणो लुक्‌ वशिष्ठाः। भृगवः अंगिरसः। कुत्साः। गौतमाः। विदाउर्वा एपणो लुक्‌ अत्रयः जनपदक्षत्रियवाचिनो
य ऽपत्यप्रत्ययस्य लुक्‌ स्यात्‌ बहुत्वे अणो लुक्‌ अङ्गाः। वङ्गाः। कलिङ्गाः विदेहाः तद्राजन्यर्थे ष्यपत्यप्रत्यया भवंति इक्ष्वाकुणां राजेति निपातनादि टिलोपः। ऐक्ष्वाकः। पंचा
लानां राजा पांचालः बहुत्वे लुक्‌ इक्ष्वाकवः पंचाला इत्यादि। एवमंगानां राजा आंग इत्याद्यपि बोध्यम्‌। स्त्रियामवंतिकुन्तिकुरुशूरसेनादिभ्यो बहुत्वेपि ए
भ्योऽपत्यार्थप्रत्ययस्य लुक्‌ स्यात्‌ स्त्रीप्रत्यये॰ अवंतेरपत्यमावंत्यः स्त्री अवंती कुंतेरपत्यं कौंतेयः स्त्री कुन्ती॰ इतो मनुष्यजातेरिति ऊङ्‌ कुरोरपत्यं कौरव्यः
स्त्री कुरूः उत ऊङ्‌ इति ऊङ्‌ प्रत्ययः शूरसेनस्यापत्यं शौरसेनः स्त्री शूरसेनी मद्रस्यापत्यं माद्रः स्त्री माद्री जातित्वान्ङीप्‌ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ६ ॥ राम

देवतेदमर्थे देवता चइदम च अनयोः समाहारो देवतेदं देवतेदं चासौ अर्थश्च देवतेदमर्थस्तस्मिन् देवतेदमर्थे गम्यमानद्व्येउद्देश्यविशेषो देवताद्वंद्वे नेश्रूयमाण
त्वात्प्रत्येकमर्थशब्दः संबध्यते देवतार्थे इदमर्थे च उक्ता वक्ष्यमाणाः कश्यपिध्य माणाः च प्रत्ययाः स्युः अण् इञ् एयः । आयनण् । एयण् णीय आरण् एरण् ढ्यण्
एरण् एते उक्ता प्रत्ययाः इन्द्रो देवता अस्येति ऐन्द्रं हविः अत्र प्रथमानात्प्रत्ययो देवतास्येति षष्ठ्यर्थे अन्योक्ते प्रथमेति तद्धितेनोक्ते संबंधे प्रथमा स्त्रियां तु न्त्र
णार्ईप् ऐन्द्री दिक् सोमो देवताऽस्येति सोम्यं एयः नद्यादित्वादीप् सौमी ऋक् हसानद्धितयस्येतीति यलोपः अग्निर्देवतास्येति आग्नेयं । एयण् अणं तत्वादीप् आग्ने
यी गृहमेधशब्दोऽदंतः गृहमेधो देवताऽस्येति एयणी यौणिनो वेति वृद्धिः गृहमेधीयं गृहमेध्यं । वास्तोष्पतिर्देवताऽस्येति वास्तोष्पतीयं वास्तोष्पत्यं । वास्तोष्पतिः
सुरपतिरित्यमरः वास्तोः पतिरिति वास्तोष्पतिर्वेश्मभूर्वास्तुरस्त्रियामित्यमरः अग्नीषोमौ देवते अस्येति अग्नीषोमीयं अग्नीषोम्यं मरुत्वान् देवताऽस्येति मरुत्वती
देवतेदमर्थे देवतार्थे इदमर्थे चोक्ता वक्ष्यमाणाश्च प्रत्ययाः इन्द्रो देवताऽस्य ऐन्द्रम् । सौम्यम् । आग्नेयम् । गृहमेधीयम् । वास्तोष्पतीयम् । अ
ग्नीषोमीयम् मरुत्वतीयम् अपोनपाद् पान्नपातोरपोनप्तृ अपान्नप्तृ आदेशौ इ येययोः परतः अपोनप्त्रियम् अपानप्त्रीयम् अपान्नप्त्रिय
म् अपान्नप्त्रीयम् प्रावृषएण्यः । प्रावृड् देवताऽस्य प्रावृषेण्यम् कः प्रजापतिर्देवताऽस्य कायम् । कचिद्द्वयोः पूर्वोत्तरपदाद्यो स्वरयोः कचिद्द्व
यं मरुत्वत्य मइन्द्रो मरुत्वान्मघवेत्यमरः । अपोनपादऽपानपातोरपोनप्तृऽपांनप्तृ आदेशौ ईयेययोः एतयोरपोनप्तृ अपांनप्तृ ॥ द्विर्भवतिञ्णिति आग्निमारुतम् ।
तोस्तः णीय प्रत्यये ईय प्रत्यये च अपोनपाद्देवताऽस्येति अपान्नपान्देवताऽस्येति प्रावृषएण्यः अस्मादेण्यप्रत्ययः स्यात् देवतार्थे प्रवर्षतीति प्रावृट् नहिवृती तिदीर्घः
जातेऽर्थे तु ठक् प्रावृषि जातः प्रावृषिकः प्रावृषेण्यः स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत् स्त्रियामित्यमरः । कस्येकारान्तादेशोऽणि को ब्रह्मा देवताऽस्येति यस्ये
ति लोपान्यरत्वाद्यादिवृद्धिः अपं कायं हविः कचिद्द्वयोः द्वयोरिति षष्ठ्यन्तपदविशेषणं अग्नामरुतौ देवते अस्येति अग्नेरिदिति वक्ष्यमाणेनेकारादेशः उभयत्र वृद्धिः ।
प आग्निमारुतम् अणस्ताम्यर्थवाचकदेवताद्वंद्वे एव पूर्वोत्तरपदादिस्वरवृद्धिविषकमुदाहरणमेतत् तेनेह न स्कंदविशाखयोरयमिति स्कांदविशाखोऽण् पार्वतीनंदनः स्कं
द इत्यमरः नेन्द्रस्य परस्य उभयत्र प्राप्तोपरसंद्रशब्दस्य वृद्धिर्न भवति देवताद्वंद्वे सोमेन्द्रौ देवते अस्येति सोमेंद्रः पशुः अण् परस्येति किम् इंद्राग्नी देवते अस्येति ऐंद्राग्नोऽण्यस्येती

सू॰ सि॰ च॰ टी॰ सु॰ १०३

स्यरस्य वरुणस्य च वृद्धिर्न भवति देवताद्वंद्वे इन्द्रावरुणौ देवते अस्येति देवताद्वंद्वे पूर्वस्य नोत्वं ऐन्द्रावरुणं मित्रावरुणौ देवते अस्येति मैत्रावरुणम् अणदीर्घात् कि
अग्नीवरुणौ देवते अस्येति ईद्ग्नेः सोमवरुणयोरिति ईत्वं ॥ःः॥ अग्नेरिद्वृद्धौ अग्निशब्दस्येत्स्यात् वृद्धिमत्युत्तरपदे देवताद्वंद्वे अलौकिके वाक्ये आत्वमत्वं च
बाधित्वा ईत् विह्लो परे इत्वं न विष्णुशब्दे परे ऽग्निशब्दस्येत्वं आग्नावैष्णवं मण् प्रत्ययः । आग्निवारुणं उभयत्र वृद्धिः । सुहृदो भावः सौहार्द्यं मण् सुभगाया अपत्यं
सौभागिनेयः । एयाणि न ङौ वृद्धी सुभगस्य भावः । सौभाग्यं एपः सक्तुप्रधानाः सिंधवः सक्तुसिंधवः सक्तुसिंधुषु भवः साक्तुसैंधवः अणूवृद्धौ शतेन क्रीतः शतिकः शति
कमनुगतो अनुशतिकः अनुशतिकस्येदं आनुशातिकं अणूवृद्धौ इहलोके भवं ऐहलौकिकं इकः परलोके भवं पारलौकिकं णिनो वा अणादयः कादयश्च णि

अग्नेरिद्वृद्धौ वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्यात् आग्निवारुणम् सौहार्दम् सौभागिनेयः सौभाग्यम् साक्तुसैन्धवः आनुशातिकम् ऐहलौकिक
म् पारलौकिकम् पौर्वाह्णिकम् । णिनो वा । उक्तावस्यमाणाश्च प्रत्यया णितो वा स्वस्रीयः श्वशुरस्यापत्यं श्वाशुर्यः पित्र्यम् गव्यम् पयस्यम् कुल्य
म् तदीयम् त्वदीयम् मदीयम् अन्यस्य दुक् अन्यदीयम् पितुर्भ्रातरि व्यः पितुर्भ्राता पितृव्यः मातुर्भ्रातरि डुलः मातुलः मातृपितृभ्यां पि
तरि मातरि च डामहच् मातुः पिता मातामहः पितामहः मातुर्माता मातामही पितामही ॥ नो वा भवन्ति अणादीनां णित्वे सिद्धे पक्षे निषेधार्थं वचनं कादी
नामणित्वे सिद्धे पक्षे विधानार्थं स च क्वचिन्नित्यनिषेधः क्वचिद्वैकल्पिकः क्वचिद् निषेध एव स्वसुरपत्यं स्वस्रीयः णीयः श्वशुरस्यापत्यं यस्येत्यलोपः श्वाशुर्यः पितुरिदं
मिति क्वचित् स्वरवयकार इति स्वरत्वात् रत्वं पित्र्यं एयः गोरिदं गव्यं एयः स्वरत्वाद्वं पयसि भवं पयस्यं कुले भवं कुल्यं एपः तस्येदं तदीयं तवेदं ममेदं त्वन्मदेकत्वे इति त्वद्
मद् त्वदीयं मदीयं अन्यस्य दुक् अन्यशब्दस्य दुगागमो भवति णीये अषष्ठीतृतीयान्तस्यान्यशब्दस्य दुगागमो वाच्यः आशीराशास्थाऽऽस्थितोत्सुकोतिकारकरागणीये
षु परतः अन्यदाशीः अन्यदाशा अन्यदास्था अन्यदास्थितः अन्यदुत्सुकः अन्यदूतिः अन्यत्कारकः अन्यद्रागः अषष्ठीतृतीयान्तस्येति किम् अन्यस्यान्येन वा आशीः
कारकणीययोरषष्ठीतृतीयान्तस्येति निषेधो न वाच्यः अर्थे परे ऽन्यस्य वा दुक् अन्यार्थे अन्यदर्थः अन्यार्थः अन्यदीयं । पितुर्भ्रातरि व्यः पितृशब्दाद्व्यप्रत्ययो भवति भ्रात्रे

र्थे मातुर्भ्रातरि डुलः मातृशब्दान्डुलप्रत्ययो भवति भ्रात्रे
र्थे डित्वाट्टिलोपः । मातृपितृभ्यां पितरि डामहच् आ...

१०३

पित्रर्थे मात्रर्थे च डित्वात् टिलोपः पित्र्या स्त्रियां ङीप् इतीप् ॥ अवेर्दुग्धे सोढदूसमरीसाः ॥ अविशब्दादेते प्रत्यया भवन्ति दुग्धेऽर्थे सकारपाठ सामर्थ्यान्न षः ॥ अविसोढमि
ति ॥ तिलान्निःफलात्पिञ्जपेजौ ॥ तिलशब्दादेतौ प्रत्ययौ स्तः निःफलेऽर्थे तिलपिञ्जः पिलपेजः वंध्यस्तिल इत्यर्थः ॥ कारकात् क्रियायुक्ते ॥ कारकादणादयः ॥ कादयश्च प्र
त्ययाः स्युः ॥ कर्त्ता कर्म च करणं संप्रदानं तथैव च अपादानाधिकरणे इत्याहुः कारकाणि षट् ॥ इत्यत्र कारकशब्दः सर्वस्मिन्नपि क्रियासाधने दृष्टः स्वार्थिकः कारकः स
गीत्यत्र तु कर्तृमात्रे दृष्टस्तत्र कस्यात्र ग्रहणं उच्यते अत्राद्यस्यैव ग्रहः अन्यथा कर्तुरित्येवावक्ष्यत् ॥ अथ का क्रिया किं च तद्युक्तं उच्यते ॥ व्यापारो भावना सैवोत्पा
दना सैव च क्रिया इति उक्तं च गुणभूतैरवयवैः समूहः क्रमजन्मनां बुद्ध्या प्रकल्पितो भेदः क्रियेति व्यपदिश्यते १ इति स्वभावतो गुणीभूतैरवयवैरवान्तरलक्षणैर्युक्तः

अवेर्दुग्धे सोढदूसमरीसाः ॥ अवेर्दुग्धम् अविसोढम् अविदूसम् अविमरीसम् ॥ तिलान्निष्फलात्पिञ्जपेजौ ॥ निष्फलस्तिलस्तिलपिञ्जः तिलपेजः ॥
कारकान्नत्क्रियायुक्ते ॥ कारकादण्येते प्रत्ययाः क्रियायुक्ते कर्तरि कर्मणि च ॥ कुंकुमेन रक्तं कौङ्कुमम् वस्त्रेण परिवृतो वास्त्रो रथः ॥ काम्बलः ॥ द्वैपः वै
याघ्रः ॥ पाण्डुकम्बलादिनिः ॥ पाण्डुकम्बलेन सम्वीतः पाण्डुकम्बली रथः ॥ वसिष्ठेन दृष्टं वासिष्ठं साम ॥ कालेयम् ॥ वररुचिना कृतो वाररुचो ग्रन्थः
॥ मनुना प्रोक्तो मानवो धर्मः ॥ मथुराया आगतो माथुरः ॥ ग्रामादागतो ग्राम्यः ॥ धुरं वहतीति धुर्यः ॥ धौरेयः ॥ सर्वधुरीणः ॥ एकधुरीणः ॥ मुखपार्श्वतसो
र्लोपश्चेये ॥ मुखतो भवं मुखतीयम् ॥ पार्श्वतीयम् ॥ ॥ क्रमजन्मनां क्षणानां समूहः आचार्यैः क्रियाव्यपदिश्यते कीदृशः संकलनात्मिकया बुद्ध्या ऽभेदात् एक
त्वं प्रकल्पितः तद्युक्तमिति तया क्रियया युक्तं क्रिया चोत्पत्त्युत्पादनारूपा उत्पत्तिः फलं उत्पादना व्यापारः ॥ व्यापारेण युक्तः कर्त्ता फलेन युक्तं कर्म तस्मिन् क्रियायुक्ते कर्त
रि कर्मणि च तेन रक्तं रागात् रज्यते अनेनेति वा हुलकात् करणे घञ् रागो रंजकद्रव्यं तृतीयान्ताद्रागवाचकात्प्रत्ययो रक्तमित्यर्थे कुंकुमेन रक्तं वस्त्रं कौकुमं रंजनक्रियायाः
करणकारकात् कुंकुमादण् तद्युक्तमत्र वस्त्रं कर्मेत्यादि ज्ञेयं लाक्षया रक्तं लाक्षिकं रोचनया रक्तं रौचनिकं ॥ इकः ॥ नील्या रक्तं नीलमणणितो वेति न वृद्धिः पीतेन रक्तं पीत
कं तेन परिवृतो रथः समन्तात् वेष्टितः परिवृत उच्यते तेनेति तृतीयान्तादणादयः परिवृतो रथ इत्यर्थे वास्त्रो रथः अणं कंबलेन परिवृतो रथः कांबलो ॥ अण् द्वीपिनो विकारो द्वैपो द्वै

पौंड्रकंबलादिनिः। पौंड्रकंबलशब्दो राजासत्स्व एव पांडुवर्णकंबलस्य वाचकः। अस्त्यर्थे नैव सिद्धे वचनमणो निवृत्त्यर्थं इकार उच्चारणार्थः। तेन दृष्टं साम। तेनेति तृतीयांता
दणादयः। दृष्टं सामेत्यर्थे वासिष्ठं साम। अण्। कलिना दृष्टं साम कालेयं। ढक् अण् वा। मद्देवेन दृष्टं साम वामदेव्यं। ड्यः। उशनसा दृष्टं साम निपातनाद्विलोपो वा। औशनसं औशनं अ
ण्। तेन कृतो ग्रन्थः। तेनेति तृतीयान्तादणादयः। कृतो ग्रन्थ इत्यर्थे वररुचिना कृतो वाररुचो ग्रन्थः। तेन प्रोक्तं तेनेति यान्तादणादयः प्रोक्तमित्यर्थे मनुना प्रोक्तो मानवो धः
र्मः। अण्। तत आगतः। तत इति पञ्चम्यंतादणादयः आगत इत्यर्थे माथुरः। अण्। ग्राम एयः। तद्वहति तदिति द्वितीयांतादणादयो वहतीत्यर्थे धुरं वहति धुर्यः। एयः। लि
नो वेति न वृद्धिः। य्वोर्विहूस्तेऽइति दीर्घो न संज्ञापूर्वकत्वेन तस्यानित्यत्वात्। धौरेयः। एयण्। सर्वा चासौ धूश्चेति ऋक्पूरित्यःऽप्रत्ययः कर्मधारये इति पुंवत्। सर्वधुरां ताव
हति। यस्येत्यालोपः। सर्वधुरीणः। ईनः। एकाचासौ धूश्चेति एकधुरां तां वहति एकधुरीणः। ईनः। एकधुरः। अण्। शाकटं वहति शाकटकोगौः। रण्। हलं वहति हालिकः। इकः। सी

देवस्वराजजनपराणां कुक् ईये। देवकीयम्। स्वकीयम्। राजकीयम्। जनकीयम्। परकीयम्। मध्यान्मः। मध्यमः। हेमन्तस्य वा तलोपोऽणि। हैमन
म्। हैमन्तम्। चिरपरुत्परारिभ्यस्त्नः। चिरत्नम्। परुत्नम्। परारित्नम्। अग्रादिपश्चाद्दन्ताड्डिमः। अग्रिमम्। आदिमम्। पश्चिमम्। अन्तिमम्। हे
तुमनुष्येभ्यो वा रूप्यमयटौ। समादागतं सम रूप्यम्। सममयम्। समीयम्। देवदत्तमयम्। देवदत्तरूप्यम्। देवदत्तीयम् ॥रं वहति सैरिकः। इ

कः। रथं वहति रथ्यः। एयः। युगं वहति युग्यः। एयः। मुखपार्श्वतसोर्लोपः ईये। मुखं च पार्श्वं च मुखपार्श्वे मुखपार्श्वयोस्तसौ मुखपार्श्वतसौ तयोः षष्ठीनिर्दिष्टत्वात्तस्य लोपः। य
स्येत्यलोपः। मुखतीयं पार्श्वतो भवं पार्श्वतीयं णीयः॥ ॥ देवस्वराजजनपराणां कुक् ईये। एषां कुक् स्यात् णीये देवस्येदं देवकीयम्। स्वस्येदं स्वकीयं। राज्ञ इदं राजकीयं।
नाम्नो नोल्लोप इति नलोपे कृते पश्चात् कुक् बोध्यः। जनस्येदं जनकीयं। परस्येदं परकीयम्। मध्यान्मः। अस्मान्मः प्रत्ययः स्यात् भवाद्यर्थे मध्ये भवो मध्यमः। हेमनस्य।
वा तलोपोऽणि हेमंतादण् स्यात्। तस्य लोपश्च वा हेमंते भवं हैमनं हैमंतं च। चिरपरुत्परारिभ्यस्त्नः एभ्यस्त्नप्रत्ययः स्यात्। चिरशब्दोऽव्ययः परुदित्यव्ययं पूर्वस्मि
न् वत्सरे परारि पूर्वतरे वत्सरेऽव्ययम्। अग्रादिपश्चाद्दन्ताड्डिमः। एभ्यो डिमः प्रत्ययः स्यात्। डित्वाट्टिलोपः। अग्रे भवं अग्रिमं। आदौ भवं आदिमं पश्चाद्भवं पश्चिमं अन्ते भवं।

भ्यो मनुष्यवाचकेभ्यश्च रूप्यमयटौ वास्तः । टो ईश्वर्थः आगतमित्यर्थे समात् मार्गादागतं समरूप्यं सममयं पृक्षेणी यः समीपं देवदत्तादागतं देवदत्तरूप्यं देवदत्तमयं दे
वदत्तीयं लोपः दैवदत्तं अण् ॥ ः ॥ छगलिनो ढिनुक् छगलिन् शब्दात् ढिनुक् प्रत्ययः स्यात् प्रोक्तमधीते इत्यर्थे छागलिना प्रोक्तं शास्त्रमधीयते पठन्ति ये ते छागलेयिनः नो
वेति टिलोपः पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोर्णिनिः आभ्यां णिनिः स्यात् इकार उच्चारणार्थः पाराशर्यो व्यासः अनन्तरापत्येपि उपचाराद्गर्गादिभ्यो यञ् यस्येत्यलो
पेऽकचित् यलोप इति वक्ष्यमाणे न यलोपः पाराशरिणः शिलालिना प्रोक्तं नटसूत्रमधीयते ये ते शैलालिनः कर्मन्दकृशाश्वादिनिः रूक्तविषये आभ्यामिनिः स्यात् कर्मन्देन
प्रोक्तं भिक्षुसूत्रमधीयते ये ते कर्मन्दिनो भिक्षवः कृशाश्वेन प्रोक्तं नटसूत्रमधीयते ये ते कृशाश्विनो नटाः भिक्षुनटसूत्रयोः किं पाराशरं पाराशर्यस्येदं शिलालिन इदं शैला

छगलिनो ढिनुक् । छगलिना प्रोक्तमधीते यः छागलेयिनः पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोर्णिनिः । पाराशर्येण प्रोक्तं भिक्षुसूत्रमधी
यते पाराशरिणो भिक्षवः । शैलालिनो नटाः । कर्मन्दकृशाश्वादिनिः रूक्तविषये । कर्मन्दिनः । कृशाश्विनः । त्रपुजतुनोः षुक् विकारे । त्रापुषम् जातु
षम् । शम्याः ष्लञ् । शामीलो स्रुक् । शक्तियष्ट्योरीकक् प्रहरणे । शाक्तीकः । याष्टीकः । विंशतित्रिंशद्भ्यां ड्वुन्वा । विंशकः । विंशतेस्तिलोपो डितीति ।
। त्रिंशकः । विंशतिकः त्रिंशत्कः । कर्मण उकञ् । कर्मणे प्रभवति कार्मुकम् । मनोर्जातावञ्यतौ षुक् च । मनोरपत्यं मनुष्यः । मानुषः । जातौ किं
॥ म । मानवः ॥

लं कार्मन्दं कार्शाश्वं अण् त्रपुजतुनोः षुक् विकारे । आभ्यां षुगागमः स्यात् विकारे त्रपुणो विकारः त्रापुषं जतुनो विकारः । जातुषं । शम्याः ष्लञ् शमीशब्दा
त् ष्लञ् स्यात् षित्वात् ङीष् शम्या विकारः शामीलं भस्म ष्लुत इत्यनीप् शामीली शक्तियष्ट्योरीकक् प्रहरणे आभ्यामीकक् स्यात् शक्तिः प्रहरणमस्य शाक्तीकः यष्टिः प्रह
रणमस्य याष्टीकः विंशतित्रिंशद्भ्यां ड्वुन्वा तेनं क्रीतमित्यर्थे आभ्यां ड्वुन् प्रत्ययौ स्तः । असंज्ञायामर्थे ड्वुन् विंशतेस्तिलोपो डितीति तिशब्दलोपः विंशकः
त्रिंशकः संज्ञायां तु कः विंशतिकः त्रिंशत्कः । कर्मण उकञ् । कर्मशब्दादुकञ् स्यात् तस्मै प्रभवतीत्यर्थे समर्थः शक्तः प्रभवतीत्युच्यते मनोर्जातावञ्यतौ षुक्
पौ मनुशब्दादेतौ स्तः अपत्यत्वे जातौ वाच्ये समुदायार्थो जातिः । मनुष्यः । मानुषः । जातिशब्दावेतौ ॥ ॥ ६ ॥ ॥

केनेयेकाः। कश्चईनश्चइयश्चइकश्चतेक्रममधीतेक्रमकः। क्रमपदशिक्षामीमांसाः क्रमादयः। एभ्यः कः पूर्वस्यह्रस्वोनिपातनात् 'शिक्षकः' मीमांसामधीतेमीमां
सकः। ग्रामेभवः 'ग्रामीणः' ईनः ग्राम्योपिएयः' सध्यङे वसध्रीचीनः' सम्यङेव समीचीनः' तिर्यङे वतिरश्चीनः' सहांचतीतिसध्यङ्' अंचत्यंतोत्नाम्नः स्वार्थेईनोवा दिशिन'
प्राक् प्राचीनं प्रत्यक् प्रतीचीनं अवाक् अवाचीनं अर्वाक् अर्वाचीनं' अर्वं अंचतीति अर्वाक् निक्रष्टप्रतिक्रष्टावरे फयाप्याऽवमाऽधमाद्यमरः। दिशितुप्राचीदिक् अ
चेरहीघेश्चेति अलोपपूर्वदीर्घौ उदीचीदिक् तिरश्चादय इति उदीचादेशः कुलस्यापत्यमितिकुलीनः। तदंतादपिमहच्चतत्कुलंचेतिसहादेः सादिः सादिरितिमहा
कुलस्यापत्यंमहाकुलीनः। आढ्यंचतत् कुलंच आढ्यकुलं आढ्यकुलस्यापत्यमाढ्यकुलीनः। क्वचिद्यलोपः। क्वचिद्दसान्यस्ययकारस्यलोपः स्यात् नह्निनेस्वे

केनेयेकाः। कारकान्तईनईयइकइत्येतेप्रत्ययाभवन्तिकर्त्तरिकर्म्मणिचोक्तवक्ष्यमाणेष्वर्थेषुचणितोवा। क्रममधीतेक्रमकः। पदकः। ग्रामादा
गतस्तत्रजातोवाग्रामीणः। सध्रीचीनः। समीचीनः। तिरश्चीनः। कुलस्यापत्यंकुलीनः। महाकुलीनः। आढ्यकुलीनः। क्वचिद्यलोपः कन्यायाअ
पत्यंकानीनः। कान्यस्येमेकानीयाः छात्राः' गार्गीयाः' रेवत्यपत्यंरैवतिकः। पुष्येणयुक्तापौर्णमासीपौषी। नैषी' क्षत्रस्यापत्यंक्षत्रियः। शुक्रो
देवतास्यशुक्रियम्। इन्द्रस्यलिङ्गमिन्द्रियम्। असेर्दीव्यतीत्यासिकः। कुद्दालेःखनतिकौद्दालिकः ॥नत्वाकारेंकन्यायाअपत्यमितिएयणोपवादईनः

।यस्येत्यालोपः। ततोयलोपः णितोवेतिणित्वाद्वृद्धिः' कानीनोव्यासः कर्णश्च' अविवाहितायाअपत्यमित्यर्थः कान्यस्येमेगर्गादिण्यंतात्णीयेयलोपः कानीयाः गार्गस्ये
मेगार्गीयाः' यलोपः' नत्वाकारेइतिकिं' गार्ग्यायणः' इहनयलोपः' रैवतिकः' णितोवेतिणित्वाद्वृद्धिः रेवती' अश्वपालीमणिपालीद्वारपालीत्यादिरेवत्यादयः नक्षत्रे
णयुक्तः कालः तृतीयांततनक्षत्रशब्दात्प्रत्ययात् युक्तः कालइत्यर्थे' पुष्येणयुक्तंपौषमहः' अण्' स्त्रियांतुत्रणईपूतिष्यपुष्ययोर्नक्षत्राणीतियलोपः पौषीतिष्येण
युक्तानैषीक्षत्रशब्दाज्ज्ञातविषयः क्षत्रियः क्षात्रिरन्यः शुक्रियोहविः' इयः' इन्द्रस्यात्मनोलिंगंचिन्हमितिइंद्रियंतेनदीव्यतिखनतिजयतिजितंने नेतितृतीयांता एम
दिकोदीव्यत्यादिष्वर्थेषुणितोवेतिणित्वाद्वृद्धिः। असैःपाशकैर्दीव्यत्यासिकः कुद्दालैःखनतिकौद्दालिकः गोदारणंतुकुद्दालइतिहेमः असैर्जेपत्यासिकः असे १०५

हलंसीरंवहतिहालिकः।इकः।तेनेनितृतीयांतादिकः संस्कृतेऽर्थे२तेनसंस्कृतेऽर्थे२तेनसंस्कृतं।दध्नासंस्कृतंदाधिकम्।मरिचैःसंस्कृतंमारिचिकं।शब्दंकरोतिशाब्दिकः।प्रकृतिविभागेनशब्दंव्युत्पादयतीत्यर्थः।दर्दुरंकरोतिदार्दुरिकः।इहदर्दुरशब्दःवाद्यभांडवाचीकुलालःइत्यर्थः।धर्मंचरतिधार्मिकः।सद्वृत्तइत्यर्थः।अधर्मंचरत्याधर्मिकः।असद्वृत्तइत्यर्थः।पक्षिणोहंतिनोवेतिटिलोपः।इकः।पाक्षिकः।शकुनंहंतिशाकुनिकः।तिरिंहंति नैतिरिकः।मत्स्यंहंतिमात्स्यिकः।मीनंहंतिमैनिकः।मृगंहंतिमार्गिकः।सारंगंहंतिसारंगिकः।मयूरंहंतिमायूरिकः।पुराणमधीतेपौराणिकः।इतिहासमधीतेवेत्तिवाऐतिहासिकः।वेदमधीतेवेत्तिवावैदिकः।णोनोवेतिणित्वाद्वृद्धिः।पील्वादिकर्णादिभ्यःकुणज्जाहचौपाकमूलयोः।पील्वादिभ्यःकर्णादिभ्यश्चकुणजाहचौप्रत्ययौस्तःपाकमूलयोरर्थयोः।पाकःपरिणामः।मूलमुपक्रमः।

हलम्वहतिहालिकः।शब्दङ्करोतिशाब्दिकः।दार्दुरिकः।धर्मञ्चरतिधार्म्मिकः।आधर्म्मिकः।पक्षिणोहन्तिपाक्षिकः।शाकुनिकः।तैत्तिरिकः।मात्स्यिकः।मैनिकः।मार्गिकः।सारङ्गिकः।पुराणमधीतेपौराणिकः।ऐतिहासिकः।वैदिकः।पील्वादिकर्णादिभ्यः कुणज्जाहचौपाकमूलयोः।पीलूनांपाकः।पीलुकुणः।कर्णस्यमूलंकर्णजाहम्।पक्षात्तिर्मूले।पक्षस्यमूलंपक्षतिः।चञ्चुचणौवित्ते।विद्ययावित्तोविद्याचञ्चुः।विद्याचणः।वेःशालशंकटौ।विस्तृतंविशालंविसम्प्रोदःकटः।विकटम्।सङ्कटम्।प्रकटम्।उत्कटम्।अलाबूतिलोमाभङ्गाभ्योरजसि।अलाबूनांरजोऽलाबूकटम्।तिलकटम्।उमाकटम्।भङ्गाकटम्।

॥पीलुकर्कंधुशमीकरीरकुवलबदरखदिरपील्वादयः।कर्णअक्षिनखमुखकेशपादगुल्फभ्रूशृंगदंतओष्ठपृष्ठकर्णादयः।पक्षात्तिर्मूलेपक्षशब्दात्तिप्रत्ययःस्यात्मूलेऽर्थे।पक्षतिः।प्रतिपत्।चञ्चुचणौवित्ते।चंचुचणौप्रत्ययौस्तोवित्तेऽर्थे।वित्तोभोग्यप्रतीतयोरितिनिपातनात्।दस्तस्येतिनत्वंनवेःशालशंकटौवेःस्वार्थेएतौस्तः।विस्तृतंविशालंविशंकटं।विनञ्भ्यांनानाञौनसहअसहार्थेपृथग्भावेवर्तमानाभ्यांनानाञौस्तः।विनानाना।विसंप्रोदःकटः।एभ्यःकटप्रत्ययःस्यात्स्वार्थे।विकटं।विकृतं।संकटं।संहतं।संबाधं।इत्यर्थः।प्रकटंप्रज्ञातंप्रकाशितेनेत्यर्थः।उत्कटमुद्भूतं।रूढशब्दाश्चैतेकथंचिद्व्युत्पाद्यन्ते।अलाबूतिलोमाभंगाभ्योरजसि।एभ्योरजसभिधेयेकटप्रत्ययःस्यात्।रजसोविकारत्वात्विकारार्थप्रत्ययानामपवादोयम्।अलाबूनांरजःअला

पू.
सि. चं.
टी.
१०६

गोष्ठादयः स्थानादिषु पशुनामभ्यः। पशुनामभ्यो गोष्ठादयः प्रत्ययाः सुः स्थानादिष्वर्थेषु। संघाते कटः। अप्रस्तुतावयवसमूहः। संघातस्तत्र कटप्रत्ययः सामूहिकानामपवादोयम्। विस्तारे पटः। प्रस्तुतावयवः समूहो विस्तारस्तत्र पटः प्रत्ययः सामूहिकानामपवादोयम्। द्वित्वे गोयुगः। प्रकृत्यर्थस्य द्वित्वे द्योत्ये गोयुगप्रत्ययः स्यात्। उष्ट्र गोयुगप्रत्ययः स्यात्। उष्ट्रगोयुगं द्वयं युगमित्यादिवत्। द्व्यवयवसंघातप्राधान्यादेकवचनमित्यर्थः। षट्त्वे षड्गवः। षट्त्वे वाच्ये षड्गवप्रत्ययः स्यात्। अश्वानां षट्त्वे अश्वषड्गवं अवयवसंघातस्य प्राधान्यादेकवचनं। स्नेहे तैलः। स्नेहे वाच्ये तैलप्रत्ययः। तिलानां स्नेहः तिलतैलं सर्षपाणां स्नेहः सर्षपतैलं भवने क्षेत्रे शाकटशाकिनौ भवने क्षेत्रे इत्यर्थे शाकट शाकिनौ प्रत्ययौ भवतः। अवात् कुटारकटौ अवशब्दात् कुटारकटौ प्रत्ययौ भवतः। अवाचीने हीनेर्थे अवकुटारावकटशब्दौ वेदे प्रसिद्धौ

गोष्ठादयः स्थानादिषु पशुनामभ्यः। गवां स्थानं गोगोष्ठम्। अश्वगोष्ठम्। संघाते कटः। अवीनां संघातोऽविकटः। विस्तारे पटः। अविपटः। द्वित्वे गोयुगः। द्वावुष्ट्रौ उष्ट्रगोयुगम्। षट्त्वे षड्गवः। अश्वषड्गवम्। स्नेहे तैलः। तिलतैलम्। सर्षपतैलम्। भवने क्षेत्रे शाकटशाकिनौ। इक्षूणां भवनं क्षेत्रं इक्षुशाकटम्। इक्षुशाकिनम्। अवात्कुटारकटौ। अवाचीनोऽवकुटारः। अवकटः। नासिकायां नते संज्ञायां टीटनाटभ्रटाः। अवात्। नासिकायां नतं अवटीटम्। अवनाटम्। अवभ्रटम्। तद्योगान्नासिकावटीटा। पुरुषोऽवटीटः। नेर्बिडच्बिरीसचौ। निबिडम्। निबिरीसम्। इनच्पिटच्काश्च प्रत्यया नेश्चिक चि कादेशाः। चिकिनम्। चिपिटम्। चिक्कम्। क्लिन्नस्य चिलपिलचुलोलः प्रत्ययोऽस्य चक्षुषी इत्यर्थे। क्लिन्ने चक्षुषी अस्य चिल्लः। पिल्लः। चुल्लः॥ वि

नासिकायां नते संज्ञायां टीटनाटभ्रटाः। अवात् नासिकासाधनके नमने वर्तमानादवशब्दादेते प्रत्ययाः स्वार्थे संज्ञायां वाच्यायां नतमिति नपुंसके भावे क्तः। नमनं नीचैस्त्वं कथं तर्हि नासिकायां पुरुषे चावटीटशब्दप्रयोग इत्यत आह तद्योगादिति। नेर्बिडबिरीसौ उक्तेर्थे निशब्दान्नासिकायानतेऽभिधेये बिडबिरीसौ प्रत्ययौ स्तः। इनपिटकाः प्रत्ययाः नेः चि चिकादेशाः। उक्तेर्थे नासिकायानतेऽभिधेये इनपिटकाः प्रत्ययाः सुः निःशब्दस्य चिक चि चिकाः यथाक्रममादेशाश्च। क्लिन्नस्य चिलपिलचुलोलः प्रत्ययोऽस्य चक्षुषी इत्यर्थे अस्य चक्षुषी एतत् क्लिन्नर्थे क्लिन्नशब्दाल्लप्रत्ययः स्यात्। क्लिन्नस्य चिल् पिल् चुल् आदेशश्च कथं॥ राम
१०६

तर्हि सुःक्लिन्नासे विह्वतुल्यपिल्लाः क्लिन्नेऽस्मिंश्चाप्यमी इत्यमरः इति चेत् अत्राहुः। पुरुषेव्युत्पादितानां तदवयवे लक्षणाबोध्यात्र॥ ❁ ॥ उपाधिभ्यामासन्नारूढयोस्त्यकः। उपाधिभ्यां त्यक प्रत्ययः स्यात्। आसन्नं समीपं आरूढमुच्चस्थानं तत्रसंज्ञायां पर्वतस्यासन्नं स्थलमुपत्यका आरूढं स्थलमधित्यका क्षिपकादित्वान् काप्यत इतीत्वं न। कर्मणो ठो घटते इत्यर्थे सप्तम्यंतात् कर्मशब्दाट्ठप्रत्ययः स्यात् घटते चेष्टते इत्यर्थे नोवेति टिलोपः कर्मठः शूरः कर्मठ इत्यमरः। साक्षाद्द्रष्टरि संज्ञायां डिनिः द्रष्टर्यर्थे साक्षादित्यव्ययात् डिनिः स्यात् डित्वाट्टिलोपः संज्ञायामर्थे इनामिति दीर्घः। साक्षी इष्टादिभ्य इनिरनेनेत्यर्थे एभ्यः इनिप्रत्ययः स्यात्। अनेने

उपाधिभ्यामासन्नारूढयोस्त्यकः। पर्वतस्यासन्ना भूमिरुपत्यका। आरूढा अधित्यका। कर्मणि घटते इत्यर्थे। कर्मणि घटते कर्मठः। साक्षाद्द्रष्टरि संज्ञायां डिनिः। साक्षाद्द्रष्टा साक्षी। इष्टादिभ्य इनिरनेनेत्यर्थे। इष्टमनेन इष्टी। अधीती हैयङ्गवीन श्रोत्रियक्षेत्रियअनुपदीत्यादयो निपात्याः। ह्योगोदोहोद्भवं हैयङ्गवीनम्। छन्दोऽधीते श्रोत्रियः। परक्षेत्रे चिकित्स्यः क्षेत्रियः। अनुपदमन्वेष्टा अनुपदी। आख्यातान्ययसर्वादेष्टेः प्रागकः। पचतकि। उच्चकैः। नीचकैः। सर्वकः। त्वयकम्। असकौ। त्वकम्। अहकम्। त्यप् तनौ भवाद्यर्थे त्यप्तनौ प्रत्ययौ स्तः अव्ययात्। कुत्र भवः कुत्रत्यः। कुतस्त्यः। अमात्यः। इहत्यः। अव्ययस्य तद्धितयस्वरयोष्टिलोपः। बहिर्भवो बाह्यः। स्वस्वर्गो भवः सौवः। पौनःपुन्यम्। पौनःपुनिकः। दक्षिणा पश्चात् पुरसस्त्यण्। दाक्षिणात्यः। पाश्चात्त्यः। पौरस्त्यः। ऐषमस्त्यम्। ऐषमस्तनम्

इति कर्त्रर्थे अधीतमनेनेति अधीती हैयंगवीनं श्रोत्रियः क्षेत्रियोऽनुपदी इत्यादयो निपात्याः। ह्यस्तने इति दोहः। क्षीरं ह्योगोदोहस्य विकार इति ह्योगोदोहस्य हियंगु आदेशो विकारार्थे ईन प्रत्ययश्च निपात्यते णितो वेति णित्वाद्वृद्धिः। वोऽव्ययस्वरे इत्यव्। हैयंगवीनं नवनीतं छंदस श्रोत्रभावो निपात्यते तदधीते इत्येतस्मिन्नर्थे इयप्रत्ययश्च णितो वेति वृद्ध्यभावः। श्रोत्रियः। परक्षेत्रशब्दात् सप्तम्यंतात् इयप्रत्ययः। परशब्दस्य लोपश्च निपात्यते क्षेत्रियो व्याधिः। शरीरान्तरे चिकित्स्यः अप्रतीकार्य इत्यर्थः। अनुपदशब्दादन्वेष्टरि इन् प्रत्ययो निपात्यते पदस्य पश्चादनुपदम्। आख्यातान्ययसर्वादेष्टेः प्रागकः एभ्यष्टेः प्राक् अक प्रत्ययः स्यात् स्वार्थे अंत्योऽकार उच्चारणार्थः। त्यप्तनौ भवाद्यर्थे एतौ स्तः अमेहक्वतसस्त्रे

सहार्थयोः अमाभवः अमात्यः ॥ ः ॥ दक्षिणापश्चात्पुरसस्त्यण् एभ्यस्त्यण् स्यात् भवाद्यर्थे दक्षिणो त्यादंतमव्ययं दक्षिणाभवः दाक्षिणात्यः ऐषमोह्यःश्वसो वा
त्यः पक्षे तनः अत्र वर्षे ऐषमः अतीतेऽह्नि ह्यः आगामिदिने श्वः श्वसस्तिकण् वा श्वसऽव्ययात्तिकणपि स्यात् श्वोभवसितिनसंधियोरित्युडागमद्वौ शौवस्तिकं
कालवाचिभ्योऽव्ययेभ्यः सायंचिरंप्राह्णेप्रगेइति चतुर्भ्यश्च तनः स्यात् दोषेति रात्रौ दोषाभवः दोषातन प्राह्णेतनः प्रगेप्रातर्भवः प्रगेतनः सप्तम्यास्त्रलुक् उभयत्र स्यतेर्घ
ञि आतो युगिति युकि कृते सायशब्दोऽकारान्तो दिवसावसाने रूढः तस्य चिरशब्दोप्यदन्तस्तस्यापि प्रत्ययसंनियोगेन मांतत्वं प्राह्णप्रगयोरेदन्तत्वं च निपात्यते इ
ति वार्तिककृन्मतं भाष्ये तु सायं चिरं च मान्तमव्ययं स्वीकृतं। स्वार्थेऽपि प्रकृत्यर्थे ष्यणादयः स्युः देवदत्त एव दैवदत्तकः णितो वेति णित्वाद्वृद्धिः चोर एव चौरः वय एव वा

श्वसस्तिकण् वा। शौवस्तिकम्। अद्यतनः। ह्यस्तनः। श्वस्तनः। सनातनः। सदातनः। पुरातनः। दोषातनः। सायन्तनः। चिरन्तनः। प्राह्णेतनः। स्वा
र्थेऽपि। उक्ता वक्ष्यमाणाश्च प्रत्ययाः स्वार्थे स्युः। देवदत्त एव दैवदत्तकः। चौरः। वय एव वायसः। रक्ष एव राक्षसः। चत्वारो वर्णाश्चातुर्वर्ण्यम्।
समीपमेव सामीप्यम्। चत्वारो वेदाश्चातुर्वैद्यम्। प्रज्ञ एव प्राज्ञः। चातुराश्रम्यम्। त्रैलोक्यम्। अनन्त एवानन्त्यम्। आवसथ एवावसथ्यम्। इति
ह एवैतिह्यम्। भेषजमेव भैषज्यम्। भागरूपनामभ्यो धेयः। भाग एव भागधेयं। नामधेयं। रूपधेयम्। देवात्तः। देव एव देवता। मृदस्तिकः
। मृदेव मृत्तिका। सस्नौ प्रशंसायाम्। प्रशस्ता मृत् मृत्सा। मृत्स्ना

॥ यसः रक्ष एव राक्षसः अण् चत्वारश्चैते वर्णाश्च चतुर्वर्णाः चतुर्वर्णा एव चातुर्वर्ण्यं सामीप्ये ष्यञ्
। चतुरो वेदानधीते इति तद्धितार्थे द्विगुः तमधीते इत्यर्थेऽण् तस्य लुक् च चतुर्वेद एव उभयत्र वृद्धिः चातुर्वैद्यः ष्यञ्प्रत्ययः चत्वारश्चते वेदाश्च चतुर्वेदाः चतुर्वेदा
एव चातुर्वैद्यमिति वा प्रज्ञ एव प्राज्ञः अण् चत्वार आश्रमा एव चातुराश्रम्यं ष्यञ् त्रयश्च ते लोकाश्च त्रिलोकाः त्रिलोका एव त्रैलोक्यं अनंत एवानन्त्यः ष्यञ्। आवसथ
एवेति उपसर्गे वसेरथप्रत्ययः आवसथ्यं गृहं ष्यञ्। इति हेति निपातसमुदायः इति ह प्रोचुर्वृद्धा इति ऐतिह्यम् ष्यञ् भिषज्यतेः कंड्वादियगंतात् क्विप् भिषक् भिषजा
मिदं भेषजं अणि निपातनादेकारः भैषज्यं ष्यञ् भागरूपनामभ्यो धेयः एभ्यो धेयप्रत्ययः स्यात् स्वार्थे दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिरित्यमरः आख्याह्वे अभिधा

देवात्तः देवशब्दात्तप्रत्ययः स्यात्स्वार्थे तां तं स्त्रियाम् इस्तिकः मृदशब्दात्तिकप्रत्ययः स्यात् स्वार्थे सस्नौ प्रशंसायां रूपप्रत्ययस्यापवादौ मृदः सस्नौ प्रत्ययौ स्तः प्रशंसायामर्थे मृत्स्ना मृत्तिका प्रशस्ता तु मृत्स्ना मृत्स्ना च मृत्तिकेत्यमरः ॥ ॥ अणीनयोर्युष्मदस्मदोर्युष्माकास्माकौ एनयोर्द्वित्वे बहुत्वे च वर्तमानयोर्युष्माकास्माकावादेशौ स्तः अणीनयोः परतः एकत्वे तु तवकममकौ एकत्वे वर्तमानयोर्युष्मदस्मदोस्तवकममकावादेशौ स्तः । अणीनयोः परतः वत्तुल्ये तुल्यत्वे सादृश्ये नोन्मीयते त्रायते तुल उन्मानेऽस्मात् कप् तुल्या यद्वा तोलनं तुला जेर्भावे भिदायङ् तुलया संमितं तुल्यं कारकादिति यः णितो वेत्यणित्वं तृतीयांतात् सप्तम्यंतात् षष्ठ्यंताच्च वत्प्रत्ययः स्यात् तुल्ये सादृश्येऽर्थे ब्राह्मणेन तुल्यं ब्राह्मणवद्धीते तृतीयांतात् तु क्रियातुल्य एव गुणतुल्ये मा भूत् पुत्रेण तुल्यः स्थूलः द्रव्यतुल्ये

अणीनयोर्युष्मदस्मदोर्युष्माकास्माकौ । एकार्थयोस्तवकममकौ । युवयोर्यौष्माकम्वायं यौष्माकः । यौष्माकीनः अनयोरस्माकम्वायं आस्माकः । आस्माकीनः । तवायन्तावकः । ममायम्मामकः । तावकीनः । मामकीनः । वत्तुल्ये सादृश्येऽर्थे वत्प्रत्ययः । चन्द्रेण तुल्यश्चन्द्रवत् । ब्राह्मणवत् । क्षत्रियवत् । मथुरायामिव मथुरावत् पाटलिपुत्रे इव प्राकारः पाटलिपुत्रवत् । चैत्रस्येव चैत्रवत् मैत्रस्य गृहम् । अर्हेऽपि विधिमर्हतीति विधिवत् । भावे तत्वयणः । शब्दस्य प्रवृत्तिनिमित्तम्भावस्तत्र वाच्ये एते स्युः तान्तं स्त्रियां त्वान्तं क्लीबम् । ब्राह्मणता । ब्राह्मणत्वम् । ब्राह्मण्यम् । शुक्लता । शुक्लत्वम् । शौक्ल्यम् । वैदुष्यम् ॥

पि न गवा तुल्यो गवयः वत्सप्तम्यंतात् षष्ठ्यंताच्च क्रियातुल्येऽपि भवतीत्यर्थः । मथुरावत् । पाटलिपुत्रे प्राकारः मथुरायां यादृशः प्राकारस्तादृशः पाटलिपुत्रे इत्यर्थः अर्हेऽपि अर्हेऽर्थेऽपि द्वितीयांतात् वत् स्यात् क्रियातुल्ये विधिमर्हतीति विधिवत् पूज्यते विधानं विधिः । अर्हतीति अर्हः पचाद्यच् । भावे तत्वयणः । तश्च त्वश्च यण् च तत्वयणः भावे तत्वयणः प्रत्ययाः अणादयश्च स्युः भावशब्दोऽनेकार्थवचनः अभिप्राये यथायं भावः पदार्थमात्रे यथा विचित्रा भावशक्तयः शृंगारादिषु यथा स्थायिभावः संचारिभावः प्रवृत्तिनिमित्ते धात्वर्थमात्रे च भावः तेष्वत्र कस्य ग्रहणं उच्यते प्रवृत्तिनिमित्तवचनस्य भावस्य ग्रहणं भवति शब्दात्र नेने निवृत्यते अभिप्रायादिवचनस्यात्र अग्रहोऽनभिधानात् तथा च सिद्धान्तकौमुद्यां प्रकृतिजन्यबोधे प्रकारो भाव इति उक्तं च हरिटीकायां

कृत्तद्धितसमासेभ्यः संबंधाभिधानं भावप्रत्ययेनेति॰ तेनपाचकत्वमित्यत्रकर्तृस्वरूपः संबंधः औपगवत्वमित्यत्रजन्यत्वरूपः संबंधः राजपुरुषत्वमित्यत्रस्वरू
पसंबंधः तप्रत्ययांतस्त्रीलिंगं।त्वप्रत्ययांतंनपुंसकं।यणंतमुभयत्रमैत्र्यंमैत्रीत्यादि॰ ब्राह्मणस्यभावः यस्येत्यऽलोपः ब्राह्मण्यंशुक्लायाभावः त्वतयोर्गुणवचन
स्येतिपुंवद्भावः।शुक्लत्वं॥ ॥ कर्मण्यपि।कर्मण्यर्थेपितत्वयणः प्रत्ययाअणादयश्चसुः राज्ञोभावःकर्मवानोवेतिटिलोपः राज्यंयण्स्तेनस्यचौरस्यभावः।
कर्मवास्तेन्यं।यण्।लोहितादेर्डिमन् लोहितादेर्गणात्डिमन्प्रत्ययस्तादयश्चभावेलोहितस्यभावःडित्वाट्टिलोपः लोहितिमाअणोर्भावः।अणिमा।लघोर्भावः
लघिमाभावेऽणपि।अणप्रत्ययोपिस्यात्॰ भावेगुरोर्भावोगौरवंवोऽव् यस्वरेइत्यव्॰ यूनोभावः।नोवेतिटिलोपोनयौवनं शिशोर्वाभावः शैशवंमुनेर्भावः मौनंहोतु

कर्मण्यपि।ब्राह्मणस्यकर्मब्राह्मण्यम् राज्यम् स्तैन्यम् लोहितादेर्डिमन्भावेवा।लोहितिमा लोहितता लोहितत्वम् लौहित्यम् अणिमा ल
घिमा भावेऽणपि।लाघवम्।गौरवम्॰ यौवनम्।शैशवम्।मौनम् हौत्रम्।औद्गात्रम्।महतोभावोमहिमा।ऋतइमनि।हसादेर्लघोऋकार
स्यरेफोभवतिइमनिइष्ठेयस्सुच।पृथोर्भावः प्रथिमा।म्रदिमा।कृशिमा।द्रढिमा।लघोः किम्।कृष्णिमा।हसादेः किम्।ऋजिमा।बहो
र्लोपोभूश्चबहोः।बहोःपरेषामिमनादीनामिवर्णस्यलोपोबहोर्भूरादेशश्च॰ बह्वोर्भावोभूमा।स्तेनाद्योनलोपश्चस्तेनस्यकर्मभावोवास्तेयम्
।समूहे॰ थेऽपि।मयूराणांसमूहोमायूरम्॰ कौशिकम्॰ सैत्रम्॰ कैदारिकम्॰ गाणिकम्॰ तद्धितयस्वरयोःपुम्वत्॥ भावः हौत्रम्।उद्गातुर्भावः

औद्गात्रं महतोभावः टिलोपः महिमा।ऋतइमनि॰ ऋइतिषष्ठ्यंतंसांकेतिकं पृथोर्भावः टिलोपःरत्वंप्रथिमा अणिमा पार्थवम्॰ मृदोर्भावः म्रदिमा मार्दवंकृशस्यभा
वः कृशिमा दृढस्यभावः द्रढिमा कृष्णस्यभावः कृष्णिमा लघोर्भावान्नरत्वंऋजोर्भावः ऋजिमा हसादित्वाभावान्नरत्वम् बहोर्लोपोभूचबहोः बहुरुदंतः शेषंसुग
मं स्तेनाद्योनलोपश्चस्तेनशब्दाद्यप्रत्ययःस्याद्भावेकर्मणिचाद्यैर्नलोपश्चस्तेनचौर्येपचाद्यः स्तेयंचौर्यसमूहेऽर्थेपि समूहेऽर्थेपिअणादयः प्रत्ययाःसुः मयू
राणांसमूहः अण्मायूरं काकानांसमूहः काकं क्षेत्राणांसमूहः क्षैत्रंकेदाराणांसमूहः इकः णिनोवेतिणित्वाद्वृद्धिः। कैदारिकं गणिकानांसमूहोयगाणिक्य॥ राम १०८

हस्तिनां हस्तिनीनां वा समूहः इकः यस्य लोप इति लोपे नो वेति टिलोपः। हास्तिकं गर्भिणीनां समूहो ऽण् यस्य लोप इति लोपः गार्भिणं नो वेति टिलोपाऽभावोऽत्र ग्रा
ना माणां समूहः तः। ग्रामता। जनानां समूहो जनता। बंधूनां समूहो बंधुता। पाशानां समूहो यण् पाश्या। वातानां समूहो वात्या। खलानां समूहः खल्या णिनो वेति न वृद्धिः
गवां समूहः गव्या वोऽवृपस्वरे इत्यवृ वृद्धानां समूहः कः णिनो वेति णित्वाद् वृद्धिः वार्द्धकम् केदाराणां समूहो यण् कैदार्यं कवचिनां समूहः इकः कावचिकं ब्राह्म
णानां समूहो यण् ब्राह्मण्यं वडवानां समूहो वाडव्यं। माणवानां समूहो माणव्यं। गजानां समूहः तः गजता। सहायानां समूहः सहायता। पर्श्वा ड्वण् पर्शुशब्दात् ड्वण्
प्रत्ययः स्यात् समूहे डित्वाट् टिलोपः पर्शूनां समूहः पार्श्वम्। सक्तूनां समूहः साक्तुकं कः धेनूनां समूहः धैनुकं रथानां समूहो यण् णिनो वेति न वृद्धिः रथ्या। खलगोर

हास्तिकम्। गार्भिणम्। ग्रामता। जनता। बन्धुता। पाश्या। वात्या। खल्या। गव्या। वार्द्धकम्। कैदार्य्यम्। कावचिकम्। ब्राह्मण्यम्। वाडव्यम्। माण
व्यम्। गजता। सहायता। पर्श्वा ड्वण् पर्शूनां समूहः पार्श्वम्। साक्तुकम्। धैनुकम्। रथ्या। खलगोरथेभ्य इनित्रकट्यचः। खलिनी। गोत्रा। रथकट्या।
हिते चैते प्रत्ययाः सूर्याय हितः। सूरीयः। आत्मनीनः। विश्वजनीनः। मातृभोगीणः। अपूपाय हितोऽपूपीयः। अपूप्यः। आमिक्षीयम्। शंक
व्यम्। गव्यम्। हविष्यम्। खल्यम्। यव्यम्॥

॥थेभ्य इनित्रकट्याः। खलादिभ्यः क्रमात् एते स्युः। खलानां समूहः। इनाइतीप् खलिनी गवां समूहो गोत्रा र
थानां समूहो रथकट्या हिते च अणादयः प्रत्यया हितेऽर्थे च स्युः सूर्याय हित इति सूर्यागस्त्ययोरीये ईपि चेति यलोपः सूरीयः णीयः आत्मने हितः नो वेत्यस्य टिलो
पोन आत्मनीनः ईनः विश्वजनाय हितः विश्वजनीनः कर्मधारयादेवेष्यते विश्वस्य जनः सर्वसाधारणो वेश्याद्रिरिति नत्सु रूपे विश्वो जनोऽस्येति बहुव्रीहौ च विश्व
जनाय हितं विश्वजनीयं णीयस्त्व मातृभोगः शरीरं मातृभोगः मातृभोगाय हितः मातृभोगीणः एत्व भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरे णयद्य
प्यहेरित्युक्त तथापि प्रयोगबाहुल्याभिप्रायं तच्छनि सुशरीरमात्रेप्यस्ति इत्याकरः अपूपेभ्यो हितं अपूप्यं चूर्णं एयः णिनो वेति न वृद्धिः अपूपीयः णीयः
आमिक्षायै हितं एयाराणीयो आमिक्ष्य आमिक्षीयं हविः सान्नाय्यमामिक्षा शृतोष्णे क्षीरे जं दधीति हैमः आमीयते क्षिप्यते दधि यत्र सा आमिक्षा शंकवे हितं शंकव्यं दाः

पू· सि· चं· टी· सु· १०९

णितो वेति न वृद्धिः। वोः वि न्यवृग वेद्धितेगनं हविषे हितं नेह विषयं रवलाय हितं तेरवस्त्यं यवेभ्यो हितं यव्यं॥ ॐ॥ शुनो वस्य उः वा च दीर्घः। श्वन् शब्दस्य वकारस्य कारस्यो
रुत्वं भवति उत्तश्च वा दीर्घः। नो वेति टिलोपो न भवति वा शब्दस्य व्यवस्थार्थत्वात् शून्यं शुन्यं ऊधसो नङ्। ऊधस् शब्दस्य नङादेशो भवति ङित्वादंतस्य स्थाने नङ्
अकार उच्चारणार्थः ऊधसे हितं ऊधन्यं नोवेति न वृद्धिः ऊधन्यः अजाविभ्यां थ्यन्। आभ्यां थ्यन् प्रत्ययः स्यात् हितेऽर्थे अजेभ्यो अजाभ्यो वा हिता अजथ्या थ्यन्प्रत्ययस्तत्रादे
पो गात् पुंवद्भावे रूपं तु त्यं अविभ्यो हिता अविथ्या सर्वं सर्वे हितं सार्वं श्रुण सार्वीयं णीयः वृद्धिः अस्त्यर्थे मतुः प्रथमान्तान्नाम्नो मतुप्रत्ययो भवति अस्यास्तीत्यर्थे
अस्मिन्वास्तीत्यर्थे च उदितोत्तासुं सिवृत्तौ तु मितिनुमृस्त्रियां च ह्रितइ नीप्रक्षी वे शेनुम् भूमनिंदाप्रशंसासु नित्ययोगेऽतिशायने। संबंधेऽस्ति विवक्षायां भवंति मन्दि
नादयः॥१॥ अस्त्यास्य स्त्वविवक्षायां येमत्वादयः प्रत्यया विधीयंते ते भूमादिषु विषयेषु भवंति भूमा बहुत्वम्। यथा गावोऽस्यास्मिन्वा संति स गोमान् निंदा यथा

शुनो वस्य उर्वा च दीर्घः। शुने हितं शून्यं शुन्यम्। ऊधसो नः। ऊधन्यः। अजाविभ्यां थ्यन्। अजथ्या। अविथ्या। अस्त्यर्थे मतुः। नाम्नः। गावोऽस्या
स्मिन्वा सन्ति गोमान्। श्रीर्विद्यतेऽस्य श्रीमान्। विदुष्मान्। गोमती। अइकौ मत्वर्थे। नाम्नोऽइकस्त्वरन्तात्। अर्शसः। वैजयन्तः। दण्डिकः। ध
निकः। मान्तोपधाद्वन्विनौ। मान्तान्मान्तोपधादवर्णान्तादवर्णोपधाच्चवतुरिनस्त्वरन्तात्। किम्वान्। लक्ष्मीवान्। धनवान्॥ ॥ककुदावर्तिनी क

न्या प्रशंसायां यथा "रूपवान्" नित्ययोगे यथा क्षीरिणो वृक्षाः 'अतिशायने यथा' उदरिणी कन्या संबंधः संसर्गः संयोग इति यावत् तत्र यथा दंडी पुरुषः
श्रीरस्ति अस्यास्मिन्वा श्रीमान् विद्वांसोऽस्यास्मिन्वा संति वसोर्वं उरित्युत्वे षत्वं विदुष्मान् देशः ह्रित इनी पुं गोमती। अइकौ च मत्वर्थे। प्रत्ययभ्रमनिरासाय संधि
रत्र न कृतः अइकावितिनिर्देशेन समासे संहिता या अनित्यत्वं ज्ञापितम् तेन पदान्तानां समानानाम् ऋतीत्यनेन स प्रकृत्या ऋषीणामित्यत्र वा संहिता भवति अर्शोऽस्या
स्मिन्वास्ति अर्शसः वैजयंती पताकास्यास्मिन्वास्ति वैजयंतः 'अः' इक्प्रत्ययस्तु अकारान्तादेव दण्डोऽस्यास्मिन्वास्ति दण्डिकः धनमस्याऽस्मिन्वास्ति धनिकः इकः।
मान्तोपधाद्वन्विनौ मश्च अश्च मौ अन्तश्च उपधा च अन्तोपधे मौ अन्तोपधे यस्य तत् मान्तोपधं तस्मान्मान्तोपधात् प्रथमान्ता द्वन्विनौ प्रत्ययौ भवतः। अस्य

र्थे ईन् प्रत्ययस्तु अकारान्तादेव मनोरपवादोयं वि

राम· १०९

यथासंख्यं तु न गुरुकरणात् तथा हि म् अन्तेयस्य तत् मं तं अ उपधायस्य तत् उोपधं मं तं च उोपधं च अनयोः समाहारो मंतोपधं तस्मात् मंतोपधात् इत्यर्थं हि स्पष्टं यथा
संख्यं लभ्यते तत् गुरुकरणात् यथासंख्याऽभावः वतो रुकारो विनोतु मितिनु मर्थः ङ्गिन इनी वर्यश्च किमस्यास्मिन्वास्ति किंवान् लक्ष्मीरस्याऽस्मिन्वास्ति लक्ष्मीवान् धनम ।
स्यास्मिन्वास्ति धनवान्॥ ॥ विद्याऽस्यास्मिन्वास्ति विद्यावान् यशोऽस्यास्मिन्वास्ति यशस्वान् भाः अस्यास्मिन्वास्ति भास्वान् स्त्रत्रमस्याऽस्मिन्वास्ति स्त्री दण्डोऽस्या
स्मिन्वास्ति दण्डी। यवादेर्न यवादेर्गणान्मतुरेव स्यान् वत्विनौ नेत्यवाः अस्यास्मिन्वासंति यवमान् भूमिरस्यास्मिन्वास्ति भूमिवान् तडिदादिभ्यश्च एभ्यो वतुरुक इन्
प्रत्ययाः स्युः अस्त्यर्थे तडिदस्यास्मिन्वास्ति तडित्वान् विद्युदस्यास्मिन् वास्ति विद्युत्वान् मायास्यास्मिन्वास्ति मायी इन् मायिकः इकः व्रीहयोऽस्यास्मिन्वासंति
व्रीही इन् व्रीहिकः इकः लोमपामपिच्छादिभ्यः शनेलचः लोमादिभ्यः शः पामादिभ्यो नः पिच्छादिभ्य इलः स्यादस्त्यर्थे लोमान्यस्यास्मिन्वासंति लोमशः लो

विद्यावान्। यशस्वान्। भास्वान्। स्त्री। दण्डी। यवादेर्न। यवमान्। भूमिमान्। तडिदादिभ्यश्च। तडित्वान्। विद्युत्वान्। मायी। व्रीही मायिकः। लो
मपामपिच्छादिभ्यश्शनेलचः। लोमशः। गिरिशः। पामनः। दद्रुणः। अङ्गना। लक्ष्म्या अच्च। लक्ष्मणः। विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः
॥ विषुणः पिच्छिलः तुन्दिलः फेनिलः॥

मवान् वतुः गिरिरस्याऽस्मिन्वास्ति गिरिशः पामाऽस्यास्मिन्वास्ति पामनः नाम्नो नलोपश्चाविति न लोपः शाकी
पललीदद्रूणां ह्रस्वत्वं च न प्रत्यये एषां ह्रस्वः महच्छाकमिति शाकीई पत इत् शाकिनमहत्पलालं पलालीत इत् पलालिनं दद्रू त्वग्रोगविशेषः दद्रूरस्या ।
स्मिन्वास्ति दद्रुणः णत्वं अंगमस्य अस्यां वास्ति अङ्गना लक्ष्मीरस्यास्मिन्वास्ति लक्ष्म्या अच्च लक्ष्मीशब्दस्याऽकारान्तादेशः स्यान्न प्रत्यये लक्ष्मणः णत्वं विषु साम्येऽव्य
यं विषु अञ्चतीति विष्वक् विष्वगस्यास्मिन्वास्ति विष्वगित्युत्तरपदलोपश्चाकृतसंधेः। विष्वक्शब्दस्योत्तरपदस्य लोपः स्यात् संधावकृते सति न प्रत्यये विषुणः विषु
वद्दारवः कालः समरात्रिंदिवे काले विषुवद्विषुवं च तद्दिवसमरः। पिच्छं चिक्कणमस्याऽस्ति न वास्ति पिच्छिलः। तुन्दमस्याऽस्मिन्वा तुन्दिलः फेनमस्याऽस्मिन्वा फेनिलः

सिध्मादेर्लः सिध्मादेर्गणात्लप्रत्ययः स्यादस्त्यर्थे पक्षे मतुः 'सिध्मवान्' दन्तबललाटवत्सअंसफेनधमनिक्षुद्रजंतुउपतापगडुमणिविजयनिष्पावपांशुहनुपा
र्ष्णिचूडासिध्मादयः 'पा र्ष्णिधमन्योर्दीर्घश्च' पार्ष्णीलः धमनीलः 'क्षुद्रजंतुर्यथा यूकालः' 'मक्षिकालः' 'उपतापो रोगः' 'विपादिकाऽस्यास्ति विपादिकालः' पादस्फोटो
विपादिकेत्यमरः सिध्ममस्यास्मिन्वास्ति सिध्मलः 'चूडाऽस्याऽस्मिन्वास्ति चूडालः' वानदंतबललाटानामूश्च वातुलः वातूलः इत्यादि कुमुदनडवेतसेभ्यो ड्मतुः
एभ्यो ड्मतुप्रत्ययः स्यादस्त्यर्थे डित्वाट्टिलोपः। कुमुदान्यस्यास्मिन्वा संति कुमुद्वान्' नडाश्च स्याऽस्मिन्वा संति नड्वान्· वेतसाअस्याऽस्मिन्वा संति वेतस्वान्· म
हिषान्ड्मतुः महिषशब्दान्ड्मतुः स्यादस्त्यर्थे महिषाअस्याऽस्मिन्वा संति महिष्मान्· टिलोपः। नडशादाड्वलः आभ्यां ड्वलप्रत्ययः स्यादस्त्यर्थे नडाअ

सिध्मादेर्लः॥ सिध्मलः। चूडालः। कुमुदनडवेतसेभ्यो ड्मतुः। कुमुद्वान्। नड्वान्। वेतस्वान्। महिषान्मतुः। महिष्मान्देशः' नडशादाड्वलः न
ड्वलः। शाड्वलः' शिखाया वलः' शिखावलः। नडादीनामीयेकुक्। नडकीयम्। कुन्चाया ह्रस्वत्वञ्च· । कुञ्चकीयम्। शृङ्ग वृन्दाभ्यामारकः शृ
ङ्गारकः' वृन्दारकः। फलबर्हाभ्यामिनः। फलिनः। बर्हिणः। मलादिनः। मलिनः' ईमसश्च' मलीमसः। हृदयादालुः। शीतोष्णतृप्रेभ्यस्तदस
हने। शीतन्नसहते शीतालुः। उष्णालुः ॥ स्याऽस्मिन्वा सन्ति नड्वलः' डित्वाट्टिलोपः' शादोऽस्याऽस्मिन्वास्ति शाड्वलः शादो जंबालघासयोरित्यमरः।
शिखाया वलः। शिखाशब्दाद्वलप्रत्ययः स्यादस्त्यर्थे शिखाऽस्याऽस्मिन्वास्ति 'शिखावलः। नडादीनामीयेकुक्। नडादीनां कुगागमो भवति ईयप्रत्ययेन नडप्लक्ष
बिल्ववेत्रवेतसकुंचा तक्षन् नडादयः 'नडाअस्याऽस्मिन्वा संति नडकीयम्। कुंचाह्रस्वत्वंच। कुंचाशब्दस्य ह्रस्वो भवति ईये 'कुंचाऽस्याऽस्मिन्वास्ति कुंचकीयं ए
वं नड्वकीयं निपातनान्नलोपः बिल्वकीयं वेत्रकीयम्। शृंगवृंदाभ्यामारकः। आभ्यामारकप्रत्ययः स्यादस्त्यर्थे। शृंगमस्याऽस्मिन्वास्ति शृंगारकः। शृंगं प्रधानसान्वो
श्चेत्यमरः। वृंदमस्याऽस्मिन्वास्ति वृंदारकः वृन्दारकौ रूपिमुख्यावित्यमरः। फलबर्हाभ्यामिनः। आभ्यामिनप्रत्ययः स्यादस्त्यर्थे फलमस्याऽस्मिन्वास्ति फलिनः।
बर्हमस्याऽस्मिन्वास्ति बर्हिणः णत्वं 'हृदयालुः' हृदयशब्दादालुः प्रत्ययः स्यादस्त्यर्थे हृदयमस्याऽस्मिन्वास्ति हृदयालुः' पक्षे हृदयी हृदयिकः' हृदयवान्· शीतोष्ण

प्रकृत्यर्थोऽस्य हनेऽर्थे शीतं न सहते सः शीतालुः उष्णं न सहते उष्णालुः ॥ ॥ तृप्रं दुःखं न सहते तृप्रालुः तृप्रः पुरोडाशः। तृप्रं दुःखमित्यर्थः। हिमादेलुः हिमशब्दा देलुप्रत्ययः स्यात् तत् न सहनेऽर्थे वलादूलः। वलशब्दादूलप्रत्ययः स्यात् तत् न सहनेऽर्थे वातात्समूहे च वातशब्दादूलप्रत्ययः स्यात् तत् न सहनेऽर्थे समूहेऽर्थे च वलूलवातू लशब्दाव स्यार्थे च व्युत्पत्त्या दिनौ। तः पर्वमरुद्भ्यां॥ आभ्यां तप्रत्ययोऽस्त्यर्थे पर्वाऽस्याऽस्मिन्वास्तीति नाम्नो इतिन लोपः पर्वतः। मरुदस्यास्मिन्वास्ति मरुत्तः। ऊर्णाहंशुभं भ्यो युः प्रत्ययः स्यादस्त्यर्थे ऊर्णाऽस्यास्मिन्वाऽस्ति ऊर्णायुः अत्र निपातनाद्यस्येत्या लोपो न। अहमिति निर्मान्तमव्ययमहंकारे शुभमिति च शुभे अहंयुरहंका रवान् शुभंयुः शुभान्वितः। स्वादामिन्नैश्वर्ये। ऐश्वर्ये स्वशब्दादामिन्प्रत्ययः स्यादस्त्यर्थे। ईशिता हि ईश्वरस्तस्य भाव ऐश्वर्यं ऐश्वर्ये किं स्ववान् स्वं द्रव्यमस्यास्मि। न्वाऽस्तीति वातातीसारपिशाचानामिनिः कुक् च एभ्य इनिः प्रत्ययः स्यादस्त्यर्थे ईकार उच्चारणार्थः। एषां कुगागमश्च इनिप्रत्यये वातोऽस्यास्मिन्वास्ति वातकी वात

तृप्रं दुःखं न सहते तृप्रालुः। हिमादेलुः हिमं न सहते हिमेलुः। वलादूलः। वलं न सहते वलूलः। वातात्समूहे च। वातं न सहते वातस्य समूहो वातूलः। तः पर्वमरुद्भ्याम्। पर्वतः। मरुत्तः। ऊर्णाहंशुभंभ्यो युः। ऊर्णायुः। अहंयुः। शुभंयुः। स्वादामिन्नैश्वर्ये। स्वमैश्वर्यमस्यास्मिन्वास्ति स्वामी। वातातीसारपिशाचानामिनः कुक् च वातकी। अतीसारकी। पिशाचकी। ज्योत्स्नादिभ्योऽण्। ज्यौत्स्नः। तामिस्रः। तापसः। सैकतः। शा

कीवान रोगी स्यादित्यमरः। अतीसारोऽस्यास्मिन्वास्ति अतीसारकी। रोगे चायमिनिरिष्यते नेह वातवती गुहा। पिशाचोऽस्याऽस्मिन्वास्ति पिशाचकी ज्योत्स्नादिभ्योऽण् एभ्योऽण् स्यादस्त्यर्थे। किं च ज्योत्स्नातमिस्राशृङ्गिणोर्ज्जस्विन्नूर्ज्जस्वलगोमिन् मलिनमलीमसा अस्त्यर्थे निपात्यन्ते। ज्योतिरस्यामस्यां वास्ति ज्योत्स्ना चन्द्रप्रभा ज्योतिःशब्दस्य निपातनादुपधालोपो नप्रत्ययश्च। तमोऽस्याऽस्मिन्वा तमिस्रं तमसशब्दस्योपधाया इत्त्वं रप्रत्ययश्च। शृङ्गमस्याऽस्मिन्वास्ति शृङ्गिणः अत्र इनप्रत्ययो निपातनात्। ऊर्ज्जोऽस्याऽस्मिन्वास्ति ऊर्जस्वी ऊर्ज्जस्वलः विन् वलप्रत्ययौ निपातनात्। गौरस्याऽस्मिन्वास्ति गोमी मिन्प्रत्ययो निपातनात्। मलोऽस्याऽस्मिन्वास्ति मलिनः मलीमसः। मलशब्दादिनेमसप्रत्ययौ निपातनादिति। ज्योत्स्नाऽस्यास्मिन्वास्तीत्यणि ज्यौत्स्नः शुक्लपक्षः। तमिस्रमस्याऽस्मिन्वास्तीति तामिस्रः कृष्ण

ज्यौत्स्नी चंद्रिका यान्वितेत्यमरः कौतु नमिस्तेत्येनसंनेननवणंनपितिनविरोधः॥तपोऽस्याऽस्मिन्वास्तितापसः'विन्प्रत्ययोपितपस्वी'सिकताऽस्याऽस्मिन्वास्तिसैक
तः इलः प्रत्ययेसिकतिलःवतौतुसिकतावान्'शर्कराऽस्याऽस्मिन्वास्तिशार्करोऽण्।शर्करिलः इलःशर्करावान्'वतुपक्षेप्रत्ययलुकृत्त्वभवति·सिकताशर्करा'स्त्री
शार्करशर्करिलःशार्करःशर्करावति देशस्वादिमावेवमुन्नेयाः सिकतावति· इत्यमरः॥ ॥ऊषशुषिमुष्कमधुखमुखकुंजनगपांशुपांडुभ्योरः।एभ्योरप्रत्य
यःस्या दस्यर्थेऊषोऽस्या स्मिन्वास्तिऊषरः।स्याडूषःक्षारमृत्तिका।ऊषवानूषरइत्यमरः।शुषिरस्यास्मिन्वास्तिशुषिरः।शुषिच्छिद्रंवंशादिकंतुशुषिरमित्यमरः।मुष्को
ऽस्यास्मिन्वास्तिमुष्करः।मुष्कोंडः'मधुमाधुर्यमस्यास्मिन्वास्तिमधुरः'खमस्यास्मिन्वास्तिखरः'महन्कंठविवरंखगद्दभेरूढोयं'मुखमस्यास्मिन्वास्तिमुखरःवाचालः

ऊषशुषिमुष्कमधुखमुखकुञ्जनगपांशुपाण्डुभ्योरः।ऊषरः।शुषिरं।मुष्करः।मधुरः।खरः।मुखरः।कुञ्जरः।नगरः।पांशुरः। पाण्डुरः'कच्छ्वा
ह्रस्वत्वञ्च।कच्छुरः।द्युद्रुभ्याम्मः।द्युमः।द्रुमः।केशादिभ्योवः।केशवः।मणिवः।हिरण्यवः।अर्णसोलोपश्च।अर्णवः।रजःकृष्यासुतिपरि
षद्भ्योवलः'रजस्वला।कृष्यादीनाम्वलेदीर्घः।कृषीवलः॥ ॥कुंजोहस्तिहनुरस्यास्मिन्वास्तिकुंजरः नगाहस्ताःपर्वताश्चनेअस्यास्मिन्वासंतिनगरं।
जातिशब्दोयंनेनस्त्रियांजातिलक्षणाईप्नगरी'पांशूरजोऽस्यास्मिन्वास्ति'पांशुरः'पांडुरस्याऽस्मिन्वास्तिपांडुरः'हरिणःपांडुरः पांडुरित्यमरः।कच्छ्वाह्रस्वत्वंचकच्छु
शब्दाद्रःस्यादस्यर्थेकच्छूइत्यस्यह्रस्वश्चकच्छुरस्याऽस्मिन्वास्तिकच्छुरः'कच्छूरोगविशेषः द्युद्रुभ्यांमः'आभ्यांमप्रत्ययःस्यादस्त्यर्थे'द्यौरस्याऽस्मिन्वास्तिद्यु।
मः'दिवउरसेइत्युत्वंद्रुः'शाखावृक्षाश्चद्रुरस्याऽस्मिन्वास्ति द्रुमः'पलाशीद्रुद्रुमागमाइत्यमरः'केशादिभ्योवःस्यादस्त्यर्थेकेशाअस्याऽस्मिन्वासंतिकेशवः'केशीइत्नुके
शिकः'इकः'केशवान्वतुः मणिरस्यास्मिन्वास्तिमणिवः'नागविशेषः'हिरण्यमस्याऽस्मिन्वास्तिहिरण्यवोनिधिविशेषः अर्णसोलोपश्च।अर्णस्शब्दाद्वःस्याद
स्त्यर्थेसस्यलोपश्चअर्णोजलंनद्यानर्णवः अर्णस्वान्वतुः'रजःकृष्यासुतिपरिषद्भ्योवलः।एभ्योवलप्रत्ययःस्यादस्त्यर्थे'रजोऽस्याअस्यांवास्तिरजस्वला'
रजःस्त्रीकुसुमेऽपिचेत्यमरः'कृष्यादीनांवलेदीर्घः।वलप्रत्ययेसंज्ञायामेषांदीर्घःस्यात्।कृषिरस्याऽस्मिन्वास्तिकृषीवलः ॥ ७ ॥ ६ ॥ ६ ॥

आसुतिरभिषवः। मद्यसंधानमासुतिरिति हैमः। षुञ् अभिषवे क्तिः आसुतिरस्याऽस्मिन्वास्ति आसुतीवलः शौंडिकः परितः सीदन्तीति परिषत् क्विप् षत्वं पर्षदिति पा
ठांतरम् परिषदस्याऽस्मिन्वास्ति परिषद्वलः। पर्षद्वलश्च पर्षद्वलान्महाब्रह्मैराट् नैकटिकाश्रमानिति भट्टिः अन्येभ्योऽपि वलप्रत्ययः स्यादस्त्यर्थे भ्राताऽस्याऽस्मि
न्वास्ति भ्रातृवलः पुत्रोऽस्याऽस्मिन्वास्ति पुत्रवलः। संज्ञायामभावान्नेह दीर्घः दंता अस्याऽस्मिन्वा सन्ति दंतावलो हस्ती कृष्यादीनामिति दीर्घः। तुंडिबलिवटेर्भः
एभ्यो भप्रत्ययः स्यादस्त्यर्थे वृद्धा नाभिस्तुंडिः तुंडिरस्याऽस्मिन्वास्ति तुंडिभः वलिरस्याऽस्मिन्वास्ति वलिभः वटिरस्याऽस्मिन्वास्ति वटिभः। वल्मीकं गृह्णमित्यर्थः
एभ्यो भप्रत्ययः...
पामादित्वाद् इलिनोऽपि। एतत्कियत्तद्भ्यः परिमाणे वतुः एभ्यो वतुप्रत्ययः स्यात् परिमाणेऽर्थे परिमाणमिह परिच्छेदकमात्रं यत्तदेतद्भ्यां मावतौ वतुप्रत्यये परे एषा
माकारांतादेशः स्यात् यत्परिमाणमस्य यावान् तत्परिमाणमस्य तावान् एतत्परिमाणमस्य एतावान् किम् शब्दस्य किरादेशः स्यात् वतुप्रत्ययवस्य यकारश्च किं प

आसुतीवलः। परिषद्वलः। अन्येभ्योऽपि। भ्रातृवलः। पुत्रवलः। दन्तावलः। बंधुवलः। वलिवटिभ्याम्भः। वलिभः। वटिभः। एतत्किमिदं यत्तद्
भ्यः परिमाणे वतुः। यत्तदेतद्भ्यामावतौ। यावान्। तावान्। एतावान् किमः किर्घ्व नोर्घस्य यः। कियान्। इदमइश्च वतोर्वस्य यः। इयान् श्रद्धादेर्लुः
। श्रद्धालुः कृपालुः। दयालुः। औणत्ये दन्तादुरः दन्तुरः। अस्मायामेधास्रग्भ्यो विनिः। तपस्वी। ओजस्वी वर्चस्वी। वचस्वी तेजस्वी मायावी। मेधा
वी स्रग्वी

रिमाणमस्य कियान्। इदमइश्च वतोर्वस्य यः इदम् शब्दाद्वतुः स्यात् परिमाणेऽर्थे इदम् स्थाने इशादेशश्च शित्वात्सर्वादेशः वतुप्रत्ययवस्य यकारश्च
इदं परिमाणमस्य स इयान्। श्रद्धादेर्लुः। लुप्रत्ययः स्यादस्त्यर्थे श्रद्धाऽस्याऽस्मिन्वास्ति श्रद्धालुः कृपाऽस्याऽस्मिन्वास्ति कृपालुः। दयाऽस्याऽस्मिन्वास्ति दयालुः।
स्पृहि गृहि पति दयि निद्रा तंद्रा श्रद्धा शीङ् भ्य इत्मालुप्रत्ययेनापीष्टसिद्धेरिदं सूत्रं चिंत्यं औणत्ये दंतादुरः उन्नते वर्तमानाद्दन्तशब्दादुरप्रत्ययः स्यादस्त्यर्थे उ
न्नता दंताः संत्यस्य दन्तुरः औणत्ये किं दन्तवान् अस्मायामेधास्रग्भ्यो विनू एभ्यो विन् स्यादस्त्यर्थे पक्षे वतुरपि तपोऽस्याऽस्मिन्वास्ति तपस्वी ओजोऽस्याऽस्मिन्वा
स्ति ओजस्वी वर्चोऽस्याऽस्मिन्वास्ति वर्चस्वी। तेजोऽस्याऽस्मिन्वास्ति तेजस्वी वचोऽस्याऽस्मिन्वास्ति वचस्वी मनोऽस्याऽस्मिन्वास्ति मनस्वी मायाऽस्याऽस्मिन् ॥ ६ ॥

टी॰ २॰ अत्रस्यशङ्कासमाधानोपूर्वर्णितावेवटिप्पण्यां हलन्तेइतिनात्रटिप्पणीलेखनावसरइतिबहुग्रन्थालोकनपुरस्सरंसुबोधिनीकारोपिनयेवानुवदतिगकारेति
मायीमायिकः। इतिकौमेधाऽस्याऽस्मिन्वास्तिमेधावीस्रगऽस्यास्मिन्वास्तीतिचोःकुरित्यनेनसिद्धेपरत्वात्प्राप्तंछशषेतिषत्वंनिराकृत्यदिशामितिकुत्वंस्रग्वी॥
॥आमयस्यदीर्घश्च।आमयादिप्रिविनुस्यादस्त्यर्थेविनुप्रत्ययेऽस्यदीर्घश्च। आमयोऽस्याऽस्मिन्वास्तिआमयावीवाचोग्मिनुवाचशब्दात्ग्मिनुप्रत्ययःस्या
दस्त्यर्थेवागस्याऽस्मिन्वास्तिचसकुत्वेजश्त्वेजवाइतिगत्वेवाग्मीगकारद्वयमस्तिआलाटौकुत्सितभाषिणिवाचशब्दादेतौस्तःकुत्सितबहुभाषकेर्थेकुत्सि
तबहुभाषनेवाचालः वाचाटः।यस्तुसम्यग्बहुभाषतेसवाग्मीत्येव।ईषदसमाप्तौकल्पदेश्यदेशीयाः।प्रथमानान्नाम्नःआख्यातानाचैतेस्युरीषदूनेर्थे।ईषदस
माप्तौयेप्रत्ययास्तेस्वाभिधे यवदेवलिंगवचनेस्तस्तेनगुडकल्पाद्राक्षाशर्कराकल्पोगुडइति ईषदूनःसर्ववित्सर्वज्ञकल्पः।ईषदूनःपटुःपटुदेश्यः।ईषदूनो

आमयस्यदीर्घश्च।आमयावी।वाचोग्मिनिः।वाग्मी।आलाटौकुत्सितभाषिणि।वाचालः।वाचाटः।ईषदसमाप्तौकल्पदेश्यदेशीयाः।ईष
दपरिसमाप्तःसर्ववित्सर्ववित्कल्पः।पटुदेश्यः।विद्वद्देशीयः।पटुदेशीयः॥बहुर्वाउक्तार्थेसचप्रागेवईषदूनः।पटुः।बहुपटुः।प्रकारेजातीयः
पटुप्रकारः।पटुजातीयः।कुटीशमीशुण्डाभ्योरोह्रस्वत्वे।ह्रस्वाकुटी।कुटीरः।शमीरः।शुण्डारः।कुत्वाडुपः।ह्रस्वाकुतूः।कुतुपः।कासूगोणीभ्यांष्ट
रः।ह्रस्वाकासूः।कासूतरी।गोणीतरी ॥विद्वान् वसांस्सेइतिदत्वंविद्वद्देशीयः ईषदूनंपचति पचतिकल्पंक्रियाप्रधानमाख्यानमितिक्रियायाश्चौत्सर्गिक
मेकवचनंक्लीबत्वंच।बहुर्वाउक्तेर्थेसचप्रागेवईषदसमाप्तिविशिष्टेर्थेप्रथमान्तान्नाम्नोबहुप्रत्ययःस्यात् सचप्रकृतेःप्रागेवनतुपरतः लिंगसंख्येऽपिप्रकृतेरेवनतुत
द्विपर्ययः तेनबहुगुडोद्राक्षालघुर्बहुतृणंनरइत्यादौनविशेष्यनिघ्नताप्रकारेजातीयः प्रकारवतिजातीयःप्रत्ययःस्यात्सामान्यस्यभेदकःप्रकारः।कुटीशमीशु
डाभ्योरोह्रस्वत्वे।एभ्योरप्रत्ययोभवतिह्रस्वेऽर्थेह्रस्वाकुटीतिस्वार्थिकाः।प्रकृतिलिंगमतिवर्तन्तेइतिपुल्लिंगतात्रकुटीरः ह्रस्वाशमीशमीरः।ह्रस्वाशुण्डाशुण्डारः। राम
कुत्वाडुपः।कुतूशब्दात्डुपप्रत्ययःस्यात्ह्रस्वेर्थेकुतूःकृत्तेःचर्मण्यःस्नेहपात्रं ह्रस्वासाकुतुपः पुमानित्यमरः।कासूगोणीभ्यांष्टरः।आभ्यांष्टरप्रत्ययःस्यात् ह्र ११२
स्वे षित्वात् ङीप् इतीप् ह्रस्वाकासूः कासूतरी।कासूःआयुधविशेषः।ह्रस्वागोणी गोणीतरी

वत्सोक्षाश्वर्षभेभ्यस्तनुत्वे। एभ्यः ष्टरः स्यात्। ततो भावस्तनुत्वं न्यूनता सा च प्रवृत्तिनिमित्तस्यैव प्रत्यासत्तेः। क्वचित्तु तत्सहचरितधर्मान्तराणामपि न्यूनता तत्र वत्सः प्रथमवयाः प्रथमवयसो न्यूनत्वं नाम वयोन्तरप्राप्तिः। उक्षा तरुणवयाः तारुण्यस्य तनुत्वं तृतीयवयःप्राप्तिः। अश्वायामश्वादुत्पन्नोऽश्वः अश्वत्वं च जातिः तत्सहचरितस्याऽश्वायामश्वादुत्पन्नत्वधर्मस्य न्यूनत्वमन्यपितृकता तया च गर्दभेनाऽश्वायामुत्पादितोऽश्वतरः तरतमेति पुंवद्भावः अश्वतरो भारस्य वोढा ऋषभस्य तनुत्वं भारोद्वहने मंदशक्तिता तद्वानृषभतरः प्रवृत्तिनिमित्ततनुत्व एवायं देवतानां तादर्थ्ये यः तदर्थ एव तादर्थ्यं स्वार्थे ष्यः अग्निश्चासौ देवता च अग्निदेवता तस्यै पादार्घाभ्यां च त्राभ्यां यः स्यात्तादर्थ्ये। पाद्यं पादाय वारिणीत्यमरः। मूल्ये पूजाविधौ चार्घ इत्यमरः। अर्घार्थमुदकमर्घ्यं नवस्य नू आदेशस्त्नतनईनाः प्रत्ययाः न

वत्सोक्षाश्वर्षभेभ्यस्तनुत्वे। तनुर्वत्सः। वत्सतरः। उक्षतरः। अश्वतरी। ऋषभतरः। देवतान्तात्तादर्थ्ये यः। अग्निदेवतायै इदमग्निदेवत्यम्। पादार्घाभ्यां च। पादार्थमुदकम्पाद्यम्। अर्घ्यम्। नवस्य नू आदेशस्त्नतनईनाः प्रत्ययाः स्वार्थे नूत्नम्। नूतनम्। नवीनम्। पुराणे प्रान्नश्च। प्रणम्। प्रत्नम्। प्रतनम्। प्रीणम्। अतिथेर्ञ्यः। अतिथय इदमातिथ्यम्। प्रशंसायां रूपः। प्रशस्तो वैयाकरणो वैयाकरणरूपः। कुत्सायाम्पाशः। कुत्सितो भिषक् भिषक्पाशः। भूतपूर्वे चरट्। पूर्वं दृष्टो दृष्टचरः। दृष्टचरी। आढ्यचरी। प्राचुर्ये विकारप्राधान्यादिषु मयट्। अन्नप्रचुरमन्नमन्नमयो यज्ञः। मृन्मयो घटः। स्त्रीमयो जाल्मः। अमृतं स्वरूपमस्या अमृतमयश्चन्द्रः। आम्रस्य विकारोऽवयवो वा आम्रमयम्। शरमयम्। गोः पुरीषे। गोमयम्॥ ॥ वशब्दात्स्वार्थे एते स्युर्नवस्थाने नू श्च वोऽवयस्वरे इत्यवृ। नवीनं पुराणे प्रान्नश्च प्रास्तु पुराणेऽर्थे नप्रत्ययः स्यात् चात् उक्ताः त्नतनप्ईनाः। अतिथेर्ञ्यः। अतिथिशब्दात्तादर्थ्ये ञ्यः स्यात्। प्रशंसायां रूपः। प्रथमान्तान्नाम्नः आख्यातान्ताच्च रूपप्रत्ययः स्यात् प्रशंसायामर्थे प्रकृत्यर्थे सा परिपूर्णता इह प्रशंसा न तु स्तुतिः तेनेहापि रूपप्रत्ययः। चोररूपोऽयं यद् दृष्टोऽप्यं जनं हरति। गुप्तवस्तुनोऽपहरणेन चौर्यपरिपूर्णत्वं प्रशस्तं पचति पचतिरूपम्। कुत्सायां पाशः। प्रथमान्तान्नाम्नः पाशप्रत्ययः स्यात् कुत्सायामर्थे भूतपूर्वे चरट्। पूर्वं भूतो भूतपूर्वः स त्ववर्तमानात्प्रथमान्ताच्चरट् स्यात्। टित्वादीप्। भूतपूर्वा आढ्या आढ्यचरी। तरतमचरडिति पुंवत्। षष्ठ्यन्ताद्भूतपूर्वेऽर्थे र

ण्यप्रत्ययोवापक्षेचरड् कृत्स्नस्यभूतपूर्वोगौः कृत्स्नरूप्यः कृत्स्नचरः। प्राचुर्यविकारप्राधान्यादिषुमयट्'नाम्न एष्वर्थेषुमयट् स्यात् प्राचुर्ये ऽन्नमयोयज्ञः' विशेष्यनि
घ्ननात्र'विकारेमृदोविकारोमृण्मयः मयट्प्रत्ययः न्नमेन्नवस्यापीतिनः प्राधान्ये स्त्रीप्रधानमस्यस्त्रीमयः। आदिशब्दात् अन्येष्वप्यर्थेषुमयट् यथा। अमृतमयोऽत्र
स्वरूपेमयट्'आम्रमयमत्रविकारावयवयोर्मयट् शराणांविकारोवयवोवाशरमयं। गोः पुरीषे। गोशब्दान्मयट् स्यात्पुरीषेऽर्थेगोः पुरीषंगोमयं पुरीषेकिंगव्यंपयः
सोण्यः॥ ॥नसंधियवोर्युट्चसंधानंसंधिः नड्कीनिकिः प्रत्ययः संधौजातौसंधिजौ यश्चवश्चय्वौसंधिजौचतौय्वौचसंधिय्वौ शाकपार्थिवादित्वान्मध्यप
दलोपः' माधवस्तुसंधेय्वौविनिषष्ठीतत्पुरुषमाह। इश्च उश्चानयोः समाहारोयुयुसहितः इयुद्द हृद्वान्तेश्रूयमाणत्वात् टकारः प्रत्येकंसंबध्यते। इट्उट्इत्यर्थः

नसन्धिय्वोर्युट्च'सन्धिजयोर्यकारवकारयोस्सम्बन्धिनस्वरस्यनवृद्धिः किन्तुतयोर्युडागमोयस्येट्वस्योट्पश्चाद्वृद्धिः। व्याकरणमधीतेवे
दवावैयाकरणाः। स्वश्वंवेदसौवश्वः। व्यासस्यापत्यंवैयासकिः। द्वारादीनाञ्च। द्वारादीनांसम्बन्धिनस्वरस्यनवृद्धिः किन्तुतयोर्युडागमः। द्वारेनि
युक्तोदौवारिकः। व्यल्कसस्येदंवैयल्कसम्। सौवरम्। शौवम्। सौवग्रामिकः। नैयग्रोधम्। सौवादुमृदुवम्। शौवस्तिकम्। इत्तोजातार्थे। लज्जाजाता
स्यलज्जितः। फलितः। तारकितः

वैयाकरणाः। अण् इट् वृद्धौ सुष्ठु अश्वः स्वश्वः स्वश्वं वेत्तीतिसौवश्वोऽण् उट् वृद्धौ वैयासकिः अपत्येइञ्। सुधातृव्यासेत्यकङ् इ
ट् वृद्धौ। द्वारादीनांच' द्वारादीनामसंधिजयोर्यकारवकारयोरपियुट् स्यात् पश्चाद्वृद्धेश्चयस्यइट्वस्यउट् इत्यर्थः दौवारिकः' नियुक्तेऽर्थेइकः उट् वृद्धौ वैयल्क
सेइदमर्थेऽण् इट् वृद्धौ स्वरस्येदंसौवरं उट्वृद्धौ स्वग्रामेभवः सौवग्रामिकः इकः उट्वृद्धौ न्यग्रोधस्येदंनैयग्रोध अण् इट् वृद्धौ स्वादुचतन्मृदुचस्वादुमृदुस्वादुमृदुन इदं
सौवादुमृदवअण्'वोऽवय स्वरेइत्यव् उट् वृद्धौ श्वोभवशौवस्तिकंतिकण्'उट् वृद्धौ श्वापदस्येदंनिपातनात्पूर्वपदस्यदीर्घः॥ अण्वाउट्वृद्धौ श्वापदंशौवापदं
इत्तोजातार्थे। प्रथमोनान्ताम्नोऽस्यजातमित्यर्थेइतः प्रत्ययः स्यात् यस्येत्यालोपः' लज्जितः। फलानिजातान्यस्यफलितः' त्रपाजाताऽस्यत्रपितः' तारकाजातान्यस्य एम
११३

तरतमेयस्विष्ठाः प्रकर्षे। तरश्च तमश्च ईयसुश्च इष्ठश्च ते तरतमेयस्विष्ठाः। प्रकर्षे इति प्रकृत्यर्थविशेषणम्। प्रकर्षणं प्रकर्षश्च नाधिक्यं किंत्वभिभवो मतः। यद्यपि
कृषिः केवलो विलेखनेन यापि प्रपूर्वोऽभिभवे वर्त्तते यद्यपि द्रव्यस्य स्वतः प्रकर्षो न तथापि गुणप्रकर्षात् प्रकर्षो भवति। उक्तं च द्रव्यस्याव्यपदेशस्य य उपादी
यते गुणः। भेदको व्यपदेशाय तत्प्रकर्षोऽभिधीयते। धर्मयोगं विनाव्यपदेष्टुमशक्यस्य द्रव्यस्य व्यपदेशाय यो भेदको गुण उपादीयते प्रत्ययेन तस्य प्रकर्षोऽभिधी
यते गुणक्रियाजातिसंज्ञाभेदेन चतुष्टयी शब्दानां प्रवृत्तिः। तत्र गुणक्रिययोः प्रवृत्तिनिमित्तयोस्तत्प्रकर्षे प्रत्ययः। जातिशब्देभ्यस्तु जातेः सर्वत्रैकरूपत्वेन प्रकर्षाभा
वात्तत्सहचरितो ये वा हरोहादयो धर्मास्तत्प्रकर्षे प्रत्ययः। संज्ञाशब्देषु प्रकर्षो नास्ति शब्दस्वरूपस्यैव प्रवृत्तिनिमित्तत्वात्। तस्य च सर्वत्र तुल्यत्वात्। गुणशब्दो

तरतमेयस्विष्ठाः प्रकर्षे। अतिशयेन शुक्लः। शुक्लतरः। शुक्लतमः। ईयस्विष्ठौ डितौ। अतिशयेन लघुः लघीयान्। लघिष्ठः। गुर्वादेरिष्ठेमेयस्सु
गरादेशः टिलोपश्च। गुरोर्भावो गरिमा। अतिशयेन गुरुः गरिष्ठः। गरीयान्। प्रियस्य भावः प्रेमा। अतिशयेन प्रियः प्रेष्ठः। प्रेयान्। अतिशयेन स्थूलः।
स्थविष्ठः। स्थवीयान्। अतिशयेन प्रशस्यः श्रेष्ठः। श्रेयान्। दीर्घः। द्राघिष्ठः। द्राघीयान्। स्थिरः। स्थेष्ठः। स्थेयान्। स्फिरः। स्फेष्ठः। स्फेयान्। उ
रुः। वरिष्ठः। वरीयान्। बहुलः। बंहिष्ठः। बंहीयान्। वृद्धः। वर्षिष्ठः। वर्षीयान्।

॥ यथा यस्य सामान्यतः श्वेतो गुणः स शुक्लः। यस्य तद्रूपेण स्याधिकः स
शुक्लतरः यस्य ताभ्यामप्यधिकः स शुक्लतमः। यः किंचिज्जानाति स पटुः। ततोऽधिकं जानाति स पटुतरः। ततोप्यधिकं स पटुतमः। क्रियाशब्दो यथा यो विलंबेन पच
ति स पाचकः। यस्तु ततः किंचिच्छीघ्रं पचति स पाचकतरः। यस्त्वतिशीघ्रं पचति स पाचकतमः। जातिशब्दो यथा गौरयं हलं वहति गोतरोऽयं हलं शकटं च
वहति गोतमोऽयं तौ गोणीं च वहति इष्ठेयसु प्रत्ययौ गुणवचनादेव संख्यापरिमाणप्रमाणोन्मानवाचिभ्यो न तराद्यः। संख्या एकादिः। परिमाणं कुडवद्रो
णादि प्रमाणं हस्तवितस्त्यादि उन्मानं तुलादिः। उक्तं च ऊर्द्ध्वमाने किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः १ ईयस्वि
ष्ठौ डितौ एतौ डित्संज्ञकौ स्तः। अतिशयेन लघुः ईयसु टिलोपे उदित्वान्नुम् सम्महत इति दीर्घः सिलोप संयोगांतलोपौ। लघीयान्। लघिष्ठः। गुर्वादेरिष्ठेमे

लोपश्च॥गुरु १ प्रिय २ स्थूल ३ प्रशस्य ४ दीर्घ ५ स्थिर ६ स्फिर ७ उरु ८ बहुल ९ वृद्ध १०॥ःः॥तृप्र ११ वृंदारक १२ दूर १३ युवन् १४ अल्प १५ ह्रस्व १६ क्षिप्र १७ क्षुद्र
१८ अंतिक १९ बाढ २० गुर्वादयः गरु रांतः १ प्र अदंतः २ स्थो ओदन्तः ३ श्र अदंतः ४ द्राघ अदंतः ५ स्थ अदंतः ६ स्फ अदंतः ७ वर् रान्तः ८ बंह अदंतः ९ वर्ष् षांतः
१० त्रप् पांतः ११ वृंद अदन्तः १२ दो ओदन्तः १३ या ओदंतः १४ अल्प पांतः १५ ह्रस् सांतः १६ क्षेप् पांतः १७ क्षोद् दांतः १८ नेद् अदंतः १९ साध अदंतः २० एते
गरादयः एषामेकस्वराणां टिलोपो यस्य लोप इत्यलोपश्च न हि स्वराणां तु यस्य लोपो इत्यलोपो भवत्येवं गरिमादेश न गरिष्ठः इष्ठः गरीयान् ईयसुः स्त्रियां नुग्विनदूती
प्रगरीयसी प्रेमा ईमन् प्रेष्ठः इष्ठः प्रेयान् ईयसुः स्थविष्ठः इष्ठः स्थवीयान् ईयसुः श्रेष्ठः इष्ठः श्रेयान् ईयसुः द्राघिष्ठः यस्य लोप इत्यलोपः। इष्ठः द्राघीयान् ईयसुः
स्थेष्ठः इष्ठः स्थेयान् ईयसुः अतिशयेन स्फिरः भूयर्ग्द भ्रपुरु स्फिरमिति हि मः स्फेष्ठः इष्ठः स्फेयान् ईयसुः अतिशयेन उरुः वरिष्ठः इष्ठः वरीयान् ईयसुः अ

तृप्रः। त्रपिष्ठः। त्रपीयान्। वृन्दारकः। वृन्दिष्ठः। वृन्दीयान्। दूरः। दविष्ठः। दवीयान्। युवा। यविष्ठः। यवीयान्। युवाल्पयोः कनन्वा कनिष्ठः क
नीयान्। अल्पिष्ठः। अल्पीयान्। ह्रस्वः। ह्रसिष्ठः। ह्रसीयान्। क्षिप्रः। क्षेपिष्ठः। क्षेपीयान्। क्षुद्रः। क्षोदिष्ठः क्षोदीयान् अन्तिकः। नेदिष्ठः। नेदीया
न्। बाढः। साधिष्ठः। साधीयान्। ऽतिशयेन बहुलः यस्येत्यलोपः बंहिष्ठः इष्ठः बंहीयान् ईयसुः अतिशयेन वृद्धः वर्षिष्ठः इष्ठः वर्षीयान् ईयसुः अतिश
येन तृप्रः पुरोडाशः तृप्रं दुःखं। त्रपिष्ठः इष्ठः त्रपीयान् ईयसुः अतिशयेन वृंदारकः वृंदारकाद्रूपिमुख्याविति अमरः यस्येत्यलोपः वंहिष्ठः इष्ठः बंही
यान् ईयसुः अतिशयेन दूरः दविष्ठः इष्ठः दवीयान् ईयसुः अतिशयेन युवा यविष्ठः इष्ठः यवीयान् ईयसुः युवाल्पयोः कनन्वा एतयोः कनादेशो वा स्या
त् इष्ठेयसोः परतः कनिष्ठः इष्ठः कनीयान् ईयसुः अतिशयेन ह्रस्वः ह्रसिष्ठः इष्ठः ह्रसीयान् ईयसुः अतिशयेन क्षिप्रः क्षेपिष्ठः इष्ठः क्षेपीयान् ईयसुः
अतिशयेन क्षुद्रः क्षोदिष्ठः इष्ठः क्षोदीयान् ईयसुः अतिशयेनान्तिकः यस्येत्यलोपः नेदिष्ठः इष्ठः नेदीयान् ईयसुः
अतिशयेन बाढः यस्येत्यलोपः साधिष्ठः इष्ठः साधीयान् ईयसुः वृद्ध प्रशस्ययोर्वा ज्यादेशः स्यादिष्ठेयसोः परतः॥ ६॥ ॥

ईलोपोज्याशब्दादीयसः ईयसुः ईयसः किं ज्येष्ठः प्रियोरुबहुलगुरुदीर्घाणां लोहितादित्वादिमन् प्रेमेत्यादि बहोरिष्ठेयिः इष्ठस्ययिः इष्ठेति लुप्तषष्ठीकं पदं बहुशब्दा
दिष्ठप्रत्यये कारस्ययिः स्यात् ईयसुप्रत्ययं परे ईकारस्य लोपश्च बहोर्भूश्च बहोः स्थाने भूः स्यादिष्ठेयसोः परतः। अतिशयेन बहुः भूयिष्ठः इष्ठः भूयान् ईयसुः
विन्मतोर्लुक् विनो मतोश्च लुक् स्यादिष्ठेयसोः परतः। मतुग्रहणं वतोरप्युपलक्षणं बोध्यं अतिशयेन स्रग्वी स्रजिष्ठः स्रजीयान् अतिशयेन त्वग्वान् त्वचि
ष्ठः त्वचीयान् किमोऽव्ययाख्यातात्तरतमयोराम्वद्रव्यप्रकर्षे किमऽव्ययाख्यातेभ्यः परो यो तरतमौ तदन्तेभ्यः आमु स्यात् न तु द्रव्यप्रकर्षे उकार उच्चारणा
र्थः निरनुबन्धस्येति परिभाषयानुड् विधौ नास्य ग्रहणम् अन्यथा पचतितराणामिति स्यात्। प्रमाणे द्वयसज्दघ्नञ्मात्रचः प्रथमान्तात् मानः तत्प्रमाणमस्येत्यर्थे

ईलोपो ज्याशब्दादीयसः ज्याशब्दात्परस्य ईयस ईकारस्य लोपः। अतिशयेन वृद्धः। प्रशस्यो वा ज्यायान्। ज्येष्ठः। बहोरिष्ठेयिः। बहोरुत्तरस्ये
कारस्य यिरादेशो बहो भूश्च भूयिष्ठः। भूयान्। किमोऽव्ययाद्याख्याताच्च तरतमयोराम्वद्रव्यप्रकर्षे। किंतराम्। किन्तमाम्। कुतस्तराम्। कुतस्तमा
म्। उच्चैस्तराम् गायति। उच्चैस्तमाम्। पचतितराम्। पचतितमाम्। पठतितराम्। पठतितमाम्। द्रव्यप्रकर्षे तु। उच्चैस्तमस्तरुः। परिमाणे
दघ्नट्द्वयसट्मात्रटः। जानुदघ्नम् शिरोद्वयसम्। पुरुषमात्रम्। पुरुषहस्तिभ्यामण् च। पौरुषम् हास्तिनम्। वत्वन्तात्स्वार्थे द्वयसट्मात्रटौ
तावद्द्वयसम् तावन्मात्रम्। द्वयोर्बहूनां च एकस्य निर्द्धारणे किमादिभ्योडतरडतमौ। भवतः क एव कतरः। भवतां त्रिकः। कतमः। भवतो
॥ र्यतरस्तार्किकस्ततर उद्धृत्ला तु

एतेस्युः आयामस्तु प्रमाणं स्यादिति नेह गृह्यते किंतु प्रमाणमिह परिच्छेदकमात्रं तत्र मात्रट्। आद्यौ तूर्ध्वमान एव भव
तः तथैव वृद्धैः स्वीकृतत्वात् टित्वात् ङीप् तद्धितेति स्त्रियामीप् जानुप्रमाणमस्य जानुदघ्नं शिरः प्रमाणमस्य शिरोद्वयसं पुरुषः प्रमाणमस्य पुरुषमात्रं जलं पु
रुषहस्तिभ्यामण्च आभ्यां प्रमाणेऽर्थेऽणपि स्यात् वत्वन्तात्स्वार्थे द्वयसट्मात्रटौ वतुप्रत्ययान्तात्प्रकृत्यर्थे एतौ स्तः तावदेव तावद्द्वयसं द्वयोर्बहूनां चैकस्य निर्द्धा
रणे किमादिभ्यो डतरडतमौ किम् यत् तद् एकेभ्यो द्वयोर्मध्ये एकस्य निर्द्धारणे डतरः बहूनां मध्ये एकस्य निर्द्धारणे डतमश्च स्यात्। द्वयोर्बहूनामिति निर्द्धा रणे

सू॰
सि॰ च॰
टी॰ सु॰
११५

षष्ठी। निर्द्धार्यमाणवाचिभ्य एवैताव भिधानस्वभावात्। कतरः। कठ एव इति जात्या निर्द्धारणं। तत्रमधीते वेति वा। तौ त्रिकः कतम इति गुणेन निर्द्धारणं। तर्कमधीते वे-
त्यिवा नार्थिको यतरः। इति गुणेन निर्द्धारणं। ततरस्तकौमुद्यां तु उक्तार्थं करोतु कतरो ऽध्यापक इति क्रियया निर्द्धारणं। कतरो देवदत्त इति संज्ञया निर्द्धारणं
एवं यतमः ततमः। अनयोरेकतरो मैत्रः। एषामेकतमः। पक्षे किमः शब्दस्य कः यच्छब्दस्य यः तच्छब्दस्य सः। अव्ययसर्वनाम्नामकच् प्राक् टेः अव्ययानां भमात्रे टिलोपः। प्रत्यये तु किमः कः यकः
सकः कक इति तु नोक्तमकसहितस्यापि किमो भाष्ये कादेशविधानात्॥ ॥ संख्येयविशेषावधारणे द्वेस्तीयः संख्यानुयोगः संख्येयः विशेषेणावधार-
णं विशेषावधारणं संख्येयस्य विशेषावधारणं संख्येयविशेषावधारणं तस्मिन्नर्थे द्विशब्दात्तीयप्रत्ययः स्यात् पूरणे इत्यधिकारो ऽयम्। त्रेः संप्रसारणं च त्रिशब्दात्तीयः
स्यात् त्रेः संप्रसारणं च तृतीयः। त्रयाणां संख्यापूरणः तृतीयः। षट्कतिकतिपयचतुरां थुक् षट्कतिकतिपयचतुर्भ्यः स्यात् डटि थुगागमः स्यात् तस्मिन्नेवार्थे डट्प्रत्ययः स्याद्थुगागमश्च। षण्णां पूरणः। षष्ठः। कतीनां पूरणः कतिथः। कतिपया-

संख्येयविशेषावधारणे द्वेस्तीयः। द्वयोः पूरणो द्वितीयः। त्रेः संप्रसारणं च तृतीयः। षट्कतिकतिपयचतुरां थुक्। षष्ठः। कतिथः। कतिपयथः। चतु-
र्थः। चतुरश्छयतावाद्यक्षरलोपश्च। तुर्यः तुरीयः ॥ पञ्चादेर्मट्। पञ्चमः। सप्तमः। एकादश्या डट्। एकादशः। द्वादशः। द्व्यष्टनः संख्यायाम-
बहुव्रीह्यशीत्योः। उत्तरपदे। अष्टादशः। त्रेस्त्रयः। त्रयोदशः। चतुर्दशः। पञ्चदशः। षोडशः। सप्तदशः ॥ नां पूरणः कतिपयथः। चतुर्णां पूरणश्चतुर्थः टित्वात् स्त्रियां ङीप्।
युष्मदस्मदोः षष्ठी चतुर्थीति निर्देशात् षष्ठेषकारस्य जश्त्वं चतुर्थे रेफस्य विसर्गश्च न। चतुरश्छयतावाद्यक्षरलोपश्च। चतुरः शब्दात् यईयप्रत्ययौ स्तः चकारकारयोर्लो-
पश्च तुर्णां पूरणः तुर्यः तुरीयः पञ्चादेर्मट् पञ्चप्रभृतिभ्यो मट् स्यात् पंचानां पूरणः नाम्नो नो लोपः इति नलोपः पंचमः सप्तानां पूरणः सप्तमः अष्टानां पूरणः अष्टमः नवा-
नां पूरणः नवमः दशानां पूरणः दशमः टित्वात् स्त्रियामीप् दशमी। एकादश्या डट्। एकादशशब्दप्रभृतिभ्यो डट् स्यात् डित्वाट्टिलोपः टित्वान्ङीप् एकश्च दश चेति स-
ह्यादेरिन्यात् एकादशानां पूरणः एकादशः। द्वौ च दश चेति द्व्यधिका दशेति वा द्व्यष्टनः संख्यायामुत्तरपदे एतयोरात्वं स्यात् बहुव्रीहौ अशीतिपरे च न। द्वाद-
शः। बहुव्रीहौ किं। द्विरावृत्ता दश इति सुच् प्रत्ययार्थे बहुव्रीहिः द्विदशाः। ड प्रत्ययः। अशीतिपरे किं। द्व्यशीतिः। प्राक् शतादिति कर्तव्यं नेह द्विशतं द्विसहस्रं द्वादशानां पूरणः

राम
११५

बहुव्रीहौ तु त्रिर्दशेति त्रिदशाः सुप्रत्ययाऽर्थे बहुव्रीहिः। अशीतौ तु त्र्यशीतिः। प्राक्शतादित्येव। त्रिशतं। त्रिसहस्रं। त्रयोदशानां पूरणः त्रयोदशः। चतुर्दशानां पूरणः चतुर्दशः। पंचदशानां पूरणः पंचदशः। षोडशानां पूरणः षोडशः। सप्तदशानां पूरणः सप्तदशः। अष्टादशानां पूरणः अष्टादशः॥ ॥ विंशत्यादेर्वा तमट्। विंशतिप्रभृतिभ्यो वा तमट् स्यात् पक्षे एकादशादेरिति डट्। इति त्वादीपुडट्प्रत्यये तु एकोनविंशतेः पूरणः विंशतेस्तिलोपो डिति। विंशतिशब्दस्य ति इत्यस्य लोपः स्यात् डिति प्रत्यये एकोनविंशः। तमटि एकोनविंशतितमः। विंशतेः पूरणः विंशतितमः। डति तु विंशः। एकविंशतेः पूरणः एकविंशतितमः। एकविंशः। एवं द्वाविंशतितमः। द्वाविंशः। त्रयोविंशतितमः। त्रयोविंशः। चतुर्विंशतितमः। चतुर्विंशः। पंचविंशतितमः। पंचविंशः। षड्विंशतितमः। षड्विंशः। सप्तविंशतितमः। सप्तविंशः। अष्टाविंशतितमः। अष्टाविंशः। किंच पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतमेते निपातनात् सिद्धाः। एकोनत्रिंशतः पूरणः एकोन।

विंशत्यादेर्वा तमट्। विंशतितमः। एकेन ऊना विंशतिः एकोनविंशतिः। एकोनविंशतेः संख्यापूरक एकोनविंशतितमः। विंशतेस्तिलोपो डिति। विंशः। त्रिंशत्तमः। त्रिंशः। द्वाभ्यामधिका अशीतिः द्व्यशीतिः। द्व्यशीतेः संख्यापूरको द्व्यशीतितमः। द्विचत्वारिंशत्तमः। पञ्चाशत्तमः। षष्टेः संख्यापूरणः। षष्टितमः। सप्ततितमः। नवतितमः॥

१ त्रिंशत्तमः। एकोनत्रिंशः। त्रिंशतः पूरणः त्रिंशत्तमः। त्रिंशः। एवं एकत्रिंशत्तमः। एकत्रिंशः। द्वात्रिंशत्तमः। द्वात्रिंशः। त्रयस्त्रिंशत्तमः। त्रयस्त्रिंशः। चतुस्त्रिंशत्तमः। चतुस्त्रिंशः। पंचत्रिंशत्तमः। पंचत्रिंशः। षट्त्रिंशत्तमः। षट्त्रिंशः। सप्तत्रिंशत्तमः। सप्तत्रिंशः। एकोनचत्वारिंशत्तमः। एकोनचत्वारिंशः। द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः। त्रेस्त्रयश्च वा चत्वारिंशत्प्रभृतौ परे। चत्वारिंशत्तमः। चत्वारिंशः। एकचत्वारिंशत्तमः। एकचत्वारिंशः। एवं सर्वत्र डट् तमटौ। द्विचत्वारिंशत्। द्वाचत्वारिंशत्। त्रिचत्वारिंशत्। त्रयश्चत्वारिंशत्। चतुश्चत्वारिंशत्। पंचचत्वारिंशत्। षट्चत्वारिंशत्॥ सप्तचत्वारिंशत्। अष्टचत्वारिंशत्। अष्टाचत्वारिंशत्। एकोनपंचाशत्। पंचाशत्। एकपंचाशत्। द्विपञ्चाशत्। द्वापंचाशत्। त्रिपंचाशत्। त्रयःपंचाशत्। चतुःपंचाशत्। पंचपंचाशत्। षट्पंचाशत्। सप्तपंचाशत्। अष्टपंचाशत्। अष्टापंचाशत्। एकोनषष्टिः। षष्टिः। एकषष्टिः। द्वाषष्टिः। द्विषष्टिः। त्रिषष्टिः। त्रयःषष्टिः। चतुःषष्टिः। पंचषष्टिः॥

अष्टात्रिंशत्तमः। अष्टत्रिंशः। ४

षट्षष्टिः। सप्तषष्टिः। अष्टषष्टिः। अष्टाषष्टिः। एकोनसप्ततिः। एकसप्ततिः। द्विसप्ततिः। द्वासप्ततिः। त्रिसप्ततिः। त्रयःसप्ततिः। चतुःसप्ततिः। पंचसप्ततिः। षट्सप्ततिः। सप्तसप्ततिः। अष्टसप्ततिः। अष्टासप्ततिः। एकोननवतिः। नवतिः। एकनवतिः। द्विनवतिः। द्वानवतिः। त्रिनवतिः। त्रयोनवतिः। चतुर्णवतिः। पंचनवतिः। षण्णवतिः। सप्तनवतिः। अष्टनवतिः। अष्टानवतिः। एकोनशतं शतं। शतस्य पूरणः शततमः॥ ॥ शतादेर्नित्यं शतप्रभृतिभ्यस्तमडेव स्यात् नडट्। असंख्यादेः षष्टिशब्दाच्च नित्यतमट्। षष्टितमः। संख्यादेः षष्टेस्तु डट्तमटौ। एकषष्टः। एकषष्टितमः। संख्यायाः प्रकारे धा। संख्यावाचिशब्दात् प्रकारेऽर्थे धाप्रत्ययः स्यात्। द्वौ प्रकारौ द्विधा। त्रयः प्रकाराः त्रिधा। चतुःप्रकाराः चतुर्धा। दशप्रकाराः दशधा। क्त्वाद्यंतं चेत्यव्ययत्वाद्विभक्तेर्लुक्। द्वित्रिभ्यां मेधाधमुञ्जौ वा। आभ्यामेतौ स्तः प्रकारेऽर्थे पक्षे धा। द्वौ प्रकारौ यस्य लोपः इतीकारलोपः। द्वेधा। धमुञ् उकार उच्चारणार्थः। द्वैधं। द्विधा। त्रयः प्रकाराः त्रेधा। त्रैधं। त्रिधा। एकाद्ध्यमुञ् वा। एकशब्दात् ध्यमुञ् वा स्यात्। उकार उच्चारणार्थः।

शतादेर्नित्यम्। शततमः। संख्यायाः प्रकारे धा। द्विधा। त्रिधा। चतुर्धा। दशधा। द्वित्रिभ्यां मेधाधमुञ्जौ वा। द्वेधा। त्रेधा। द्वैधम्। त्रैधम्। एकाद्ध्यमुञ् वा। ऐकध्यम्। एकधा। एकादाकिनिच्चासहाये। एकाकी। क्रियाया आवृत्तौ कृत्वसुच्। पञ्चकृत्वः। सप्तकृत्वः। द्वित्रिचतुर्भ्यः सुच्। द्विः। त्रिः। चतुः। एकस्य सकृच्च। देशश्च। एकवारं सकृत्॥

पक्षे धा। एकः प्रकारः ऐकध्यं एकधा। एकादाकिनिच्चासहाये। असहायवाचिन एकशब्दादाकिन् स्यात्। यस्य लोपः इत्यलोपः। एकाकी। कप्रत्ययोऽपि। एककः। क्रियाया आवृत्तौ कृत्वसुच्। संख्यावाचिशब्दात् क्रियायावृत्त्यर्थे कृत्वसुच्प्रत्ययः स्यात्। पौनःपुन्येन गणनमावृत्तिः। पंचवारान् पंचकृत्वः। सप्तवारान् सप्तकृत्वः। क्त्वाद्यंतं चेत्यव्ययत्वाद्विभक्तेर्लुक्। वारशब्दस्य क्रियोत्पत्त्याधारकालवाचित्वात् कालाध्वनोरिति द्वितीया। संख्यायाः किं। भूरिवारान् भुंक्ते। भूरिशब्दस्य लौकिकसंख्यावाचित्वेऽपि नेह ग्रहणं। द्वित्रिचतुर्भ्यः सुच्। एभ्यः सुच्प्रत्ययः स्यात् क्रियायावृत्तौ गणने। उकार उच्चारणार्थः। कृत्वसोऽपवादः। द्वौ वारौ द्विः। त्रीन् वारान् त्रिः। चतुरो वारान् इति रात्सस्येति सलोपः। चतुः। क्त्वाद्यंतं चेत्यव्ययत्वाद्विभक्तेर्लुक्। बहोर्वा धाऽऽसन्नकाले पक्षे कृत्वसुच्। बहुधा। बहुकृत्वो वा दिवसस्य भुंक्ते। आसन्नकाले किं। बहुकृत्वो मासस्य भुंक्ते। दिवसस्येति संबंधे षष्ठी। एकस्य सकृच्च। देशश्च। एकशब्दस्य स्थाने सकृदित्यादेशः स्याच्चात् सुच्प्रत्ययः। सं

बहुल्पार्थात्कारकाच्छस् बहु चाल्पं च बहुल्पे बहुल्पेऽर्थौ यस्य तद्बहुल्पार्थं तस्माद्बहुल्पार्थान्नकारकात् शस् स्यात् बहुभ्यः इति बहुशः अल्पेभ्य इत्यल्पशः ददाति पा
त्रे चतुर्थी बहुल्पार्थात्किं गां ददाति अर्थग्रहणात्पर्यायेभ्यो विशेषेभ्यश्च शस् भूरिशो ददाति त्रिंशः कारकात्किं बहूनां स्वामी अल्पानां स्वामी संख्यापरिमाणाभ्यां वीप्सा
यां संख्यापरिमाणवाचककारकाभ्यां वीप्सायामर्थे शस् स्यात् द्वौ द्वाविति द्विशः । प्रस्थं प्रस्थमिति प्रस्थशः माषं माषमिति माषशः संख्यापरिमाणाभ्यां किं घटं घटं ददा
ति वीप्सायां किं द्वौ ददाति कारकात्किं द्वयोर्द्वयोः स्वामी तयडयटौ संख्याया अवयवे अवयवे वर्तमानायाः संख्यात इचिनः प्रथमान्तात् षष्ठ्यर्थे तयड यटौ स्तः टका
रः स्थितइतौ बर्थ्यः द्वितयं यस्येति लोपः द्वयं त्रयोऽवयवा यस्य त्रितयं त्रयं उभाववयवौ यस्य उभयं । नित्यमत्रायट् चत्वारोऽवयवा यस्याः सा रेफस्य विसर्गे सत्वे चष्टु
त्वे चतुष्टयी ॥ स्त्रीपुंसाभ्यां नञ्स्नञौ आभ्यामेतौ स्तः भवाद्यर्थे संयोगान्तस्येति सलोपः स्त्रैणः पौंस्नः अथ विभक्तिनामकप्रत्यया उच्यन्ते इह वक्ष्यमाणप्रत्यया

बहुल्पार्थात्कारकाच्छस् । बहुशः । अल्पशः । संख्यैकवचनाभ्यां वीप्सायाम् । द्वौ द्वौ इति द्विशो ददाति । प्रस्थशः । माषशः । तयडयटौ संख्याया
अवयवे । द्वाववयवौ यस्य द्वितयम् । त्रितयम् । चतुष्टयम् । चतुष्टयी । स्त्रीपुंसाभ्यां नञ्स्नञौ । स्त्रियां भवः स्त्रैणः । पुंसि भवः पौंस्नः । वीप्सायाम्प
रद्विः द्विसं द्विसंसिध्वति । ग्रामो ग्रामो रमणीयः । परेर्वर्जने वा द्वित्वम् । परि परि वङ्गेभ्यो वृष्टो देवः । परि वङ्गेभ्यो वृष्टो देवः । वङ्गान्परिहृत्येत्यर्थः ।

तो विभक्तिसंज्ञा बोध्याः इदम इश् विभक्तौ इदमः एतेतौ स्तोरथयोः इशेपवादोऽयं एतदो अश् विभक्तौ शित्वात्सर्वादेशः । एतद् एतेतौ स्तोरथयोः अशोऽपवादोऽयं सर्वस्य सो
वादेः किमः कुः तहयोः पञ्चम्यर्थे किं सर्वादि बहुभ्यस्तस् वाऽद्व्यादिभ्यः द्व्यादिपर्युदासात् किमः पृथग्ग्रहणं तस्मादिति तसि कुः कुतः यस्मादिति तसि त्यदादेरित्यः । यतः
तस्मादिति ततः अस्मादिति तसि इतः । एतस्मादिति तसि अशादेशः अतः अमुष्मादिति अदसस्तसि त्यदाद्यत्वे मत्वे उत्वे च अमुतः बहोरिति बहुतः द्व्यादेस्तु द्वा
भ्यामित्यादि सर्वोभयार्थाभ्यां पर्यभिभ्यां तस् परितः सर्वत इत्यर्थः अभितः उभयत इत्यर्थः सप्तम्यर्थे किं सर्वादि बहुभ्यस्त्रो द्व्यादिभ्यः इदमः सप्तम्यर्थे हः त्रस्याप
वादः इशादेशः अस्मिन्निति इह कस्मिन्निति कुत्र किमः सप्तम्यर्थे अः किमः कश्च यस्येति लोपः क छन्दसि किमो हः । सप्तम्यर्थे कुह एतस्मिन्निति एतद्दो अश् ।

अत्र पंचमीसप्तमीतरविभक्त्यंतादपि तसादयो दृश्यंते भवादियोगे एव स भवान् ततो भवान् तत्र भवान् तं भवंतं ततो भवंतं तत्र भवंतं इत्यादि एवं दीर्घायुः देवानांप्रि
यः आयुष्मान् एतैर्योगेपि सर्वैकान्यकिंयत्तद्भ्यः कालार्थेभ्यः सप्तम्यर्थे दा सर्वस्मिन् काले इति सादेशो वा सदा सर्वदा एकस्मिन्काले इति एकदा अन्यस्मिन्काले इ
ति अन्यदा कस्मिन् काले इति त्यदादेरित्यत्वं कदा यस्मिन्काले इति यदा तस्मिन्काले इति तदा कालार्थेभ्यः इति किं सर्वत्र देशे अस्मिन् काले इति कालवाच
कादिदमः सप्तम्यर्थे र्हिल्प्रत्ययः दाप्रत्ययस्यापवादोयं एतादेशः एतर्हि काले इति किं इह देशे कालवाचकादिदमः सप्तम्यर्थेऽधुना दा नींप्रत्ययौ च इशादेशः
यस्य लोप इतीलोपः अधुना इशादेशः इदानीं कालवाचकात् दा सप्तम्यर्थे दानींप्रत्ययश्च तस्मिन्काले त्यदादेरित्यत्वे तदानीं किम् यत्तदेतद्भ्योऽन्यद्यतनकालवाचकेभ्यः स
प्तम्यर्थे र्हिप्रत्ययो वा कस्मिन्काले इति त्यदादेरित्यत्वं कर्हि पक्षे दा कदा यस्मिन्काले यर्हि यदा तस्मिन्काले तर्हि तदा एतस्मिन्काले एतादेशः एतर्हि समानेऽन्हि
इति सहादेरित्यनेन समानस्य सः समानशब्दात् सप्तम्यंतस्याऽहन्शब्दस्यार्थे द्यस् निपात्यते सद्यः पूर्वस्मिन् वत्सरे इति पूर्वतरे वत्सरे इति च सहादेरित्यनेन पूर्व
पूर्वतरयोः पर इत्यादेशो निपात्यते संवत्सरेऽर्थे पूर्वपूर्वतरशब्दाभ्याम् उत् आरि प्रत्ययौ यस्येत्यलोपः परुत् परारि अस्मिन् वत्सरे इति संवत्सरेर्थे इदम्शब्दात् स
मसण्प्रत्ययः ईशादेशः आदिवृद्धिः षत्वं ऐषमः परस्मिन्नहनीति परस्मादहनि इत्यर्थे एद्यवि प्रत्ययो निपातनात् परेद्यवि अस्मिन्नहनीति इदम्शब्दात् द्यप्र
त्ययो निपातनादशादेशः अद्य पूर्व अन्य अन्यतर इतर अपर अधर उभ उत्तर इत्येभ्योऽहनीत्यर्थे एद्युस्प्रत्ययो निपातनात् यस्येत्यलोपः पूर्वस्मिन्नह
नीति पूर्वेद्युः अन्येद्युः अन्यतरस्मिन्नहनीति अन्यतरेद्युः इतरस्मिन्नहनीति इतरेद्युः अपरस्मिन्नहनीति अपरेद्युः अधरस्मिन्नहनीति अधरेद्युः। उभयोरह्नोरि
ति उभयेद्युः उभयाद्द्युः प्रत्ययः उभयद्युः अद्यादिभ्यः किम् सर्वादिबहुभ्यः प्रकारेऽर्थे वर्तमानेभ्यः स्वार्थे था प्रत्ययः सामान्यस्य भेदको विशेषः प्रकारः यथा किमि
दमेतद्भ्यः प्रकारेऽर्थे वर्तमानेभ्यः स्वार्थे थम् प्रत्ययः थाप्रत्ययस्यापवादोयं केन प्रकारेण त्यदादेरित्यः कथम् अनेन प्रकारेण एतेन प्रकारेण वा इदमेतदोरित् इत्य राम
मे अव्ययत्वाद्विभक्तेर्लुक् सर्वत्र इति विभक्तिनामकाः प्रत्ययाः दिग्देशकालवृत्तिभ्यो दिशि रूढेभ्यः शब्देभ्यः सप्तमीपंचमीप्रथमाविभक्त्यर्थे स्वार्थे स्तात्प्रत्ययः पूर्वी धरा ११७
॥ ॥

अन्यस्मिन्नहनीति॥४

वरेभ्योऽस्प्रत्ययोऽपि पुरस्त्र धाऽधादेशाश्चास्तात् असेः परयोः । पूर्वस्यां पूर्वस्याः पूर्वा वा दिक् पुरः । अस्प्रत्ययः । पुरस्तात् अस्तातिप्रत्ययः । पूर्वशब्दादस्तसुप्रत्ययः पु
रादेशश्च वा पुरतः स्यात् पुरः पुरतोऽग्रतः इत्यमरः । पुरतः प्रथमे चाग्रे इति विश्वश्च । अधरस्यां अधरस्याः अधरा वा अधः असि अधस्तात् अस्तात्प्रत्ययः । अवरस्याम्
अवरस्याः अवरा वा अवः असि अवस्तात् अस्तात् अवरस्याऽस्तात् परेऽवा । अवस्तात् अवरस्तात् एवं देशे काले च । दिक्शब्देभ्यः किम् ऐन्द्र्यां वसति सप्तम्याद्य
र्थे किं पूर्वं ग्राममगतः । दिग्देशकालेभ्यः किं पूर्वस्मिन् गुरौ वसति । दक्षिणोत्तराभ्यामतसुच् अस्तातिप्रत्ययस्यापवादः । दक्षिणस्यां दक्षिणस्याः दक्षिणा वा दिक् ।
दक्षिणतः उत्तरस्यां उत्तरस्याः उत्तरा वा उत्तरतः । अतसुप्रत्ययवराभ्यामतसुच्वा । पक्षेऽस्तात् परस्यां परस्याः परा वा परतः अवरस्यां अवरस्याः अवरा वा अवरतः अ
तसि पक्षेऽस्तात् अवरस्तात् । अञ्चत्यन्तादिक्शब्दादस्तात् प्रत्ययस्य लुक् । न तद्धितलुकि स्त्रीप्रत्ययस्य लुग्वाच्यः प्राच्यां प्राच्याः प्राची वा दिक् प्राक् उदक् एवं देशेका
श्चाऽस्तातिविषये अपरस्मिन् अपरस्मात् अपरो वेति पश्चात् । उत्तराऽधरदक्षिणादातिप्रत्ययोऽस्तातिविषये उत्तरात् अधरात् दक्षिणात् अदूरे वर्तमानेभ्यः । उत्तराऽधरदक्षि
णाभ्य एनप्रत्ययो वा सप्तमीप्रथमाविभक्त्यर्थे उत्तरस्मिन् उत्तरो वेति उत्तरेण अधरस्मिन् अधरो वेति अधरेण दक्षिणस्मिन् दक्षिणो वेति दक्षिणेन पक्षे उत्तरात् ।
अधरात् दक्षिणात् आत्प्रत्ययः । उत्तरतः अधः अधस्तात् दक्षिणतः केचिद्दिक्शब्दमात्रादेनप्रत्ययमाहुः । पूर्वेण ग्रामं अपरेण ग्रामं दक्षिणशब्दादाप्रत्ययः
सप्तमीप्रथमाविभक्त्यर्थे दक्षिणस्यां दक्षिणा वेति दक्षिणा । दक्षिणोत्तराभ्यां दूरेऽर्थे आहि आप्रत्ययौ । दक्षिणस्यां दिशि दूरे इति दक्षिणाहि दक्षिणा उत्तरस्यां दिशि दू
रे इति उत्तराहि उत्तरा अव्ययत्वाद्विभक्तेर्लुक् सर्वत्र । अथ सर्वपदं द्विरुच्चारयेदित्यधिकारोऽयं वीप्सायां पदं द्विः । व्याप्तुमिच्छा वीप्सा व्याप्तिं प्रतिपिपादयिषेति
यावत् व्याप्तिः कार्त्स्न्यं न चाधिकारकं सर्वे ब्राह्मणा आमन्त्रिता इत्यादौ यथा न हि जगतीतले विद्यमाना ब्राह्मणाः सर्वेऽपि केनचिदामन्त्रयितुं शक्यन्ते इति
स्वग्रामस्थस्वजातीयब्राह्मणानां संकोचो यथाऽऽभ्रपेयं तेन हत्रापि सकलवृक्षसेचने सामर्थ्यं कस्यापि मनुष्यस्य नास्तीति यत्र वाटिकादौ वृक्षसेचनार्थ
मधिकारस्तद्वाटिकास्थवृक्षाणामेव कार्त्स्न्ये वृक्षं सिञ्चतीत्यादौ गम्यते इत्यः

दृ
ले च ऊर्ध्वशब्दात् रिरिष्टातसश्चयादेस्तातिविषये । ऊर्ध्वस्योपादेशश्च । ऊर्ध्व ऊर्ध्वात् ऊर्ध्वो वेति । उपरि उपरिष्टात् । अपरशब्दादात् प्रत्ययोः परस्य पश्चादेश

भ्युपेयं यत्र तु संकोचे कारणं नास्ति तत्राऽसंकोच इष्ट एव यथा जातो निधनमुपैतीति तस्यां वीप्सायां वाच्यायामेकस्य पदस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वे
नाविधीयेते इत्यर्थः। वृक्षं वृक्षमित्यत्र प्रत्येकनिष्ठमेकत्वमेव द्विः प्रतिभासतेऽतो न बहुवचनप्रसंगः 'परेर्वर्जने वा' द्वित्वं वर्ज्जनार्थवाचिनः परेर्वा द्वित्वं स्यात् 'परिप
रि वंगेभ्य इत्यत्र परियोगे पंचमी वाग्रहणात्परि हरेः संसार इति॥ ॥ उपर्यऽध्यऽधसः सामीप्ये द्विः' सामीप्यार्थवाचिन एते द्विः स्युः सामीप्यं प्रत्यासत्तिस्त
च्च कालकृतं देशकृतं वा कालकृतस्य सामीप्यस्योदाहरणमध्यधिसुखमिति। अन्यद्द्वयं देशकृतस्य सामीप्यस्योदाहरणं। वाक्यादेः संबोधनस्याऽसूया

उपर्य्यध्यधसस्सामीप्ये द्विः। उपर्युपरि ग्रामम्। ग्रामस्योपरिष्टात्समीपे देश इत्यर्थः। अध्यधिसुखम्। सुखस्योपरिष्टात्समीपदेश इत्यर्थः वाक्यादेस्सम्बोधनस्याऽसूयासम्मतिकोपकुत्सनभर्त्सनेषु। असूयायामुदाहरणम्। सुन्दर सुन्दर वृथा ते सौन्दर्य्यम्" देव देव वन्द्योऽसि। कोपे दुर्विनीत दुर्विनीत इदानीं ज्ञास्यसि। कुत्सने। धानुष्क धानुष्क वृथा ते धनुः। भर्त्सने। चौर चौर घातयिष्यामि त्वाम्। द्विरुक्त एकशब्दो बहुव्रीहिवत्। तेन विभक्तिलोपपुम्वद्भावौ। एकैकमक्षरम्। एकैकया हुत्या। इह पूर्वभागे पुंवद्भावादवयवे विशेषः 'पदविभागोऽवग्रहः। एक एकया इत्यादि विशेषः। एकैकस्मै देहि। पीडायां द्योत्यायां द्वेस्तो बहुव्रीहिवच्चागतगतः। विरहात्पीड्यमानस्येयमुक्तिः। गतगता। ॥ सम्मतिकोपकुत्स

नभर्त्सनेषु' एष्वर्थेषु विद्यमानस्य वाक्यादिस्थितस्य संबोधनस्य द्वित्वं स्यात् ननु कोपासूयाभ्यां पृथक् कुत्सनभर्त्सनग्रहणमपार्थकं नाऽसूयां विना कुत्सयते नाप्य
कुपितो भर्त्सयति। इति चेदत्राहुः। गुरवो हि हितैषित्वादकुपिता अपि भर्त्सनं कुर्वन्ति विनाप्यसूयया कुत्सां कुर्वन्ति पृथक् तयोर्निर्देशः सम्मतिः पूजा। द्विरुक्त ए
कशब्दो बहुव्रीहिवत्। बहुव्रीहौ यत्कार्यमुक्तं तद् द्विरुक्ते एकशब्दे भवतीत्यर्थः। बहुव्रीहिसमासवत्वात्। समासप्रत्यययोरिति विभक्तिलोपः। पुंवद्वेति। पुंवद्भावश्च राम
एक एकमित्यत्र द्वयोरपि विभक्त्योर्लुकि कृते बहुव्रीहिसमासवद्भावादेव कृत्तद्धितसमासाश्चेत्यनेन समुदायान्त्याद्युत्पत्तिः 'अनतरं गैकसंख्याऽवरुद्धा द्विरुक्तार्थः॥ ११८

संख्यान्तरेण निराकांक्षस्य एव इत्युक्तत्वादेकवचनमेव। एकया इत्यत्र सर्वादेः समासाद्वा वृत्तिपूर्वभागे पुंवद्भावः। एकस्मै एकस्मै इत्येकैकस्मै पीडायां द्योत्यायां द्वे स्तो
बहुव्रीहिवच्च। पीडार्थे द्योतकं पदं द्विः स्यात्। गतः गत इति बहुव्रीहिवद्भावाद्विभक्तेर्लुक्। गतगतः। गता गतेति पुंवद्भावः। गतगता॥ ॥ सादृश्ये द्योत्ये गु
णवचनस्य द्वे स्तो बहुव्रीहिवच्च। तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यं। पट्वी पट्वीति पुंवद्भावः। पटुपट्वी। पटुः पटुरिति बहुव्रीहिवद्भावाद्विभक्तेर्लुक्। प
टुपटुः। गुणेषु शुक्लादयः पुंसि गुणिनि लिंगास्तु तद्वतीत्युक्तत्वात्। यत्र शुक्लादयः शब्दा द्रव्यवाचकास्तत्र गुणा उपसर्जनीभूता एव संति अतोऽत्र द्रव्यवाचकशुक्लादिप
दस्य गुणवाचकशुक्लादिपदस्य च ग्रहणं। शुक्लः शुक्ल इति बहुव्रीहित्वाद्विभक्तेर्लुक्। शुक्लशुक्लः पटः। गुणोपसर्जनद्रव्यवाचिन उदाहरणम्। शुक्लं शुक्लमिति स

सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तो बहुव्रीहिवच्च। पटुपट्वी। पटुपटुः। पटुसदृशः। ईषत्पटुरिति यावत्। गुणोपसर्जनद्रव्यवाचिनः केवल
गुणवाचिनश्चेह गृह्यते। शुक्लशुक्लः पटः॥ शुक्लशुक्लं रूपम्। अनुक्रमे द्योत्ये द्वे। मूले मूले स्थूलो वृक्षः। सम्भ्रमेण प्रवृत्तावनेकधा प्रयोगः
॥ सर्प्प ३ बुध्यस्व ३ क्रियासमभिहारे द्वे॥ लुनीहि लुनीहि इत्येवायं लुनाति

मासवत्त्वाद्विभक्तेर्लुक्। शुक्लशुक्लं रूपं केवलगुणवाचिन उदाहरण
म्। आनुक्रमे द्योत्ये द्वे अनुक्रमद्योतकं पदं द्विः स्यात्। वीप्साऽभावादयमारंभः। एकस्य वृक्षस्यादेरेकमेव मुख्यं मूलमग्रं च भवति इतरेषां भागानामापेक्षिकोऽग्र
मूलत्वव्यपदेशः। स्थौल्यसौक्ष्म्येऽपि नैकरूपे। यथा मूलं स्थूलं यथाऽग्रं सूक्ष्मं न तथाऽन्ये इतरे भागा इति वीप्साया असंभवः। मूले मूले स्थूलस्तथाऽग्रेऽग्रे सूक्ष्मः। सम्भ्र
मेण प्रवृत्तावनेकधा प्रयोगः। संबोध्यो हि यावद्भिः शब्दैः प्रयोजनमेति तावन्तः प्रयोगा वाच्या इत्यर्थः। क्रियासमभिहारे द्वे। पौनःपुन्यं भृशार्थश्च क्रियासमभि
हारस्तत्र पदं द्विः स्यात्। पौनःपुन्ये यथा। आख्यातकृदंतयोरेव पचति पचति। भुक्त्वा भुक्त्वा। भृशार्थे यथा। लुनीहि लुनीहीति ॥ ॥ ६ ॥ ६ ॥

कर्मव्यतिहारे सर्वादेर्द्वित्वं समासवच्च बहुलम् । क्रियाविनिमये ऽर्थे सर्वादिगणस्य द्वित्वं स्यात् नित्यमेवेदं द्वित्वं बाहुलकं तु समासवद्भावस्यैव तेनान्यपरशब्द
योः समासवद्भावो न इतरशब्दस्य च नित्यमेव समासवद्भावो भवतीत्यर्थः । असमासवद्भावे पूर्वपदस्थविभक्तेः सिरादेशो वाच्यः पूर्वपदस्य प्रथमादिविभक्तीनां स्था
ने सिरेव भवत्यसमासवद्भावे । अन्यः अन्य इति अन्योन्यः । अन्यौ अन्याविति अन्योऽन्यौ अन्ये अन्ये इति अन्योन्ये अन्यमन्यमिति अन्योन्यमित्यादिषु सर्वत्र पूर्वपद
स्थविभक्तेः सिकृतेन नो विसर्गः । अतोऽम्रुरित्युत्वे उ ओ इत्योत्वे एङोतोऽत इत्यलोपे च रूपसिद्धिः । एवं परः पर इति परस्परः परौ पराविति परस्परौ परे परे इति परस्प

कर्मव्यतिहारे सर्वादेर्द्वित्वं समासवच्च बहुलम् । बहुलग्रहणादन्यपरयोर्न समासवत् । इतरशब्दस्य नित्यं समासवत् । असमासवद्भावे पूर्व
पदस्थाया विभक्तेः सिरादेशो वाच्यः । अन्योऽन्यं विप्रा नमन्ति । अन्योऽन्यौ । अन्योऽन्यान् । अन्योऽन्येन कृतम् । अन्योऽन्यस्मै दत्तमित्यादि अ
न्योऽन्येषां पुष्कैरामृशन्त इति माघः । एवं परस्परम् । वाचस्पत्यादित्वात्सः । इतरेतरम् । इतरेतरेणेत्यादि । स्त्रीनपुंसकयोरुत्तरपदस्था
या विभक्तेराम्भावो वा । अन्योऽन्यामन्योऽन्यम्परस्परां परस्परमितरेतरामितरेतरम्वा इमे ब्राह्मण्यौ कुले वा भोजयतः । इल हृद्येऽप्या रामः
वभावः क्लीबे तु विरहस्य मोः । समासे सेरलुक् चेति सिद्धम्बाहुलकात्त्वयम् । समासे सेरलुक्चेत्यस्योदाहरणान्तु । अन्योऽन्याश्रयः ॥ पर
रे परं परमिति परस्परमित्यादि इतरशब्दस्य तु समासवद्भावात् समासप्रत्यययोरिति विभक्तेर्लुक् । इतर इतर इति इत ॥ स्पराश्चिसादृसादृश्यमित्यादिर्के
रेतरे । इतरौ इतराविति इतरेतरौ । इतरे इतरे इति इतरेतरे इतरमितरमिति इतरेतरमित्यादि । स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा स्त्रियां क्लीवे
चोत्तरपदस्थविभक्तीनामामादेशो वा भवति स्त्रियां यथा । अन्या अन्येति पूर्वपदस्थ विभक्तेः सिः परपदस्थविभक्तेश्चाम् । अन्योन्याम् । आमोऽभावपक्षे । अ राम
न्योन्यः । बहुलग्रहणादावतः स्त्रियामित्याप् प्रत्ययाभावो इलहृद्ये । अन्ये अन्ये इति अन्योन्यं अन्योन्यौ अन्या अन्या इति ॥ ६ ॥ ॥ ६ ॥ ११९

अन्यो न्याऽन्यो न्येऽन्यामन्यामिति अन्योन्यां अन्योन्यमित्यादि' एवं परस्परं परस्परः परस्परां परस्परैः परस्परां परस्परे' परस्परां परस्परमित्यादि एवमितरेतरां इ
तरेतरः इतरेतरा इतरेतरे' इतरेतरौ' इतरेतरां इतरेतरे' इतरेतरां इतरेतरमित्यादि' क्लीबे तु अन्यअन्यदिति अन्योन्यां' अन्योन्यं' स्यमोः प्रत्यययोः स्थाने इत्यादेरि
ति इत्वादेशाऽभावो बाहुलकादेवं इमे कर्म्यौ इमे कर्तृ णीवाऽन्यामन्यामन्यदन्य ह्वा भोजनं कारयतः। ननु अन्योन्यं परस्परमित्यादौ केवले पूर्वपदविभक्तीनांस्या
ऽऽदेशविधानस्य चरितार्थत्वमस्ति। अन्योऽन्यसंसक्तमहस्त्रियामिति। अन्योन्याश्रय इति परस्परास्सिसाहय्यमिति। अद्दष्टपरस्परैरित्यादौ समासप्रत्यययोरित्य

अकृच्छ्रे प्रियसुखयोर्वा द्वित्वम्। प्रियप्रियेण ददाति। प्रियेण वा' सुखसुखेन ददाति' सुखेन वा' अतिप्रियमपि वस्त्वनायासेन ददातीत्य
र्थः। यथास्वेयथायथम्। यथाशब्दस्य द्वित्वं क्लीबत्वञ्च भवति॥ यथास्वमिति वीप्सायामव्ययीभावः' यो यं आत्माय घ आत्मीयं त
था यथास्व म्॥ यथायथं ज्ञाना' यथास्व भावमित्यर्थः। यथात्मीयमिति वा॥

नेन पूर्वपदविभक्तीनांस्यादेशस्य कथं लुग् न स्यादिति चेदत्रा
हुः' बाहुलकात्समासविषये पूर्वपदविभक्तीनांस्यादेश स्यलुग् न भवतीत्यर्थः॥ ॥ अकृच्छ्रे प्रियसुखयोर्वा द्वित्वे। अनयोर्द्वित्वं समासवच्च वा स्यात्
द्विर्वचने समासवद्भावात् स्यादिलुकि कृते' पुनः कृत्तद्धितसमासाश्चेत्यनेन स्यादिः यथास्वे इति स्वं स्वमिति यथा स्वं वीप्सार्थेऽव्ययीभावः' स्वोयमात्मेत्यादि स्वोज्ञा
तावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने इत्युक्तत्वादात्मात्मीययोरपि स्वशब्दवाच्यत्वमस्ति' आत्मात्मीययोरर्थे विद्यमानस्य यथाशब्दस्य द्वित्वे नपुंसकत्वञ्च भव
ति नपुंसकत्वान्नपुंसकस्येति ह्रस्वः। यथायथं ज्ञाने त्यत्र कर्तृकार्म्ययोः कृतादावित्यनेन कर्म्मणि षष्ठी न तु न प्रत्ययसक्तादि सुगणनात् आत्मायत्तो ॥ ६ ॥ ६ ॥

धृतिर्बुद्धिः स्वभावोऽत्र ह्यत्र वर्णं चेत्यमरोक्तत्वात्। यथायथस्य यथास्वभावमर्थः॥ ॥ द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु॥ एष्वर्थे
षु द्विशब्दस्य द्वित्वं समासवत्त्वमेकवद्भावश्च भवति तथा द्वि द्वि औ द्वि औ इति स्थिते समासवद्भावात् विभक्तिलुकि कृते पूर्वपदावयवेकारस्याम्भावः। उत्तरपदा
वयवेकारस्यात्वं क्लीबत्वैकवद्भावौ च निपातनात् एकवद्भावादेतौ मित्यमादेशे द्वन्द्वमिति रहस्यमिति रहस्यं द्वन्द्वं मंत्रयते द्वौ द्वौ भूत्वा मंत्रयत इत्य

द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु॥ एष्वर्थेषु द्विशब्दस्य द्विर्वचनम्पूर्वपरस्याम्भावोऽत्वञ्चोत्तरपदस्य
नपुंसकत्वञ्च निपात्यते। तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम्। इतरे तु विषयभूताः। द्वन्द्वम्मन्त्रयते। रहस्यमित्यर्थः। मर्यादा स्थि
त्यनतिक्रमः। आचतुरं हीमे पशवो द्वन्द्वं मिथुनायन्ते माता पुत्रेण मिथुनङ्गच्छति॥ पौत्रेण प्रपौत्रेणापीति मर्यादार्थः। व्युत्क्रम
णं पृथगवस्थानम्॥ द्वन्द्वं व्युत्क्रान्ताः। द्विवर्गसंबंधेन पृथगवस्थिताः॥ द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति। द्वन्द्वं संकर्षणवासुदेवौ
॥ अभिव्यक्तौ साहचर्येणेत्यर्थः॥ चार्थे द्वन्द्व इति निपातनात्समासवत्त्वमपि॥ शेषा निपात्याः कत्यादयः॥ ६॥ ॥ ७॥ ६॥

र्थः। एतदेव द्विः रहस्यं मर्यादायां यथा। चतुरो मर्यादीकृत्येत्याचतुरं अव्ययीभावे टच् प्रत्ययः। चतुर् शब्दोऽत्र चतुर्णां पूरणोस्ति आचतुर्थादित्यर्थः। स्त्रीपुंसौ
मिथुनं द्वंद्वं युग्मं तु युगलं युगमित्यमरः। मिथुनमिवाचरंतीति मिथुनायन्ते। यज्ञपात्रप्रयोगे यथा पात्राणि द्वंद्वं प्रयुनक्ति आसादयतीत्यर्थः। संकर्षणः सीरपाणि
रित्यमरः। वासुदेवस्त्रिविक्रमः इत्यमरश्च। अभिव्यक्तौ तु द्विशब्दस्य स्वार्थे द्वित्वमेकवद्भावादिकं तु पूर्ववदेव शेषा निपात्याः कत्यादयः। कत्यादयः शब्दा॥

निपात्यंते संख्यापरिमाणे कर्तव्ये यः प्रश्नस्तत्र वर्तमानात् किंशब्दाद् डति प्रत्ययः पक्षेवतुः ॥ ० ॥ कासंख्या येषां ते इ नेरिति जसो लुक् कति कियंतः दे
विका शिंशपादित्यवाह दीर्घसत्रश्रेयसां पंचानां वृद्धौ प्राप्तायामादेः स्वरस्यात्वं निपात्यते जितिणितिच देविकायां भवं दाविकं ॥ देविकायास्सरख्यांच भवे ।
दाविकसारखावित्यमरः । अण् शिंशपाया विकारः शांशपश्चमसः । अण् दित्यौहः इदंहात्यौहं वहो वौ इत्यौ निपातनात् अण् दीर्घसत्रे भवं दार्घसत्रं अण्

कासंख्यायेषां ते कति । दाविकः । शांशपः । दात्यौहः । दार्घसत्रः । श्रायसः ॥ ० ॥
इति श्री रामाश्रमाचार्य्यविरचितायां सिद्धान्तचन्द्रिकायाम् पूर्वार्द्ध सम्पूर्णम् ॥

श्रेयसिभवं श्रायसं अण् ॥ इति तद्धितप्रक्रिया ॥ श्री मन्यावकवर्यभक्तिविनयाविख्यातकीर्त्तिप्रभा राजेन्द्रैः परिपूजिताः सुकृतिनः प्रभाववागदेवताः संता
रोजगतांपतिं गुणगणैर्विभ्राजमानाः सनत् संवेगादियुजो जयंतु सततं षट्शास्त्रविद्याविदः १ तेषां शिष्यः सदानंदस्तदनुग्रहभूषितः ॥ सिद्धांतच
न्द्रिकावृत्तिं पूर्वार्द्धे चकरीदिमाम् ॥ इति श्री सिद्धांतचंद्रिकाव्याख्यायां सदानंदकृतौ पूर्वार्द्धः समाप्तिमगात् ॥ मि० मार्गशीर्षशुक्ल ॥ ७ सम्वत् १९४५

॥इश्तिहार दियाजाताहै ग्राहकलोगोंको किबम्बई कलक त्ता लखनऊ· औरआगरादिल्ली· मेरट· इलाहा
बाद· पूना बनारस औरकइएकछापेकीपुस्तकैं हमारेइहांमौजूदहैं जिनमहाशयोंकोलेनाहोयतोआ
धआनेका टिकटभेजकेसंस्कृत औरभाषासुची पत्रमगायलेवें उसमेसब पुस्तकोंकानाम औरदर
लिखाहै॥ ६॥ ❋ ॥६॥ इसकार्यकेसंपादक बाबूकवलेश्वर सिंहबुकसेलर बनारस छोटकी
पियरी॥ मी· मार्गशीर्ष शुक्ल ९ ॥ श्रीराम ॥ रामराम ॥ राम ॥ राम॥